❋ श्रीश्रीगौरगदाधरौ विजयेताम् ❋

श्रील प्रबोधानन्दसरस्वतिपादविरचितम्

श्रीचैतन्यचन्द्रामृतम्



श्रीहरिदासशास्त्री

सङ्गणकसंस्करणं दासाभासेन हरिपार्षददासेन कृतम्

प्रकाशक * मुद्रक :—
श्रीहरिदासशास्त्री
श्रीगदाधरगौरहरि प्रेस, श्रीहरिदासनिवास,
कालीदह, वृन्दाबन, जिला—मथुरा।
उत्तरप्रदेश

प्रकाशनतिथि :—
श्रीजगन्नाथ देवकी स्नानयात्रा
२ आषाढ़ १७-६-८१
श्रीगौराङ्गाब्द ४९५

प्रकाशन सहयोग ५.००मुद्रा

प्रथम संस्करण

✲ श्रीश्रीगौरगदाधरौ विजयेताम् ✲

श्रीचैतन्यचन्द्रामृतम्

श्रीलप्रबोधानन्दसरस्वतिपादविरचितम्

(आनन्दिकृत टीकोपेतम्, भाषानुवादेन चालङ्कृतम्)

तच्च

श्रीवृन्दाबनधामवास्तव्येन
न्याय-वैशेषिकशास्त्रि, न्यायाचार्य, काव्य, व्याकरण,
सांख्य, मीमांसा वेदान्त, तर्क, तर्क, तर्क,
वैष्णवदर्शनतीर्थ, विद्यारत्नाद्युपाध्यलङ्कृतेन
श्रीहरिदासशास्त्रिणा सम्पादितम् ।

सद्ग्रन्थप्रकाशक :—

श्रीहरिदासशास्त्री

श्रीगदाधरगौरहरि प्रेस, श्रीहरिदासनिवास,
कालीदह, वृन्दाबन, जिला—मथुरा ।
उत्तरप्रदेश

** श्रीश्रीगौरगदाधरौ विजयेताम् **

—**—

विज्ञप्तिः

—**—

श्रीश्रीचैतन्य देव की अनुकम्पा से, श्रीप्रबोधानन्दसरस्वतीपाद कृत स्तोत्रकाव्य श्रीचैतन्यचन्द्रामृत प्रकाशित हुआ। प्रस्तुत ग्रन्थ-रत्न निवद्ध १४३ श्लोकों से हुआ है, इस ग्रन्थ के प्राचीन टीकाकार श्रीआनन्दी ने निजकृत रसिकास्वादिनी टीका में उक्त श्लोक माला को द्वादश विभाग में विन्यस्त किया है, उक्त टीका अतीव उपादेय होने से प्रस्तुत प्रकाशन में मुद्रित हुई है। प्रथम विभाग में '१–७' स्तुति प्रकरण, द्वितीय में '८–१३' प्रणाम, तृतीय में '१३–१७' आशीर्वाद, चतुर्थ में '१८-३०' श्रीचैतन्य भक्त महिमा, पञ्चम में '३१-४५' श्रीचैतन्याभक्त निन्दा, षष्ठ में '४६-५६' दैन्य रूप स्वनिन्दा सप्तम में '५७-७९' उपास्य निष्ठा, अष्टम में '८०-९९' लोक शिक्षा, '११०-१३०' अवतार महिमा, एकादश में '१३१-१३६' श्रीगौर-रूपोल्लास नृत्यादि एवं द्वादश में शोचक '१३७-१४३' हैं।

इस ग्रन्थ में रचयिता के भाव समूह परम परिस्फुट है, एवं भाषा का गाम्भीर्य माधुर्य्य भी युगपत् विद्यमान् है, श्रीचैतन्य चन्द्रा-मृत शव्दार्थालङ्कार परि पूरित प्रौढ़िवादमय प्रकरण ग्रन्थ है, ग्रन्थ के मध्य में आपने स्वीय एकान्त श्रीगौर भक्ति तथा निष्ठा को अनेक स्थलों में व्यक्त (३१-६१) किया है, उनके श्रीचैतन्य देव 'राधया माधवस्य एकीभूतं वपुः '१३' हैं, प्रवलतम गौर निष्ठा के मध्य में भी समय समय पर उनके चित्त में ' राधापदाम्वुज सुधाम्वुराशि झलक जाती '८८' है, एवं समय समय पर श्रीराधापदनख मणि-ज्योति '६८' का उदय हृदय में होने के लिए प्रार्थना भी करते हैं,

आपने सम्यक् रूप से यह भी उपलब्धि की है कि प्रेममहिमा, नाम माधुरी, श्रीवृन्दावन माधुरी में प्रवेश अधिकार, एवं परम रस चमत् कार माधुर्य्य सीमा श्रीराधातत्त्व प्रभृति का लाभ, केवल श्री-गौरकृपा से ही सम्भव है '१३०'। श्रीराधाकृष्ण तत्त्व एवं श्रीगौर तत्त्व में एकान्त अभेदत्व होने पर भी नाम वैशिष्ट्य (५३) लीला-वैशिष्ट्य (७७-७८) में आप की दृष्टि विशेष रूप से आकृष्ट हुई है। आप श्री गौर पारम्यवादी हैं, इस ग्रन्थ के अध्ययन से मानव मन उत्कृष्टतम आनन्द में निमज्जित होगा। पाठ भेद की विविधता हेतु आनन्दि स्वीकृत पाठ को निबद्ध किया गया है।

हरिदास शास्त्री

मुखपृष्ठके चित्रमें-

दक्षिणे श्रीनरहरि वामेगदाधर
सम्मुखे नृत्य करेन
गौराङ्ग सुन्दर ॥

वेदान्तदर्शनम् श्रीमद्भागवतभाष्योपेतम् २०.००
श्रीगोविन्दलीलामृतम्–सम्पूर्णम् ६०.००

** श्रीश्रीगौरगदाधरौ विजयेताम् । **

—***—

❀ सूची पत्रम् ❀

****

प्रकरणम्	पत्राङ्क
अथ स्तुति प्रकरणंनाम—सप्तपद्यात्मकप्रथमो विभागः ।	१–१२
अथ प्रणाम प्रकरणम्—पञ्चपद्यात्मकद्वितीयो विभागः ।	१३–१६
अथ आशीर्वाद प्रकरणम्—पञ्चपद्यात्मकतृतीयो विभागः ।	१७–२२
अथ श्रीचैतन्यभक्तमाहात्म्यप्रकरणम्— त्रयोदश पद्यात्मकचतुर्थोविभागः ।	२२–३२
अथ श्रीचैतन्याभक्तनिन्दा प्रकरणम्— पञ्चदशपद्यात्मकपञ्चमविभागः ।	३२–४४
अथ दैन्यरूप स्वनिन्दाप्रकरणम्— एकादश पद्यात्मकषष्ठविभागः ।	४४–५२
अथ उपास्यनिष्ठा प्रकरणम्— त्रयोविंशति पद्यात्मक सप्तमविभागः ।	५२–७०
अथ लोकशिक्षा प्रकरणम्—विंशति पद्यात्मकअष्टमविभागः ।	७१–८४
अथ श्रीचैतन्योत्कर्षता प्रकरणं नाम— दश पद्यात्मकनवमविभागः ।	८५–९२
अथ अवतारमहिमा प्रकरणं नाम— एकविंशति पद्यात्मकदशमविभागः ।	९३–१११
अथ रूपोल्लासनृत्यादिप्रकरणं नाम— षट् पद्यात्मक एकादश विभागः ।	१११–११५
अथ शाचकप्रकरणं नाम—सप्त पद्यात्मक द्वादशविभागः	११५–१२५

शताधिकत्तयश्चत्वारिंशत् पद्यात्मक
द्वादश प्रकरणेन विभक्तः श्रीचैतन्य
चन्द्रामृतग्रन्थः समाप्तः ॥

✽✽ श्रीश्रीगौरगदाधरौ विजयेताम् ✽✽

——✽✽——

श्रीचैतन्यचन्द्रामृतम् ।

——·ෆ०:✽:०ෆ·——

स्तुमस्तं चैतन्याकृतिमतिविमर्य्यादपरमा-
द्भुतौदार्य्यं वर्य्यं व्रजपतिकुमारं रसयितुं ।
विशुद्धस्वप्रेमोन्मदमधुरपीयूषलहरीं
प्रदातुं चान्येभ्यः परपदनवद्वीपप्रकटं ॥१॥

श्रीश्रीकृष्णचैतन्यचन्द्राय नमः ॥ कृत्वा दण्डप्रणामं स्वगुरुवरमहाश्रीनृसिंहाङ्घ्रिपद्मे केनाप्यानन्दिनाम्ना प्रकरणघटिका रच्यतेऽनर्च्चर्यवृद्धया । टीका चैतन्यचन्द्रामृतरसरसिकास्वादिनी वैष्णवानां देवालीनामिवासद्दनुजकुलघटामोहिनी मोहिनीव ॥✽॥

श्रीश्रीपाद परिव्राजराजो वेदान्तसाङ्ख्यवैशेषिकपातञ्जलजमीमांसागमनिगममहापुराणपुराणसेतिहासपञ्चरात्रालङ्कारकाव्य नाटकादि रहस्य सिद्धान्तानर्गलवक्तृत्वोज्ज्वलीकृतासङ्ख्यकाशीवास्यन्तेवासिकजनानन्तःकरणकः सर्व्वावतारिणः स्वयं भगवतोऽङ्गीकृताह्लादिनीशक्तिसारभूतश्रीराधिकाभावरूपस्य श्रीश्रीकृष्णचैतन्यमहाप्रभोः कृपादृष्टिपातेन स्फुरितयथार्थसिद्धान्तः प्रवोधानन्दसरस्वती परममहानुभावस्तस्यैवोपास्यत्वं निर्णयन् तद्गुणवर्णनप्रधानचैतन्यचन्द्रामृताभिधान-मङ्गलस्वरूप-ग्रन्थमारभते । तत्रादौ स्तौति सप्तश्लोकया । तत्रापि नवद्वीपावतार प्रयोजनं दर्शयन् स्तौति स्तुमस्तमित्यादि ॥ तं प्रसिद्धं स्वयं भगवन्तं चैतन्याकृतिं श्रीकृष्ण-

माधुर्य्यास्वादलुब्धेन वृन्दारण्य निवासिना ।
शास्त्रिणा हरिदासेन चन्द्रामृतं प्रकाश्यते ॥

सर्वावतार श्रेष्ठ मर्य्यादातिरिक्त उदारता विशिष्ट घनीभूत सच्चिदानन्दमय गौराकृति परब्रह्म कृष्णचैतन्य महाप्रभु हैं, नवद्वीप

चैतन्यनामानं महाप्रभुं वयं स्तुमः स्तवनविषयं कुर्म्म इत्यन्वयः। वहुवचनन्तु शिष्यादिसहितत्वेन। चैतन्य इत्यनेन श्रीकृष्णचैतन्यो लक्ष्यः। एकदेशेन समुदायोपचारात्। यथा सत्या सत्यभामा भीमो भीमसेन इति ॥ अथवा चैतन्य इत्येकं नाम। चैतन्यः कृष्णचैतन्यो-दण्डधृक् न्यस्तदण्डक इति शतनामोक्तत्वात् आकारयति आह्वयति अनया आकृतिर्नाम। चैतन्यः कृष्णचैतन्यो वा आकृतिराकारः स्वरूपं यस्य स चैतन्याकृतिस्तं यद्वा, चैतन्या चेतनासम्वन्धिनी आकृतिराकारः स्वरूपं यस्य स चैतन्याकृतिः। घनीभूतसच्चिदानन्दमयगौरनराकृति-परब्रह्मेत्यर्थः। कीदृशं परपदनवद्वीपप्रकटं परं सर्व्वोत्कृष्टं पदं स्थानं यो नवद्वीपस्तस्मिन् प्रकटीभूतं। यद्वा, परस्य परमेश्वरस्य पदं नित्य-स्थानं। किम्वा परस्य पदानि पदचिह्नानि यत्र नवानां श्रवणकीर्त्तना दीनां नवविधभक्तीनां द्वीप इव नवद्वीपस्तस्मिन्नाविर्भूतमित्यर्थः ननु किं कर्त्तुं नवद्वीपे प्रकटीभूतस्तत्र प्रयोजनमाह व्रजपतिकुमारं रसयितुं व्रजस्य पतिः श्रीनन्दस्तस्य कुमारं नन्दनं व्रजेन्द्रनन्दनत्वेनात्मानं रस-यितुं आस्वादयितुं। प्रयोजनान्तरञ्चानुषङ्गिकमाह अन्येभ्यो विशुद्धः फलाद्यनुसन्धानरहितो निर्म्मलः समर्थरत्युद्भवो यः स्वप्रेमा स एवोन्मदमधुरपीयूषं उद्गतोमदो हर्षगर्व्वादिर्यस्मात्तदुन्मदं मधुरञ्च तत् पीयूषञ्चेति मधुरपीयूषं उन्मदञ्चैतत् मधुरपीयूषञ्चेति तत्तस्य लहरीं धारां प्रदातुं प्रकृष्टरूपेण दत्त्वा स्वादयितुञ्च प्रकटीभूतश्च। प्रदाने हेतुगर्भविशेषणमाह अतिविमर्य्यादपरमाद्भुतौदार्य्यं अतिशय मर्य्यादातिरिक्तं परममद्भुतं औदार्य्यमतिशयदातृत्वं यस्य तं। अतएव वक्ष्यते चैवं भूतमौदार्य्यं पात्रापात्रविचारणां न कुरुते न स्वं परं वीक्ष्यते देयादेय विमर्षको नहि न वा कालप्रतीक्षः प्रभुः। सद्यो यः श्रवणेक्षणप्रणमन ध्यानादिना दुर्ल्लभं दत्ते भक्तिरसं स एव भगवान्

नामक परमोत्कृष्ट स्थान में आप आविर्भूत हुए थे, आपकी स्तुति हम सव करते हैं, आप स्वयं व्रजेन्द्रनन्दन होकर भी श्रीराधा भावामृत के द्वारा स्वयं को आस्वादन कर निखिल जगत् वासियों को उस प्रेमामृत से आप्लुत किए थे ॥१॥

गौरः परः मे गतिः ॥ यत एवम्भूतं अतो वर्ण्य सर्व्वावतारेभ्यः श्रेष्ठतमं। आस्वादने स्वमाधुरीचमत्कार एव कारणं। तथाहि ब्रजवने दर्पणादौ स्वरूपमाधुरीं विलोक्य विस्मितस्तदास्वादयितुं जातलोभोऽभूत्। तस्य विस्मयो यथा तृतीयस्कन्धे ॥ यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं। विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गमिति॥ जातलोभो यथा। परमशिष्ट महानुभाव श्रीरूपरचितललितमाधवनाटके। अपरिकलितपूर्व्वः कश्चमत्कारकारी स्फुरति मम गरीयानेष माधुर्य्यपूरः। अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः सरभसमुपभोक्तुं कामये राधिकेव। यथा वा श्रीरघुनाथदासकृत चैतन्याष्टके। हरिर्दृष्ट्वा गोष्ठे मुकुरगतमात्मानमतुलं स्वमाधुर्य्यं राधां प्रियतरसन्तीमाप्तुमचिरात्। अहो गौड़े जातः प्रभुरपरगौरैकतनुभाक् शचीसूनुः किं मे नयनशरणिं यास्यति पुनः। ममैव चैतन्याष्टके। निजां माधुरीं दर्पणे प्रेक्ष्य गोष्ठे प्रियाभाववाप्तुं कलौ जातुमिष्टे। तदास्वादनप्रोल्लसन्मानसोऽहं भजे श्रीशचीनन्दनं गौरदेहमिति॥ नानाशास्त्रविद्या सर्व्वविद्वत्प्रशंसितेन परमशिष्टेनैतद् ग्रन्थकारेण स्तवन-गमन मननोपासनविषयत्वेन चैतन्याकृतेः परमेश्वरत्वमायातमतः कलौ स एवोपास्य इति निष्कर्षार्थः। ननु केन प्रकारेण ग्रन्थकारस्तावदीश्वरत्वेनास्य स्तवादिकमकरोदित्यत्रोच्यते भगवदनुग्रहजन्य-ज्ञानविशेषालौकिक प्रमाणेन स्तवादि क्रियते। अनुमानादिलौकिकप्रमाणेन ईश्वरः साध्यते भगवत्तत्त्वं हि लौकिकप्रमाणेन प्रमातुं न शक्यते। किन्तु भगवदनुग्रहजन्य-ज्ञानेनैव शक्यते तस्यैव प्रमाणकरणत्वात्। तथाहि श्रीदशमे ब्रह्मवाक्यम्। तथाहि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि। जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन्। विचिन्वन्निति-शास्त्रादिवर्त्मसु। तथापि प्रमाणानि दर्श्यन्ते। तत्र सर्व्वप्रमाणचूड़ामणौ श्रीभागवतैकादशस्कन्धे पञ्चमोऽध्याये। जनक उवाच। कस्मिन् काले स भगवान् किं वर्णः कीदृशो नृभिः। नाम्ना वा केन विधिना पूज्यते तदिहोच्यतां। करभाजन उवाच। कृतं त्रेता द्वापरश्च

कलिरित्येषु केशवः। नानावर्णाभिधाकारो नानैव विधिनेज्यते॥ कृते शुक्लश्चतुर्व्वाहुर्जटिलो वल्कलाम्वरः। कृष्णाजिनोपवीताक्षान् विभ्रद्दण्डं कमण्डलुं॥ मनुष्यास्तु तदा शान्ता निर्व्वैराः सुहृदः समाः यजन्ति तपसा देवं शमेन च दमेन च। हंसः सुपर्णो वैकुण्ठो धर्म्मो योगेश्वरोऽमलः। ईश्वरः पुरुषो व्यक्तः परमात्मेति कीर्त्यते॥ त्रेतायां रक्तवर्णोऽसौ चतुर्व्वाहुस्त्रिमेखलः। हिरण्यकेशस्त्रय्यात्मा स्रुक् स्रुवाद्युपलक्षितः। तं तदा मनुजा देवं सर्व्वदेवमयं हरिं। यजन्ति विद्यया त्रय्या धर्म्मिष्ठा ब्रह्मवादिनः विष्णुर्यज्ञः पृश्निगर्भः सर्व्वदेव उरुक्रमः। वृषाकपिर्जयन्तश्च उरुगाय इतिर्य्यते॥ द्वापरे भगवान् श्यामः पीतवासा निजायुधः। श्रीवत्सादिभिरङ्कैश्च लक्षणैरुप-लक्षितः। तं तदा पुरुषं मर्त्या महाराजोपलक्षणं। यजन्ति वेद-तन्त्राभ्यां परं जिज्ञासवो नृप। नमस्ते वासुदेवायः नमः सङ्कर्षणाय च। प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः। नारायणाय ऋषये पुरुषाय महात्मने। विश्वेश्वराय विश्वाय सर्व्वभूतात्मने नमः। इति द्वापर उर्व्वीश स्तुवन्ति जगदीश्वरं। नानातन्त्रविधानेन कला-वपि तथा शृणु। कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदं। यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः। ध्येयं सदा परिभवघ्न-मभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यं। भृत्यार्त्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दं। त्यक्त्वा सुदुस्त्यज-सुरेप्सितराज्यलक्ष्मीं धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यं। मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविन्दं॥३॥ पद्यत्रय-स्यार्थः। सुमेधसो जना कलौ संकीर्त्तनवाहुल्यैर्यज्ञैः साधनैर्भगवन्तं यजन्ति उपासते। किम्भूतं कृष्णवर्णं त्विषा ह्लादिनीसारभूत श्री-राधिकाङ्गकान्त्या अकृष्णं वहिर्गौरं। व्याख्यातञ्च स्वामिचरणैः त्विषा कान्त्या अकृष्णमिन्द्रनीलमणिवदुज्ज्वलमिति तत्राभिप्रायः चम्पकपुष्पसमभिव्याहारेण इन्द्रनीलमणिर्यथा तद्वर्णो भवति वहिस्तथा ह्लादिनीसारभूत श्रीराधिकाङ्गकान्त्या वहिर्गौरवर्णः राधा-माधवयोरेकीभूतत्वात्। तत्रापि वक्ष्यते। एकीभूतं वपुरवतु वो

राधया माधवस्येति। श्रीसनातनगोस्वामिभिरुक्तञ्च। राधाकृष्ण प्रणयविकृतिर्ह्लादिनीशक्तिरस्मादेकात्मानावपि भुवि पुरा देहभेदं गतौ तौ। चैतन्याख्यं प्रकटमधुना तद्द्वयं चैक्यमाप्तं राधाभावद्युतिसुवलितं नौमि कृष्णस्वरूपमिति। अत उक्तं श्रीजीवगोस्वामिभिः अन्तः कृष्णं वहिर्गौरं दर्शिताङ्गादिवैभवमित्यादि। पुनः कीदृशं साङ्गोपाङ्गास्त्रपार्षदं। अङ्गं नित्यानन्द उपाङ्गमद्वैतः अस्त्रं हरिनाम पार्षदाः श्रीवासादयः तैः सह वर्त्तमानं। कृष्णवर्णमित्यस्यार्थः श्लोकीकृत्य प्रकटितः। श्रीरूपगोस्वामिभिः। कलौ यं विद्वांसः स्फुटमभियजन्ते द्युतिभरादकृष्णाङ्गं कृष्णं मुखविधिभिरुत्कीर्त्तनमयैः उपास्यञ्च प्राहुर्यमखिलचतुर्थाश्रमजुषां स देवश्चैतन्याकृतिरतितरां नं कृपयतु। ध्येयमित्यादि सुगमः। त्यक्त्वेत्यादिव्याख्या हे महापुरुष स्वेश्वरतासूचकचिह्नदीर्घभुजग्रीवाद्यवयव हे धर्म्मिष्ठ हे युगधर्म्म पालक हे आर्य्य सर्व्वावतारश्रेष्ठ स्वप्रेमदानेनापामरकृतार्थीकृतत्वात् ते चरणारबिन्दं वन्दे। यदित्यव्यं। यः सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं त्यक्त्वा वचसा वाङ्मात्रेनैवानायासेनारण्यं वैराग्यमगात् प्राप्तवान् कृतवान् वा करोतीत्यर्थस्य सर्व्वधात्वनुगतत्वात्। अरणं श्रीकृष्णपादपद्मशरणमर्हतीति अरण्यं वैराग्यं। सुदुस्त्यजं सुराणामभीप्सितं प्राप्तुमिष्टं राज्यं महाराजादिसम्पद्यस्याः सा दुस्त्यजसुरेप्सितराज्या सा चासौ लक्ष्मीश्चेति तां विष्णुप्रियां। मायाया मृगं अन्वेषणमन्वधावत् दयिताप्रेमभक्तिस्तस्या ईप्सितं। यथा स्यात्तथा अन्वधावत् दूरीकृतवानित्यर्थः। अन्तर्भावितण्यर्थत्वात्। य एवमेवं कृतवान् तस्या चरणारविन्दं वन्दे इति कलिकालोपास्य श्रीकृष्णचैतन्यचरणवन्दनं प्रकटितं श्लोकद्वयेनेति अवतारान्तरवन्दनव्याख्यात्वाच्छन्नावतारत्वेन न त्वाभिप्रायिकी। अन्यथा अन्यद्भूक्तमन्यद्वान्तमिति न्यायस्यावसरः स्यादिति। श्रीदशमे। आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनुः। शुक्लोरक्तस्तथापीतः इदानीं कृष्णतां गतः। आसन्निति भूतनिर्द्देशोऽतीतकलिकालाभिप्रायेण। सप्तमे च प्रह्लादस्तुतौ। धर्म्मं महापुरुषपासि युगानुवृत्तं छन्नः कलौ

धर्म्मास्पृष्टः सततपरमाविष्ट एवात्यधर्म्मे
र्दृष्टिं प्राप्तो नहि खलु सतां सृष्टिषु क्वापि नोसन् ।
यद्दत्त श्रीहरिरससुधास्वादमत्तः प्रनृत्य-
त्युच्चैर्गायत्यथ विलुठति स्तौमि तं कञ्चिदीशं ।।२।।

यदभवस्त्रियुगोऽथ स त्वमिति । आच्छन्नरूपत्वमस्यैश्वर्य्यज्ञान-विषयत्वाभावात् । महाभारते च । परित्राणाय साधूनां विनाशाय च दुष्कृतां । धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ।। सन्नचासकृत् समः शान्तो निष्ठाशान्तिपरायणः । सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गीदीति । वायुपुराणे । शुद्धो युगे ।। स्कन्दपुराणे । अन्तःकृष्णो वहिर्गौरः साङ्गोपाङ्गास्त्रपार्षदः । शचीगर्भे समाप्नुयां मायामानुषकर्म्मकृत् ।। नारदीये । दिविजा भुवि जायध्वं जायध्वं भक्तरूपिणः कलौ सङ्कीर्त्तनारम्भे भविष्यामि शचीसुतः ।। वामनपुराणे । कलौ घोरतमश्छन्नान् सर्व्वानाचारवर्जितान् । शचीगर्भे च संभूय तारयिष्यामि नारद ।। भविष्ये । आनन्दाश्रुकलारोमहर्षपूर्णं तपोधनं सर्व्वे मामेव द्रक्ष्यन्ति कलौ सन्नचासिरूपिणं ।। गारुडे । कलौ प्रथमसन्ध्यायां । लक्ष्मीकान्तो भविष्यति । दारुब्रह्मसमीपस्थः सन्नचासी गौरविग्रहः ।। अहमेव द्विजश्रेष्ठ नित्यं प्रच्छन्नविग्रहः । भगवद्भक्तरूपेण लोकं वक्ष्यामि सर्व्वदा । नारदीये इत्यादिषु प्रमाणेषु संत्स्वपि कुमेधस ईश्वरत्वेन न मन्यन्ते । अतएव सुमेधस इत्युक्तं । यजन्ति इति परस्मैपदेन फलनिराकाङ्क्षत्वेन शुद्धभजनं सूचितमिति दिक् ।१

स्वीयमास्वादितुं प्रेमदातुं चावततार यः ।
नवद्वीपे परपदे स्तुमस्तं गौरमीश्वरं ।।१।।

अत्यन्तायोग्यसम्प्रदानक-प्रेमदातृत्वेन परमाद्भुतौदार्य्यं दर्शयन् स्तौति । धर्म्मास्पृष्ट इत्यादि । ईदृशो जनो यद्दत्त-श्रीहरिरससुधा-स्वादुमत्तः सन् प्रनृत्यति उच्चैर्गायति अथानन्तरं विलुठति तं कञ्चित्

धर्म ने जिस व्यक्ति को कभी स्पर्श भी नहीं किया है, अर्थात् जिस का कुछ भी पुण्य नहीं है, जो सर्वदा अतिशय अधर्म में ही

यन्नाप्तं कर्म्मनिष्ठैर्नच समधिगतं यत्तपोध्यानयोगै-
र्वैराग्यैस्त्यागतत्त्वस्तुतिभिरपि न यत्तर्कितञ्चापि कैश्चित् ।
गोविन्दप्रेमभाजामपि नच कलितं यद्रहस्यं स्वयं त-
न्नाम्नैव प्रादुरासीदवतरति परे यत्र तं नौमि गौरं ॥३॥

अनिर्व्वचनीयं दयालुमीशं स्तौमीत्यन्वयः । कीदृशो जन एवम्भूतो भवति । तमाह धर्म्मास्पृष्टः धर्म्मेणास्पृष्टं यस्य किञ्चित् पुण्यादिकं नास्तीत्यर्थः । अथ चात्यधर्म्मे गुर्व्वङ्गनागमनादि जन्य महापापे सततपरमाविष्ट एव पापावेशस्य सातत्ये परमत्वे च प्रायश्चित्तमपि नास्ति यस्य सः । ननु प्रायश्चित्तादिकन्तु तस्य नास्तु किन्तु साधु-दर्शनेन पूतः स्यात् दर्शनादेव साधव इत्याद्युक्तत्वादत आह दृष्टिमिति यतः सतां साधूनां दृष्टिं खलु निश्चितं न प्राप्तः नतु सत्सृष्टस्थानादिषु स्थितस्य न पापादिकमिति चेत्तत्राह क्वापीति सतामिति काकाक्षि-गोलकन्यायेन उभयत्र सम्वध्यते क्वापि सतां सृष्टिषु नो सन् नो वर्त्तमानः । ओकारान्तो नोशव्दोनिषेधार्थः एवम्भुतोऽपि जनो यद्दत्त-श्रीहरिरससुधास्वादमत्तः प्रनृत्यतीत्यादि । श्रीः परमशोभारूपा परमलक्ष्मीरूपा वा राधिका हरिः श्रीकृष्णश्च तयोः रसः प्रेमरसः एव सुधा येन श्रीचैतन्येन दत्ता तादृश सुधा तस्या आस्वादस्तेन मत्तः । यथा अन्य सुधापानेन मत्तः सन् प्रनृत्यतीत्यादि । तथा प्रेमरसा-स्वादनानुभावाः प्रकृष्टा नृत्यादयः अत ईश्वरेण विनैतादृशी शक्तिर्न-भवतीत्याह ईशमिति ॥२॥

अत्यधर्म्मो धर्म्मवर्जो हरिसम्वन्धिवर्ज्जितः ॥
येन दत्तप्रेममत्तोऽभूत्तं गौरहरिं स्तुमः ॥२॥

आविष्ट है, अर्थात् पराङ्गना गमनादि रूप महापाप में निरन्तर रत है, जो पाप पुञ्जनाशक साधुजन के दृष्टि पथ को एव सज्जनरचित स्थान को प्राप्त नहीं किया है, वह भी जिन चैतन्य देव का प्रदत्त श्री-राधाकृष्ण के प्रेमरस सुधा का आस्वादन से विभोर होकर नृत्य गीत, प्रभृति करता रहता है, उन अनिर्वचनीय ईश्वर का मैं स्तव करता हूँ ॥२॥

दृष्टः स्पृष्टः कीर्त्तितः संस्मृतो वा दूरस्थैरप्यानतो वादृतो वा।
प्रेम्नः सारं दातुमीशो य एकः श्रीचैतन्यं नौमि देवं दयालुं ॥४॥

अतिदुरूहनिगूढ़प्रेमपराकाष्ठा प्रकाशकत्वेन स्तौति यन्नाप्त-मित्यादि ॥ यत्र श्रीचैतन्ये अवतरति सति तत्प्रेम नाम्नैव स्वयं प्रादुरासीत् तं नौमि नुस्तुनाविति धातुः यत्र कीदृशे परे परमेश्वरे तत् किम्भूतं रहस्यं अतिनिगूढ़ं पुनः किं विशिष्टं कर्म्मनिष्ठैर्यन्नाप्तं कर्म्मसु निष्ठा आग्रहो येषाम् तैः तर्हि किं तप आदिभिः प्राप्यं नेत्याह न चेति तपः क्लेशसहिष्णुतया भजनादि। ध्यानं भगवद्रूपचिन्तनं योगोऽष्टाङ्गः एतैर्यन्न समधिगतं न ज्ञातं। वैराग्यादिभिश्च यन्न तर्कितं नोपलब्धं। वैराग्यं युक्तवैराग्यं तल्लक्षणं। अनासक्तस्य विषयान् यथार्हमुपयुञ्जतः। निर्व्वन्धः कृष्णसम्वन्धे युक्तं वैराग्य-मुच्यते इति। अथवा विशिष्टे परमेश्वरे राग इच्छा यस्य स विरागस्तस्य भावो वैराग्यं भगवद्भजनमात्रविषयिणीच्छा वैराग्य-मित्यर्थः। तैरपि यन्नाप्तं वहुत्वन्तु वहुकालव्यापित्वात्। त्यागः कर्म्मत्यागः तेन शुद्धभजन सूचितं। तत्त्वं भगवत्तत्त्वज्ञानं स्तुति-र्भगवद्विषयिकार्थस्तवपाठादिस्तैर्यन्नाप्तं। कैश्चिद्विरलैरपि। अन्येषां किं वक्तव्यं गोविन्दप्रेमभाजामपि न कलितं न मिलितं ॥३॥

विशेषसाधनैर्यत्तु न प्राप्तं कैरपि स्वयं।
तत्प्राद्रासीद्यद्व्यक्त्या नौमि तं गौरमीश्वरं ॥३॥

काम्य कर्मपरायण व्यक्तिगण जिस को प्राप्त नहीं कर पाते है, तपस्या, ध्यान, अर्थात् भगबान् के रूपादि चिन्तन तथा अष्टाङ्ग योगानुष्ठान के द्वारा भी जो अलभ्य है, वैराग्य अर्थात् केवल भगवद् भजन विषयिणी इच्छा को छोड़कर अर्थात् शुद्ध भजन तत्त्व-(भगवत् तत्त्वज्ञान) स्तुति अर्थात् भगवद् विषयक स्तवादि पाठ से भी जिस की प्राप्ति नहीं होती है, एवं श्रीगोविन्द परायण व्यक्ति गण के लिए भी अलभ्य है, उस प्रकार गूढ़ प्रेम, जिन के आविर्भाव से स्वयं नाम मात्र से ही प्रकाश हुआ था, उन श्रीगौर विग्रह श्रीकृष्ण चैतन्य चन्द्र को मैं प्रणाम करता हूँ ॥३॥

कैवल्यं नरकायते त्रिदशपूराकाशपुष्पायते
दुर्द्दान्तेन्द्रियकालसर्पपटली प्रोत्खातदंष्ट्रायते ।
विश्वं पूर्णसुखायते विधिमहेन्द्रादिश्च कीटायते
यत्कारुण्यकटाक्षवैभववतां तं गौरमेव स्तुमः ॥५॥

यथाकथञ्चिद्दर्शनादिमात्रेण परमप्रेमदत्वात् परमदयालुतामुद्दिशन् स्तौति दृष्ट इत्यादि। य एक एव दृष्टः दर्शनादिविषयः सन् प्रेम्नः सारं स्नेहादि दातुमीशः समर्थः नान्यस्तं श्रीचैतन्यं नौमि कीदृशं देवं स्वप्रेमरमास्वादनेन क्रीड़न्तं। ननु समर्थोऽपि किमत्यन्तंगोप्यं वस्तु ददाति तत्राह दयालुं अतिशयदयाशीलं। स्पृष्टः वलात् कारेण स्वालिङ्गनं कारितः। कीर्त्तितः हे शचीनन्दन हे श्रीकृष्णचैतन्य हे परमदयासागर हे पतितप्रेमद हे करुणैकसिन्धो हे दीनैकवन्धो हे गौरविधो इत्यादिभिः कीर्त्तनविषयः। दूरस्थैर्दुरदेशस्थितैर्जनै रूपलावण्यादि स्मरणविषयीभूतः दण्डवत् प्राणपातेन नमस्कृत आदृतो वा अयं श्रीकृष्णचैतन्यमहाप्रभुः परमेश्वरन्तावद्दण्डवत् प्रणामाभ्युत्थानादि सम्भ्रान्तिविषयः कर्त्तव्य इति कृत्वा आदरविषयीभूतः। अनुक्तसमुच्चयार्थे चार्थे वा वाशव्दस्तेन श्रवणादिविषयोऽपि गृह्यते ॥४॥

योदर्शनादि मात्रेण पतितप्रेमदोभवेत् ।
नौमि तं कृष्णचैतन्यदेवं कारुण्यवारिधिं ॥४॥

श्रीकृष्णचैतन्यकरुणापात्रभक्तानां महिमानं दर्शयन् स्तौति

जो एकवार मात्र दृष्ट, आलिङ्गित, कीर्त्तित अर्थात् हे शचीनन्दन श्रीकृष्णचैतन्य ! हे परम दयासागर ! हे पतित प्रेमद ! हे करुणैक सिन्धो ! हे दीनैक बन्धो ! हे गौर विधो ! इत्यादि नाम द्वारा कीर्त्तनीय, अथवा रूप लावण्यादि द्वारा स्मरण विषयीभूत होने से किम्वा दूरस्थ व्यक्ति गण के द्वारा नमस्कृत सम्मानित होने से ही गूढ़ प्रेम प्रदान करते हैं उन परम दयालु श्रीचैतन्य देव को मैं नमस्कार करता हूँ ॥४॥

कैवल्यमित्यादि यत् कारुण्यकटाक्षवैभववतां कैवल्यादि नरकायते इत्यादि तं गौरमेव वयं स्तुम इत्यन्वयः। बहुवचनन्तु आनन्दाधिक्ये-नात्मनोगौरवम्मन्यत्वात्। यत् यस्य चैतन्यस्य कारुण्येन यत् कटाक्षः स एक वैभवं सम्पत्तिर्विद्यते येषां तेषां सम्बन्धे कैवल्यं निर्व्वाणमुक्ति-र्नरकायते नरकमिवाचरति यथा नरकविशेषस्थितस्य भगवद्भजनादि सुखं न भवति। तथा सायुज्यमुक्तावपि अतएव भक्ता मुक्ति नरक-तुल्यां मन्यन्ते। षष्ठस्कन्धे पार्व्वतीं प्रति शिववाक्यं। नारायण-पराः सर्व्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थ-दर्शिनः। यत् कारुण्यकटाक्षवैभववतामिति सर्व्वत्र योज्यं। त्रिदशपूः स्वर्गपुरी आकाशपुष्पायते खपुष्पमिवाचरति यथा खपुष्पं अलीकं तथा तेषां स्वर्गसुखादि। दुर्द्दान्तानि अनिवार्य्याणि यानीन्द्रियाणि तान्येव कालाः कृष्णा अति क्रोधयुक्ताः सर्पास्तेषां पटली श्रेणी प्रोत्-खातदंष्ट्रायते प्रोत्खाताः समूलमुत्पाटिता दंष्ट्रा दन्ता यस्याः सा प्रोत् खातदंष्ट्रा उत्पाटितदन्ता सर्पपटली यथा दंशनेऽसमर्था तथा तथा चैतन्यकारुण्यकटाक्षवतामिन्द्रियपटलीविषयभोगेऽसमर्था। किन्तु हृषीकेशभजने अतिसमर्था भवतीत्यर्थः। तेषां विश्वं पूर्णसुखायते तत्-कारुण्यं कटाक्षवन्तो विश्वं सुखपूर्णं मन्यन्ते आत्मनो भगवद्विषयकं भावं सर्व्वत्र पश्यन्ति। अहं यथा भगवद्भजनसुखमनुभवामि तथा सर्व्वेऽनुभवन्तीत्यर्थः। तेषां विधिमहेन्द्रादिश्च कीटतुल्यो भवति। श्रीचैतन्यकारुण्यकटाक्षवतां यत् सुख तत्कोठ्यंशलेशोऽपि ब्रह्मादिनां नास्तीति ध्वनितं ॥५॥

यत्कारुण्यवतारं मोक्षप्रभृतिर्नरकादिवत्।
भवेत्तं नौमि चैतन्यं करुणावारिधिं हरिं ॥५॥

जिन की करुणा दृष्टि रूप सम्पत्ति को पाकर सज्जनगण निर्वाण मुक्ति को नरक के समान, स्वर्ग को आकाश पुष्प के समान, अर्थात् मिथ्या विषय के समान, इन्द्रिय समूह को दन्तोत्पाटित काल सर्प के समान, जगत् को सुखमय एवं ब्रह्मादि को कीटतुल्य मानते हैं, उन करुणामय श्रीगौर हरि को हम सब स्तव करते हैं ॥५॥

माद्यन्तः परिपीय यस्य चरणाम्भोजस्रवत्प्रोज्ज्वल-
प्रेमानन्दमयामृताद्भुतरसान् सर्व्वे सुपर्व्वेड़िताः ।
ब्रह्मादींश्च हसन्ति नातिवहुमन्यन्ते महावैष्णवान्
धिक्कुर्व्वन्ति च ब्रह्मयोगविदुषन्तं गौरचन्द्रं नुमः ॥६॥

श्रीचैतन्यपादपद्ममधुमत्ताः प्रेमावेशेन तद्भक्तान् बिना सर्व्वानाक्षिपन्तीति दर्शयन् स्तौति । माद्यन्तः परिपीयेति । सर्व्वे यावन्तो गौरभक्ताः यस्य गौरचन्द्रस्य चरणाम्भोजस्रवत् प्रोज्ज्वलप्रेमानन्दमयामृताद्भूतरसान् परिपीय परिसर्व्वतोभावेन पीत्वा माद्यन्तः सन्तः कांश्चिद्धसन्ति कांश्चिन्न वहुमन्यन्ते कांश्चिद्धिक् कुर्व्वन्ति तं गौरचन्द्रं नुम इत्यन्वयः । यस्य चरणाम्भोजाभ्यां स्रवन्तः स्यन्दमानाश्च ते प्रोज्ज्वलश्चासौ प्रेमा चेति स प्रोज्ज्वलप्रेमा तस्माद्य आनन्दस्तन्मयास्तत्स्वरूपाश्चेति अत एवामृतादपाद्भूताश्चेति ते रसाश्चेति ते रसाश्चेति तान् ननु कान् हसन्ति तत्राह ब्रह्मादीन् । ही ही ब्रह्मादयश्चैतन्यपदारविन्दमकरन्दरसं नानुभवन्तीति तेषां ते हास्यास्पदं भवन्तीत्यर्थः । ननु कान्नातिवहुमन्यन्ते तत्राह महावैष्णवानिति । यद्यपि भगवदेकनिष्ठया भजनशीलत्वेन महान्तो वैष्णवास्तथापि । चैतन्यचरणाविन्दकृपामकरन्दानन्दाननुभावित्वान्नातिवहुमन्तव्या इत्यर्थः । कान् धिक् कुर्व्वन्ति तत्राह ब्रह्मयोगविदुष इति ब्रह्मणि घनीभूतपर ब्रह्मणोऽङ्गच्छटारूपे निराकारे योगो जीवात्मनो योजनं तं ये विदन्ति तान् यतस्ते भगवद्भजनसामान्यसुखानुभविनोऽतश्चैतन्यप्रेममत्तानां धिक्कारविषया इत्यर्थः । अतएव करुणरसे नारदशोकोक्तिः । विराजन्ते यस्य व्रजशिशुकुलस्तेयविकल स्वयम्भू चुड़ाग्रैर्ललितशिखराः पादनखराः । क्षणं यानालक्ष्यप्रकटपरमानन्दविवशः स देवर्षिर्मुक्तानपि मुनिगणान् शोचति भृशं ॥ सहदेवशोकोकोक्तिर्यथा करुणरसे । मातर्माद्रि गता कुतस्त्वमधुना हा क्वासि पाण्डो पितः सान्द्रानन्दसुखाब्धिरेष युवयोर्नासीद्दृशां गोचरः । इत्युच्चैर्नकुलानुजो विलपति प्रेक्ष्य प्रमोदाकुलो गोविन्दस्य पदारविन्द युगलप्रोद्दामकान्तिच्छटां । ननु तर्ह्येवम्भुताश्चैतन्यभक्ताः किमर-

रक्षोदैत्यकुलं हतं कियदिदं योगादिवर्त्मक्रिया
मार्गो वा प्रकटीकृतः कियदिदं सृष्ट्यादिकं वा कियत् ।
मेदिन्युद्धरणादिकं कियदिदं प्रेमोज्ज्वलाया महा-
भक्तेर्वर्त्मकरीं परं भगवतश्चैतन्यमूर्त्तिं स्तुमः ॥७॥

ज्ञानकरणशीलाः नेत्याह सुपर्व्वोड़िताः सुपर्व्वभिर्देवैरीड़िताः स्तुताः ये त्ववज्ञानकरणशीला भवन्ति तान् किं देवा स्तुवन्ति अपि तु निन्दन्ति ॥६॥

यत्पादाम्भोजमाध्वीकपानमत्ताः सुरादिकान् ।
अवजानन्ति तं नौमि गौरचन्द्रं प्रभुं हरिं ॥६॥

निगूढ़प्रेमोज्ज्वलभक्तिप्रकाशकत्वेन सर्व्वावतारः श्रैष्ठ्यं दर्शयन् स्तौति रक्षोदैत्यकुलं हतमित्यादि । भगवतश्चैतन्यमूर्त्तिं स्तुम इत्यन्वयं। वहुवचनं सशिष्याभिप्रायेण । ननु भगवतोऽन्यां मूर्त्तिं विहाय कथमिमं स्तौसि तत्राह प्रेमेत्यादि । प्रेमोज्ज्वलाया महा-भक्तेर्वर्त्मकरीं प्रेमा उज्ज्वलो यत्र सा प्रेमोज्ज्वला तस्याः । यद्वा । महाभक्तेर्महाभावस्य मार्गस्य प्रदर्शिकां किम्भूताया महाभक्तेः । प्रेमोज्जलायाः प्रेम्ना निरुपाहितसमर्थाया रतेः परिणामोज्ज्वलः श्रृङ्गाररसविषयालम्वनविषयसुखविशेषो यत्र तस्याः महाभक्तेर्वर्त्म

देववन्द्य गौर भक्तगण जिनके चरण पद्मसे क्षरित उज्ज्वल प्रेमानन्दमय अमृत रस रूप आश्चर्य्य रस पान से मत्त होकर ब्रह्मादि देव गण को ही ही ब्रह्मादयश्चैतन्य पदारविन्द मकरन्द रसं नानु भवन्ति " कहकर परिहास करते हैं, महत् वैष्णव गण को अर्थात् जो सव केवल भगवान् में एकनिष्ठ होकर उनका भजन करते हैं, किन्तु चैतन्य चरणारविन्द की कृपा मकरन्द रूप आनन्द का अनुभव नहीं करते हैं, वहुमान प्रदान नहीं करते हैं, एवं ब्रह्मवादि पण्डित गणकी, अर्थात् जो केवल धनीभूत परब्रह्म के अङ्ग च्छटा रूप निराकार में जीवात्मा को लीन करते हैं किन्तु चैतन्य के चरणार विन्द के मकरन्द रस का आस्वादन को नहीं जानते हैं, निन्दा करते हैं, उन श्रीचैतन्य चन्द्र को मैं प्रणाम करता हूँ ॥६॥

अथ प्रणामः ॥

नमश्चैतन्यचन्द्राय कोटिचन्द्राननत्विषे ।
प्रेमानन्दाब्धिचन्द्राय चारुचन्द्रांशुहासिने ॥८॥

करीं। प्रेम्न उज्ज्वलो यत्र सा प्रेमोज्ज्वला तस्या प्रकाशिकां। महती चासौ भक्तिश्चेति विग्रहः। भक्तेर्महत्त्वं शुद्धत्वेन। एवम्भूता भक्तिः केनाप्यवतारेण न प्रकटिता। राम नृसिंह-कृष्णादिभिः रक्षोदैत्यकुलं हतं विनाशितं यत्तत् कियत् न महत् कर्म्म कपिल-देवादिभिर्योगादिवर्त्मक्रियामार्गो वा प्रकटीकृतः स एष कियान्न किञ्चिदित्यर्थः। गुणावतार ब्रह्मादिना कृतं सृष्ट्यादिकमपि कियत् श्रीवराहादिना कृतं मेदिन्युद्धरणादिकं वा कियत् किं कर्म्म तादृश-भक्तिप्रचारकत्वेन सर्वावतारेभ्यः श्रेष्ठोऽयमवतार इति सूचितं ॥७॥

अतिगूढ़ोज्ज्वला भक्तिः कलौ येन प्रकाशिता ।
अवतारवरं नौमि तं गौरहरिमीश्वरं ॥७॥

॥*॥ इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां टीकायां स्तुति-प्रकरणं प्रथमो विभागः ॥*॥

प्रणमति पञ्चश्लोक्या अथ प्रणाम इत्यादि। तत्र प्रथमं जन सामान्यहृदया ज्ञानादितमोनाशकत्वेन प्रेमानन्दप्रकाशकत्वेन चाद्भुत चन्द्रत्वमनुभूय प्रणमति नमश्चैतन्यचन्द्रायेत्यादिभिः। चैतन्य एव चन्द्रश्चैतन्यचन्द्रस्तस्मै नमस्तं प्रणमामीत्यर्थः। किम्भूताय कोटि-चन्द्राननत्विषे कोटिसंख्यागणिताश्चन्द्राः तेभ्योप्याननस्य मुखस्य

राम नृसिंह कृष्णादि मूर्त्ति से दैत्य एवं राक्षस कुलके विनाश करना क्या महत् कार्य्य है? कपिलादि मूर्त्ति के द्वारा योगादि मार्ग का पथ प्रदर्शन करना ही क्या महत् कार्य्य है? गुणावतार ब्रह्मादिमूर्त्ति के द्वारा सृष्ट्यादि क्रिया ही क्या महत् कार्य्य है? एवं वराहादि मूर्त्ति के द्वारा पृथिवी का उद्धार करना ही क्या महत् कार्य्य है? कलियुग में परम प्रेमोज्ज्वल महाभक्ति का मार्ग प्रदर्शक भगवान् चैतन्य स्वरूप की स्तुति हमसव करते हैं॥७॥

यस्यैव पादाम्वुजभक्तिलभ्यः प्रेमाभिधानः परमः पुमर्थः।
तस्मै जगन्मङ्गलमङ्गलाय चैतन्यचन्द्राय नमोनमस्ते ॥९॥
उच्चैरास्फालयन्तं करचरणमहो हेमदण्डप्रकाण्डो
वाहू प्रोद्धृत्य सत्ताण्डवतरलतनुं पुण्डरीकायताक्षं।

त्विट् कान्तिर्यस्य तस्मै। पुनः किम्भुताय प्रेमानन्दाव्धिचन्द्राय प्रेम्नो जात-आनन्दः स एवाब्धिः समुद्रस्तस्य चन्द्रस्तस्मै। पुनः कीदृशाय चारुर्मनोहरश्चन्द्रांशुभ्यः शशिकिरणेभ्यो रासो यस्यास्ति तस्मै। तन्मुखचन्द्रैकदेशहास्यलेशमात्र प्रदर्शनेन प्रेमामृतप्लुतो भवति किं पुनः सर्व्वावयवदर्शनेनेति कैमुत्यं ध्वनितं। अनुष्टुप् छन्दस्तेन पद्यं कृतं ॥८॥

श्रीकृष्णचैतन्यचन्द्रभक्तस्यैव परमपुरुषार्थप्रेमलाभ इति प्रकटयन्नमस्करोति यस्यैवेत्यादि तस्मै चैतन्याय तुभ्यं नमः। कस्मै प्रेमाभिधानः प्रेमनामा परम उत्कृष्टः पुरुषार्थो यस्य चैतन्यस्यैव पदाम्वुज-भक्तिलभ्यस्तस्मै। यस्यैवेत्येव शब्दोऽवधारणार्थः कलियुगोपास्य भगवत् श्रीकृष्णचैतन्यपादाम्वुजभजनेनैव परमपुरुषार्थप्रेमा भवति नान्यैवेत्यवधारणं अतएवाह जगन्मङ्गलेति जगतां मङ्गलं श्रीकृष्ण-भजनं ततोऽपि मङ्गलं परमपुरुषार्थप्रेमलाभो यस्मात्तस्मै। चन्द्र-रूपकत्वेन हृदयान्धकारनाशपूर्व्वकस्वप्रेमामृतस्वादकत्वं सूचितं ॥९॥

स्तुति प्रकरण नामक प्रथम विभाग। सात श्लोकों के द्वारा स्तुति प्रकरण को कहने के पश्चात् पञ्चश्लोकों के द्वारा प्रणाम प्रकरण को कहते हैं। जिनके मुख सौन्दर्य्य,-कोटिचन्द्र की अपेक्षा भी सुदृश्य है, जो प्रेम जात आनन्द समुद्र का चन्द्र स्वरूप है, जिनका हास्य चन्द्रकिरण के समान मनोहर है, मैं उन श्रीचैतन्य चन्द्र को प्रणाम करता हूँ ॥८॥

जिनके पाद पद्म में भक्ति होने से प्रेमनामक उत्कृष्ट पुरुषार्थ का लाभ होता है, जगत् मङ्गल के मङ्गल स्वरूप चैतन्य चन्द्र को नमस्कार करता हूँ ॥९॥

विश्वस्यामङ्गलघ्नं किमपि हरिहरीत्युन्मदानन्दनादै-
र्वन्दे तं देवचूड़ामणिमतुलरसाविष्टचैतन्यचन्द्रं ।१०॥
आनन्दलीलामयविग्रहाय हेमाभदिव्यच्छविसुन्दराय ।
तस्मै महाप्रेमरसप्रदाय चैतन्यचन्द्राय नमोनमस्ते ॥११॥

निजरसाविष्टचित्तस्य चैतन्यस्यानुभावं दर्शयन् तं नमति उच्चैरास्फालयन्तमित्यादि । अतुलरसाविष्टचैतन्यचन्द्रं वन्देऽहं प्रणमामि नास्ति तुला सादृश्यं यस्य सोऽतुल: अतुलश्चासौ रसश्चेति अतुलरस: श्रीराधिकाश्रय श्रीकृष्णरूप स्वविषयकपरमनिगूढ़शुचि-रसस्तस्मिन्नाविष्ट: प्रमग्नाश्चासौ चैतन्यचन्द्रश्चेति तं किम्भुतं देव-चूड़ामणिं दिव्यन्ति स्वेच्छया भक्तार्थं वा क्रीड़न्ति लीलां कुर्व्वन्तीति देवा अवतारास्तेषां चूड़ामणिं । आपामरप्रेमदातृत्वेन सर्व्वावतार-श्रेष्ठ मित्यर्थ: । पुन: कीदृशं अहो आश्चर्य्यं करौ च चरणौ च तेषां समाहारं करचरणं तदुच्चैरास्फालयं नृत्यावेशेन इतस्ततश्चालयन्तं । पुन: किम्भूतं बाहू प्रोद्धृत्य ऊद्ध्वींकृत्य सता सुमधुरेण ताण्डवेन नृत्येन तरला चञ्चला तनु: श्रीविग्रहो यस्य तं । बाहू किम्भूतौ हेमदण्डयोरिव प्रकाण्डौ दीर्घहेमार्गल युगलप्रायावित्यर्थ: । पुन: कीदृशं पुण्डरीकायताक्षं पुण्डरीके इव आयते विस्तृते अक्षिणी यस्य तं । पुन: कीदृशं किमपि हरिहरीत्युन्मदानन्दनादैर्विश्वस्य जगतो-ऽमङ्गलं हन्तीति तं । अत्रापि चन्द्ररूपकत्वेनाह्लादजनकत्वं ज्ञापितं १०

उद्धृत्य वाहुयुगलं नृत्यन्तं करचालनै: ।
हरिहरीति तैर्विश्वाशुभघ्नं गौरमानमम् ॥१०॥

जो नृत्यावेश से कर चरण के परिचालन इतस्तत: करते रहते हैं, जो हेम दण्ड के समान प्रकाण्ड बाहुद्वय को उत्तोलन कर मधुर नृत्य द्वारा निज शरीर को चञ्चल करते रहते हैं, जिन के नयन द्वय पद्म के समान विशाल है, जो भगवत् चिन्तन के द्वारा एवं ' हरि हरि " आनन्द कर ध्वनि के द्वारा जगत् के अमङ्गल को नाश करते हैं, उन देव चूड़ामणि अतुल रसाविष्ट चैतन्य चन्द्रकी वन्दना मैं करता हूँ ॥१०॥

प्रवाहैरश्रूणां नवजलदकोटी इव दृशौ
दधानं प्रेमद्धर्या परमपदकोटीप्रहसनं ।
वमन्तं माधुर्य्यैरमृतनिधिकोटीरिव तनु-
च्छटाभिस्तं वन्दे हरिमहह सन्न्यासकपटं ।।१२।।

इदानीमानन्दादिमयविग्रहत्वेन सौन्दर्य्याधिक्यात् स्वविषयक महाप्रेमदातृत्वं प्रकटयन् वीप्सया नमस्करोति आनन्दलीलामयेत्यादि तस्मै प्रसिद्धाय ते तुभ्यं चैतन्याय नमो नमः अस्त्विति शेषः। किम्भूताय आनन्दस्वरूपो लीला प्रचुरो विग्रहो यस्य तस्मै। हेमाभा काञ्चनसदृशी दिव्या छविस्तया सुन्दरो मनोहरस्तस्मै। पुनः किम्भूताय महांश्चासौ प्रेमा चेति स तस्य रसस्तं प्रददाति यत्तस्मै। चन्द्ररूपकत्वेन प्रेमामृतं ध्वनितं। आनन्देति अमृतमयविग्रहत्वं हेमाभेति तमोनाशकत्वं अद्भुतत्वञ्च ।।११।।

तप्तकाञ्चनगौराङ्गमानन्दरसविग्रहं।
निगूढ़प्रेमदं श्रीमच्चैतन्यं प्रणमाम्यहं ।।११।।

परमचमत्कारकार्य्यवस्थात्वेन प्रणाममुपसंहरति प्रवाहैरित्यादि तं हरिं वन्दे अहह इत्याश्चर्य्ये। किम्भूतं सन्न्यासः कपटो व्याजो यस्य तं सन्न्यासच्छलेन सर्व्वेषां वन्दनविषयमित्यर्थः। पुनः किम्भूतं अश्रूणां नेत्रजलानां प्रवाहैः स्रोतो धाराभिर्नवजलदाकाराविव दृशौ दधानं। पुनः किम्भूतं प्रेमद्धर्या प्रेमसम्पत्त्या परमपदानां वैकुण्ठादीनां कोटीनां प्रहसनमवज्ञा यस्मात्तम्। तनुच्छटाभिः श्रीविग्रहलावण्यै-र्माधुर्य्यैर्वा अमृतानां निधयः समुद्रास्तेषां कोटीर्वमन्तमुद्गिरन्तं ।।१२

प्रेमधिक्कृतवैकुण्ठमश्रुपूरगलद्दृशं
तनुतोत्थसुधाम्भोधिं यतीन्द्रं प्रणमाम्यहं ।१२।।

जो आनन्द लीलामय लीलाविग्रह धारी, सुवर्ण सदृश उत्कृष्ट कान्ति के द्वारा मनोहर हैं, उन महाप्रेम रस प्रदान कारी श्रीचैतन्य-चन्द्र को नमस्कार करता हूँ ।।११।।

अहो! जिन्होंने अश्रुधारा के द्वारा नव जलधर के सदृश नयन युगल को प्रकट किया, है जो प्रेम सम्पत्ति के द्वारा कोटि

अथार्शीर्व्वादः ॥

सिंहस्कन्धं मधुरमधुरस्मेरगण्डस्थलान्तं
दुर्विज्ञेयोज्ज्वलरसमयाश्चर्य्यनानाविकारं ।
बिभ्रत् कान्ति विकचकनकाम्भोजगर्भाभिरामा
मेकीभूतं वपुरवतु वो राधया माधवस्य ॥१३॥

॥*॥ इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां टीकायां
प्रणामप्रकरणं द्वितीयो विभागः ॥*॥

श्रीकृष्णचैतन्यमहाप्रभुरेवोपास्य इति दर्शयन् तत्कर्त्तृकरक्षादि प्रयोगेनाशिषः प्रयुज्यन्ते पञ्चश्लोक्या। तत्र तस्य यथार्थस्वरूप-सिद्धान्तमाह सिंहस्कन्धमित्यादि। माधवस्य राधया सह एकीभूतं वपुः श्रीविग्रहः वो युष्मान् अवतु। संसारविषयविषानलदग्धान् चमत्कारकारि निजरूपमाधुर्य्यामृतास्वादनया स्निग्धान् करोतु मधुरांशाविर्भूतत्वात् माधवस्तस्य किम्भूतं वपुः सिंहस्कन्धं सिंहस्य स्कन्धः ग्रीवा इव स्कन्धौ ग्रीवा यस्य तत्। पुनः किम्भूतं मधुरेत्यादि मधुरादपि मधुरौ स्मेरौ ईषद्धसनेन विकसितौ गण्डस्थलयोरन्तौ प्रान्तौ यस्य तत्। पुनः कीदृशं दुर्व्विज्ञेयेत्यादि। दुर्व्विज्ञेयो भगवदुपासकैरपि दुर्व्वितर्क्यो य उज्ज्वलरसस्तन्मयाश्चर्य्याः परम-चमत्कारकारिणो नाना विविधा बिकारा यत्र तत्। कान्ति बिभ्रत् कान्ति किम्भूतां विकचकनकाम्भोजगर्भाभिरामां विकचं विकसितञ्च तत् कनकाम्भोजञ्चेति तस्य गर्भात् किञ्जल्कादपि अभिरामां मनोरमां राधामाधवयोरेकीभूतत्वे कारणकथास्ति तद्यथा कदाचित् कृष्णो रहसि स्वगतं वदति श्रीराधायाः प्रणयमहिमा कीदृशो येन प्रणयमहिम्ना अनया राधया ममाद्भुतमाधुर्य्य-मास्वाद्यते ममैव माधुर्य्यं कीदृक् यदास्वाद्यते राधिका वा कीदृक् सुखमनुभवतीति वाञ्छात्रयं। यत्नेनापि यदि न सिद्धं तर्हि वुद्धं आश्रयीभूतराधागत प्रणयमहिम-माधुर्य्यादिसुखानि प्रणयादिविषयेन माधुर्य्यानुभवितुमम-न्यत प्रकाशभेदेन प्रकाशभिन्नं राधिकास्वरूपमात्मन्येकीकृत्यावतीर्य्य स्वयं तदास्वाद्य तदुभयभजनपरिपाटीं दर्शयिष्यामीति तथाभवत् एवं

दृष्ट्वा माद्यति नूतनाम्बुदचयं संवीक्ष्य वर्हं भवे-
दत्यन्तं विकलो विलोक्य वलितां गुञ्जावलीं वेपते ।

तस्मिन् समये श्रीराधिकापादमीहितवती मत्प्राणनाथः श्यामसुन्दरो मद्विरहेण कीदृक् भवतीति ज्ञिप्सामीति किन्तु तत्स्वरूपं विना मद-भीष्टं न सिद्ध्यतीति तत्स्वरूपा भविष्यामीति तच्चिन्तन समयकाल एव कृष्ण आत्मानं तस्यामावेश्यतामात्मन्यावेश्यैकीभूतः अतो राधा कृष्ण द्वितीयत्वेनान्तःकृष्णो वहिर्गौर इति । अतएव कृष्णत्वेन राधे राधे इत्यादि वदति राधिकात्वेन कृष्णकृष्णेति वदति । एवं महामन्त्र-प्रचारेऽप्येष क्रमः कृष्णावेशाद्धरे राधावेशात् कृष्ण इति कीर्त्तयति हरेकृष्ण हरेकृष्ण इति यदैव राधावेशात् कृष्णकृष्णेति वीप्सा तदेव कृष्णावेशात् हरे हरे इति वोप्सा निगूढ़प्रेमविलासचातुर्य्येण कृष्ण-मनोहरतीति हरा राधा एवं परार्द्धेऽपि ज्ञातव्यमिति ॥१३॥

कनकाम्भोजगर्भाभं राधामाधवयोर्वपुः ।
एकं वः पातु हर्य्यक्षग्रीवं शुचिविकारकं ॥१३॥

उद्दीपनदर्शनेन सात्त्विकव्यभिचारिभावाविष्टत्वेनप्रेमप्रचार-कत्वं दर्शयन्नाशिषं प्रयुङ्क्ते । दृष्ट्वा माद्यतीत्यादि । हरिः परमे-श्वरो वो युष्मान् पातु निजपादपद्मप्रणयरसामृतदानेन कुविषयपरान् जीवयतु । कुविषयहरणपूर्व्वकस्वपदविषयमनोहरणशीलत्वाद्धरिः

वैकुण्ड की अवज्ञा करते हैं, एवं जो श्रीमूर्त्ति के लावण्य,–माधुर्य्य के द्वारा जैसे कोटि समुद्र को प्रकाश करते रहते हैं, मैं उन कपट सन्नयास ग्राही गौरहरि की वन्दना करता हूँ ॥१२॥

प्रणाम नामक द्वितीय विभाग ।

अथाशीर्वादः

जिन के स्कन्ध देश सिंह के स्कन्ध के समान है, कपोल के प्रान्तभाग मधुर मधुर हास्य समन्वित है, जो लोकोत्तर मधुर रस–मय वहुविध आश्चर्य विकार विशिष्ट है, एवं प्रफुल्ल कनक कमल के केशर से भी मनोहर कान्ति धारी है, उन श्रींराधा माधव के एकी भूत विग्रह विशिष्ट श्रीगौर हरि आप सव की रक्षा करें ॥१३॥

दृष्टे श्यामकिशोरकेऽपि चकितं धत्ते चमत्कारिता-
मित्थं गौरतनुः प्रचारितनिजप्रेमा हरिः पातुः वः ॥१४॥
कृपासिन्धुः सन्ध्यारुणरुचिविचिताम्वरधरो
ज्ज्वलः पूर्णः प्रेमामृतमयमहाज्योतिरमलः ।

किम्भूतः गौरतनुः गौरो तनुर्यस्य पुनः कीदृक् इत्थमनेन प्रकारेण प्रचारितनिजप्रेमा । प्रचारितः सर्व्वत्र प्रकाशितः स्वविषयः प्रेमा येन सः । केन प्रकारेण इत्यपेक्षायां प्रकारमाह दृष्ट्वेत्यादि नवीन-मेघसमूहं दृष्ट्वा माद्यति मदविशिष्टो मत्तो भवतीत्यर्थः । मदो व्यभि-चारिभावः तल्लक्षणन्तु विवेकहर उल्लासो मदः स द्विविधो मतः । मधुपानभवोऽनङ्गविक्रियाभावजो मत इति । अत्र त्वनङ्गजन्यो-ऽनङ्गस्त्वत्र प्रेमा गोपीस्वरूपाङ्गीकारात् । तथाहि प्रेमैव गोपरामाणां काम इत्यगमत् प्रथामिति । मयूरचन्द्रिकां वीक्ष्य चात्यन्तं विकलो भवेत् । वैकल्यमधैर्य्यंकातर्य्यादि तद्वानित्यर्थः । वलितां वलयाकारां गुञ्जालीं विलोक्य वेपते कम्पते । कम्पः सात्त्विकभावः । श्याम-किशोरे पुरुषे दृष्टे सति चकितं यथा स्यात् तथा चमत्कारितां धत्ते सदृशेक्षया श्रीकृष्णस्मरणेन परमचमत्कारवान् भवतीत्यर्थः । स्मृतिर्व्यभिचारिभावः ॥१४॥

भावोद्दीपनमेघादिदृष्ट्वानुभावान् हरिः ।
गौरं प्रचारितप्रेमा पातु वः कम्पदेहकः ॥१४॥

चन्द्ररूपकत्वेन प्रेमामृतविस्तारकत्वे हृदयान्धकारनाशकत्वादि प्रतिपादयन्नाशीः प्रयुज्यते कृपासिन्धुरित्यादि । कलानाथः गौरचन्द्र-स्तव स्वान्तर्नभसि हृदयाकाशे उदयतु उदितो भवितु तत्रोदयं कृत्वा

जो नवीन मेघसमूह को अवलोकन कर मत्त होते हैं, मधुर चन्द्रिका को देखकर अतिशय व्याकुल होते हैं, गुञ्जावली के दर्शन से अङ्ग समूह कम्पित होते हैं, एवं श्यामकिशोर पुरुष को देख कर चकित हो जाते हैं, इस प्रकार निजप्रेम प्रचार श्रीगौरहरि आप सब की रक्षा करें ॥१४॥

शचीगर्भक्षीराम्वुधिभव उदाराद्भुतकलः
कलानाथः श्रीमानुदयतु तव स्वान्त र्नभसि ॥१५॥
वध्नन् प्रेमभरप्रकम्पितकरो ग्रन्थीन् कटीडोरकैः ।
संख्यातुं निजलोकमङ्गलहरेकृष्णेति नाम्नां जपन् ।

ऽज्ञानतमोनाशपूर्व्वक प्रेमावृतेन शीतलीकरोतु । कलानाथश्चन्द्रः पक्षे कला अवतारा मत्स्याद्यवतारास्तेषां नाथ ईश्वरः तदवतारी स्वयं भगवानित्यर्थः । किम्भूतः शचीगर्भ एवाम्वुधिस्तत्र भवः प्राकट्यं यस्य अन्योऽपि चन्द्रः क्षीराम्वुधिभवः । पुनः किम्भूतः उदारा मनोहरा अद्भुता आश्चर्य्याः कला अवतारा वैदग्ध्यसृष्टि-प्रक्रियाद्याश्च यस्य सः । पुनः कीदृक् श्रीमान् श्रीः परमशोभावती राधा तया सहैकीभूतत्वात्तद्वानित्यर्थः । पक्षे शोभावान् । पुनः कीदृशः कृपायां समुद्रः अतिशयोक्त्यात्यन्तपतितापराधि नीचातिनीचव्रातेषु कारुण्यवानित्यर्थः । पुनः कीदृशः सन्ध्याया इव अरुणया रुच्या कान्त्या विचित्रे ये अम्वरे वस्त्रे ते धृतवान् तद्धरश्चासावुज्ज्वलश्चेति स पुनः कीदृशः पूर्णः स्वयं भगवान् पक्षे राकाविधुः । पुनः कथम्भूतः प्रेमैवामृतं तन्मयानि यानि महाज्योतींषि सात्विकादिभावद्युतयः तैरमलः कलङ्करहितः । यद्वा । न मलो दुर्व्वासनादिर्यस्मात् सः एतेनाद्भुतचन्द्रत्वमायातं । चन्द्रस्य कलङ्कवत्त्वात् अन्तःकरण-कलुषदुरीकृतत्वाभावाच्च ॥१५॥

श्रीगौरविधुररुणविचित्राम्वरशोभितः ।
प्रेमामृतं स्वान्त र्नभ उदियाद्वः स्वयं हरिः ॥१५॥

हरिनाम महामन्त्रः संख्यया जप्य इति शिक्षया जप समकालोदित सात्त्विकभावस्य जगन्नाथदर्शनेच्छोर्भिगवतः स्वरूपं वर्णयन्नाशिषं करोति । वध्नन् प्रेम् भरेत्यादि । गौरतनुर्हरिर्वो युष्मान् पातु

जो कृपासमुद्र, सन्ध्या के समान अरुण वर्ण के विचित्र वसनधारी तेजोमय देह, स्वयं ईश्वर व प्रेमसुधास्वरूप, महत् दीप्ति द्वारा परि-शुद्ध हैं, एवं शचीगर्भ रूप सीरसागर जात कलानाथ श्रीगौरचन्द्र आप सव के हृदयाकाश में उदित होवे ॥१५॥

अश्रुस्नातमुखः स्वमेव हि जगन्नाथं दिदृक्षुर्गता-
यातैर्गौरतनुर्विलोचनमुदं तन्वन् हरिः पातुः वः ॥१६॥
अन्तर्ध्वान्तचयं समस्तजगतामुन्मूलयन्ती हठात्
प्रेमानन्दरसाम्बुधिं निरवधिप्रोद्वेलयन्ती वलात् ।

स्वचरणारविन्दविषयकप्रेम्ना रक्षतु। किं कुर्व्वन् विशिष्टानां लोचनानां मुदमानन्दं विस्तारयन्। पुनः किं कुर्व्वन् प्रेमभरप्रकम्पितकरः सन् निजलोकमङ्गल-हरेकृष्णेति नाम्नां संख्यातु कटीस्थितडोरकैः ग्रन्थीन् वध्नन् हरेकृष्णेति नामानि जपन् प्रेमातिशयेन प्रकृष्टं कम्पितौ करौ यस्य सः। लोकानां मङ्गलं येभ्यस्तानि निजानि च तानि चेति पुनः किम्भूतः अश्रुभिर्निजप्रेमप्रसूतनेत्रजलैः स्नातं मुखं यस्या कैः करणैर्विलोचनमुदं तन्वन् जगन्नाथं दिदृक्षुर्गतायातैर्गमनागमनैः। जगन्नाथं किम्भूतं स्वमेवात्मानमेव हि निश्चितं ॥१६॥

उत्कीर्त्तितमहामन्त्रो गौरोऽश्रुस्नपिताननः।
स्वप्रकाश जगन्नाथं दिदृक्षुः पातु वः सदा ॥१६॥

पुनश्चन्द्ररूपकत्वेन तत् श्रीविग्रहदीप्तिच्छटाचमत्कारं दर्शयन्नाशिषं प्रयुङ्क्ते। अन्तर्ध्वान्तचयं समस्तजगतामित्यादि। चैतन्य एव चन्द्रस्तस्य च्छटाचिक्कणदेहकान्त्युज्ज्वलता युष्माकं हृदये सततं चकास्तु प्रकाशतां। कथम्भूता समस्तजगता मन्तर्ध्वान्तचयं तेषां

जो निखिल लोकों के मङ्गल कारक स्वीय हरे कृष्ण नाम जप की संख्या के हेतु प्रेमाधिक्य से कम्पित कर द्वारा कटीस्थित डोर में ग्रन्थि वन्धन कर जप करते हैं, प्रेम प्रसूत नेत्र जल से सिक्त मुख होकर जगन्नाथरूप स्वयं को दर्शन करने के लिए गमनागमन द्वारा विशिष्ट जन वृन्दों के लोचनानन्द का विस्तार कर रहे हैं, उन श्रीगौर मूर्त्तिधारी हरि आप सव की रक्षा करें ॥१६॥

सहसा समस्त जगत् के अन्तर्गत अन्धकार उन्मूलन कारिणी वल पूर्वक प्रेमानन्द समुद्र की वृद्धि कारिणी, एवं तापत्रय से अति विकल जगत् को शीतल कारिणी श्रीचैतन्य चन्द्र की अङ्ग, कान्ति,

विश्वं शीतलयन्त्यतीवविकलं तापत्रयेणानिशं
युष्माकं हृदये चकास्तु सततं चैतन्यचन्द्रच्छटा ॥१७॥

अथ श्रीचैतन्यभक्तमहिमा ।

भ्रान्तं यत्र मुनीश्वरैरपि पुरा यस्मिन् क्षमामण्डले
कस्यापि प्रविवेश नैव धिषणा यद्वेद नो वा शुनः ।

हृदिस्थिताज्ञानापराधकोठ्यादितमः समूहं हठाद्बलात्कारोन्मूलयन्ती समूलं विद्रावयन्ती । पुनः कीदृशी प्रेमहेतुको य आनन्दरसः स एनाम्वुधिस्तं वलान्निरवधि यथा स्यात्तथा प्रोद्वेलयन्ती प्रकर्षेण वद्‌ध्र्वयन्ती । पुनः कीदृशी तापत्रयेणानिशं निरन्तरमतीवविकलं क्षोभितं विश्वं शीतलयन्ती अर्थात् प्रेमामृतप्रचारेण स्निग्धयन्तीत्यर्थः चन्द्रस्यापि तमोनाशकत्वाम्वुधिवर्द्धकत्व शीतलीकरत्वादिना चन्द्ररूपकत्वमिति ॥१७॥

अन्तकलुषहन्ता च स्वप्रेमाम्वुधिवर्द्धनः ।
विश्वं शीतलयन्तं तं गौरचन्द्रश्चकास्तु वः ॥१७॥

॥*॥ इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां टीकायां
आशिषः प्रकरणे तृतीयो विभागः ॥*॥

श्रीकृष्णचैतन्यभक्तमहिमानं वक्तुमुपक्रमते । अथ चैतन्यभक्तमहिमेति । तत्र व्रजराजकिशोरस्य व्रजकिशोरीभिः सह निगूढ़ोज्जललीलारसास्वादनं गौरभक्तानामेव नान्येषामित्याह । भ्रान्तं यत्र मुनीश्वरैरित्यादि । तस्मिन् मधुररसभक्तिमार्गे गौराङ्गप्रियाः सुखं यथा स्यात्तथा खेलन्ति विहरन्ति । यत्र तादृशभक्तिमार्गे

आप सब के हृदय में सर्वदा प्रकाशित होवे ॥१७॥

आशीर्वाद—तृतीय विभागः

अथ श्रीचैतन्य भक्त महिमा–

जिस मधुर भक्ति पथ के वर्णन में श्रीव्यास प्रभृति मुनीन्द्र गण की मति चञ्चल हो जाती है, जिस में इस के पहले पृथिवी में किसी की वुद्धि प्रविष्ट नहीं हुई है, जिस का परिज्ञान श्रीशुक देव

यत्र क्वापि कृपामयेन च निजेष्युद्घाटितं शौरिणा
तस्मिन्नुज्ज्वलभक्तिवर्त्मनि सुखं खेलन्ति गौरप्रियाः ॥१८॥
तावद्ब्रह्मकथा विमुक्तिपदवी तावन्न तिक्ती भवे
तावच्चापि विशृङ्खलत्वमयते नो लोकवेदस्थितिः ।
तावच्छास्त्रविदां मिथः कलकलो नानावहिर्व्वर्त्मसु
श्रीचैतन्यपदाम्वुजप्रियजनो यावन्न दृग्गोचरः ॥१९॥

मुनीश्वरैर्व्यासादिभिभ्रान्तं तस्मिन् वर्त्मनि तेषामपि सुष्ठु परिचयो नास्तीत्यर्थः । पुरा पूर्व्वस्मिन् काले गौराङ्गावतारात् प्रागित्यर्थः । यस्मिन् मार्गे पृथिवीमण्डले कस्यापि धिषणा वुद्धिर्नैव प्रविवेश अन्यस्य का कथा । श्रीशुकदेवोऽपि यद्वर्त्म नो वेद जानाति न वा सतु जानात्येव ज्ञात्वापि न प्रकटीकृतमित्यर्थः । यद्वर्त्म शौरिणा श्रीकृष्णेन कृपामयेन यत क्वापि निजभक्तेऽपि नोद्घाटितं न प्रकाशितं । अतएव रागानुगां विशेष कामानुगां भक्तिपरिपाटीं गौरभक्ता एव जानन्ति नान्ये इत्यर्थः ॥१८॥

नाप्रकाशि रसो योऽत्र मुनिभिः शौरिणापि च ।
गौरभक्ताः सुखं तत्र खेलन्त्युज्ज्वलभक्तिके ॥१८॥

निगूढ़भगवत्तत्त्वं गौरभक्तसङ्गं विना न जानन्तीत्याह तावद् ब्रह्मकथेत्यादि । यावत् श्रीचैतन्यपदाम्वुजयोः प्रियजनो भक्तजनो दृग्गोचरो दृग्विषयो न भवेत् । तावद्ब्रह्मकथा निष्कर्म्मक-निर्व्विशेष ब्रह्मविचारः । तावच्च विमुक्तिपदवी परमात्म विषयकजीवात्मनोलय-मार्गस्तावन्न तिक्ती भवेत् । लोकश्च वेदश्च तयोः स्थितिमर्य्यादा लोकमर्य्यादा वेदमर्य्यादा च तच्च नो विशृङ्खलत्वमयते तत्तन्म-

---

जी का भी नहीं था, एवं जिसका प्रकाश कृपामय श्रीकृष्ण चन्द्र ने भी निज भक्त के निकट नहीं किया है, सम्प्रति उस भक्ति रस में श्री-गौर भक्त गण सुख पूर्वक क्रीड़ा कर रहे हैं ॥१८॥

जव तक श्रीचैतन्य चरण कमल के प्रिय भक्तजन का दर्शन नहीं होता है, तवतक ब्रह्म विचार व मुक्ति मार्ग कटु नहीं लगता

क्व तावद्वैराग्यं क्वच विषयावार्त्तासु नरके-
ष्विवोद्वेगः क्वासौ विनयभरमापूर्य्यलहरी ।
क्व तावत्तेजो वा लौकिकमथ महाभक्तिपदवी
क्व सा वा संभाव्या यदवकलितं गौरगतिषु ॥२०॥

र्य्यादातिक्रमं न प्राप्नोति चैतन्यभक्तसङ्गेन निगूढ़भक्तितत्त्वज्ञान-प्रेमादिवैशिष्ट्यात् सर्व्वमतिक्रान्तं भवतीत्यर्थः। तावच्च शास्त्रविदां वेदान्तादिशास्त्रविदुषां मिथः परस्परं कलकलः अतिशयकलहः नाना-वहिर्वर्त्मसु स्वेषु स्वेषु वहिरङ्गमार्गेषु पतितानामित्यर्थः। चैतन्य-भक्तानां शुद्धनिगूढ़भक्तिमार्गस्त्वन्तरङ्ग एव ॥१६॥

सङ्गः श्रीगौरभक्तानां यावन्न स्यात् कलौ युगे ।
तावद्ब्रह्मविचारादि तावच्छास्त्रविदां कलिः ॥१६॥

श्रीचैतन्यभक्तेषु परमचमत्कारकारिभावमनुभूय महिमान-मुन्नयति। क्व तावद्वैराग्यमित्यादि। गौरः गौरहरिरेव गतिः शरणं प्राप्यो वा येषां तेषु यद्वैराग्यं अवकलितमनुभूतं तावद्वैराग्यं क्व कुत्रापि नास्तीत्यर्थः। वैराग्यमत्र भगवदनुरक्तता। विशिष्टे श्री-कृष्णे रागो मनोलग्नता यस्य विरागस्तस्य भावो वैराग्यं श्रीकृष्णानु रक्तता। विषयवार्त्तासु नरकेष्विव गौरभक्तानां यादृगुद्वेगः स्यात्ता-दृगन्येषु क्व कुत्रापि नेत्यर्थः। गौरभक्तेषु यादृङ्नम्रतातिशयस्य लहरी तरङ्गोऽन्यत्र क्वापि नास्तीत्यर्थः। गौरभक्तेषु यादृगलौकिकं

लोक मर्य्यादा, वेद मर्य्यादा का बोध सुश्रृङ्खल रूप से होता है, एवं तवतक ही वहिरङ्ग मार्गरत वेदान्तादि शास्त्रज्ञों में परस्पर कलह होने की सम्भावना भी रहती है ॥१६॥

श्रीगौराङ्ग देव के चरणारविन्द में एकान्त भक्ति परायण व्यक्तियों में जिस प्रकार विषय वैराग्य दृष्ट होता है, उस प्रकार विषय वैराग्य कहाँ है? उस प्रकार विषय वार्त्ता रूप नरक के प्रति अवज्ञा भी कहाँ है? उस प्रकार विनय तथा नम्रता की तरङ्ग भी कहाँ है? उस प्रकार अलौकिक प्रभाव भी कहाँ है? और उस प्रकार महा भक्ति पथ भी कहाँ सम्भव है? ॥२०॥

सकृन्नयनगोचरीकृत-तदश्रुधाराकुल-
प्रफुल्लकमलेक्षण प्रणयकातरश्रीमुखः ।
न गौरचरणं जिहासति कदापि लोकोत्तर-
स्फुरन्मधुरिमार्णवं नवनवानुरागोन्मदः ॥२१॥

तेजः प्रभावस्तादृक् क्वापि नास्ति । अथानन्तरं गौरगतिषु यादृशी महाभक्तिपद्धतिरवकलिता सा क्व संभाव्या अपि तु न कुत्रापि। अतएव श्रीगौरहरिप्रियजनपादपद्मसेवनेनैवैतत्सर्व्वमनायासेन मिलतीत्यर्थः ॥२०॥

वैराग्यादिगुणे यादृग् गौरभक्तेषु दृश्यते ।
तादृशो गुणलेशोऽपि क्वाप्यन्यत्र न दृश्यते ॥२०॥

श्रीगौरचरणभक्तस्य तच्चरणं विनान्यत्र रतिर्नास्तीत्यस्य महिमानं प्रकटयति । सकृन्नयनगोचरीकृत-तदश्रुधारेत्यादि । एवम्विधोभक्तः कदापि कथञ्चिदपि गौरचरणं न जिहासति त्यक्तुमिच्छति सर्व्वदैव तद्धयानलग्नोऽस्तीत्यर्थः। स एव कस्तत्राह। सकृन्नयनगोचरीकृत तदश्रुधाराकुल प्रफुल्लकमलेक्षणप्रणयकातर श्रीमुखः। प्रणयेन कातरं विकलं प्रणयकातरं श्रीः परमशोभा तद्-युक्तं मुखं प्रणयकातरश्च तत् श्रीमुखञ्चेति तत् अश्रुधाराभिराकुले प्रफुल्ले कमले इव ईक्षणे यत्र तादृश मुखे तत् । तच्च तत् तादृशमुखश्चेति तत् सकृदेकवारं नयनाभ्यां गोचरीकृतं दृष्टं तस्य गौराङ्गस्याश्रुधाराकुलप्रफुल्लकमलेक्षणप्रणयकातरश्रीमुखं येन स एवम्भूतजन इत्यर्थः। पुनः कीदृशः नवनवानुरागोन्मदः नवं नवं प्रतिक्षणं नवो योऽनुरागस्तेनोद्गतो मदो विवेकहर उल्लासो यस्य सः अनुरागमधुरास्वादनजन्योऽत्र मदः अनुरागलक्षणन्तु । सदानुभूतमपि यः कुर्य्यान्नवनवं प्रियं। रागोभवन्नवनवः सोऽनुराग इतीर्य्यते । रागलक्षणन्तु-दुःखमप्यधिकं चित्ते सुखत्वेनैव व्यज्यते । यतस्तु प्रणयोत्कर्षात् स

जिन्होंने नव नव अनुराग प्रमत्त, अश्रुधारा से पूर्ण विकसित नयन कमल विशिष्ट प्रणयाकुल श्रीगौराङ्ग देव के श्रीमुखारविन्दका

आचर्य्य धर्म्मं परिचर्य्य विष्णुं विचर्य्य तीर्थानि विचार्य्य वेदान् ।
विना न गौरप्रियपादसेवां वेदाविदुष्प्राप्य पदं विदन्ति ॥२२॥
अपारावारश्चेदमृतमयपाथोधिमधिकं
विमथ्य प्राप्तं स्यात् किमपि परमं सारमतुलं ।

राग इति कीर्त्यते । गौरचरणं किम्भूतं लोकोत्तरेति अलौकिकः प्रकाशमानो यो मधुरिमा तस्यार्णवस्तं । गौरचन्द्रभक्तस्तच्चरणालौकिक–स्वप्रकाशमाधुर्य्यदुग्धाम्बुधिविहरमाणः सदैव स्यादित्यर्थः ॥२१

श्रीमद्गौरमुखं येन सकृद्दृग्गोचरीकृतं ।
स हि तच्चरणं हातुः न शक्नोति कदाचन ॥२१॥

श्रीगौराङ्गभक्तपादाम्बुजाश्रयं विना परमपुरुषार्थपदस्य ज्ञान-लाभोऽपि न भवति इत्याह आचर्य्यधर्म्ममित्यादि । गौरो गौरहरिः प्रियो येषां तेषां पादसेवां विना धर्म्मं वर्णाश्रमादिकमाचर्य्य कृत्वापि विष्णुं श्रीभगवन्तं परिचर्य्य प्रपूज्यापि तीर्थानि विचर्य्य परिक्रम्यापि वेदान् वेदार्थान् विचार्य्य निपुणं विभाव्यापि वेदादिभिर्दुर्लभ्यं पदं श्रीवृन्दावनं न विदन्ति नानुभवन्तीत्यर्थः ॥२२॥

धर्म्मकृद्विष्णुसेवी च तीर्थाटी वेदपारगः ।
न वेत्ति व्रजतत्त्वं हि गौरभक्ताश्रयं विना ॥२२॥

अतिदुष्प्राप्य दुर्म्मूल्यातिरहस्य वस्तुनि गौरभक्तानां तुच्छतां दर्शयन् तत्तन्महिमा प्रदर्श्यते । अपारावारश्चेत्यादि नः स्तः पारा–वारे यस्य एवम्भूतं अमृतमयपाथोधिं यदि अधिकं निर्म्मथ्य किमपि

दर्शन एकवार भी किया है, वह अलौकिक रूप में प्रकाशित माधुर्य्य सागर स्वरूप श्रीगौर चरणका परित्याग करने की इच्छा कभी भी कर नहीं सकता है ॥२१॥

वर्णाश्रमादि धर्माचरण, विष्णु सेवा, तीर्थ पर्य्यटन एवं वेदार्थ विचार करने पर भी श्रीगौर भक्तगण की चरण सेवा के विना वेदादि दुष्पाप्य स्थान अर्थात् श्रीवृन्दावन को कोई नहीं जान सकता ॥२२॥

पारावार रहित अमृतमय समुद्र से अधिक मन्थन के द्वारा

तथापि श्रीगौराकृतिमदनगोपालचरण
च्छटा स्पृष्टानां तद्वहति विकटामेव कटुतां ॥२३॥
तृणादपि च नीचता सहजसौम्यमुग्धाकृतिः
सुधामधुरभाषिता विषयगन्धथूथूत्कृतिः ।
परिप्रणयविह्वला किमपि धीरमालम्बिता
भवन्ति किल सद्गुणा जगति गौरभाजाममी ॥२४॥

अनिर्व्वचनीयमपि वस्तु प्राप्तं स्यात् किम्भूतं परममुत्कृष्टं सारं सार युक्तं अतुलं निरुपमं तथापि तद्वस्तुकर्त्तृ श्रीगौराकृति मदनगोपाल चरणच्छटास्पृष्टानां सम्बन्धे विकटामेव कटुतां वहति। श्रिया राधिकायाः कान्त्या गौराकृतिर्यो मदनगोपालस्तस्य चरणयोर्याच्छटा शोभा स्पृष्टा आक्रान्तास्तेषां गौरभक्तानां तत्पादाम्बुजमाधुर्य्यास्वादं विना सर्व्वं न्यक्कारकृतं भवतीति महिमाधिक्यं ॥२३॥

समस्त वस्तुसाराणां सारांशभूतवस्तुनि ।
तुच्छतां दधति श्रीमद्गौराङ्गपादसेवकाः ॥२३॥

गौरभक्ताः सर्व्वगुणाश्रया भवन्तीति प्रतिपादयन् महिमान-मुन्नयति। तृणादपि च नीचतेत्यादि। गौराङ्गभक्तानामेव जगति वर्त्तमाना अमी सद्गुणाः किल निश्चितं भवन्तीति नान्येषां के अमी तद्गुणास्तत्राह तृणादपि च नीचताः तृणानि यथा जनानां पादघातादि सहन्ते तथा गौरभक्ता अपि तादृश परिभवेऽपि नोच्चलन्तीत्यर्थः इत्यनेन क्षान्तिर्व्यक्ता। तल्लक्षणन्तु। क्षोभहेतावपि प्राप्ते क्षान्तिरक्षुभितात्मता इति। सौन्दर्य्यमाह सहजेति स्वाभाविकी शीतला मनोहरा आकृतिः कलेवरस्तेषां वचनगुणमाह सुधेति सुधेव मधुरा भाषिता वचनञ्च तेषां वैराग्यमाह विषयेति श्रीकृष्णचैतन्य-

---

जो अतुल्य अनिर्वचनीय उत्कृष्ट वस्तु उत्थित होती है, वह भी श्री-राधा की कान्ति के द्वारा गौराकृति श्रीमदन गोपाल के चरण की शोभास्पृष्ट गौर भक्तों के निकट तिक्त वोध होती है ॥२३॥

तृण से भी लघुता, स्वभाव सिद्ध शीतल मनोहर मूर्त्ति, अमृत के समान मधुर भाषिता, विषय गन्ध में थूत् कारिता एवं अनन्याश्रित

उपासतां वा गुरुवर्यकोटी-रधीयतां वा श्रुतिशास्त्रकोटीः ।
चैतन्यकारुण्यकटाक्षभाजां भवेत् परं सद्य रहस्यलाभः ॥२५॥
आस्तां वैराग्यकोटिर्भवतु शमदमक्षान्तिमैत्रादिकोटि-
स्तत्त्वानुध्यानकोटिर्भवतु भवतु वा वैष्णवी भक्तिकोटिः ।

सम्वन्धरहितविषयगन्धेऽपि थू थू कारस्तेषां धीरपि हरिप्रणयेन विह्वला सती किमपि नालम्विता शून्येवेत्यर्थः । अतएव तादृग्गुण-वैशिष्टेन महिमाधिक्यं प्रकटितं ॥२४॥

कायिका वाचिका हृद्या बुद्धिजाः शोभना गुणाः ।
सन्ति ये गौरभक्तेषु ते गुणाः क्वापि न स्थिताः ॥२४॥

श्रीचैतन्यभक्तानामेव निगूढ़प्रेमलाभः स्यान्नान्येषामिति महिमा प्रदर्श्यते । उपासतामित्यादि गुरूणां वर्य्याः श्रेष्ठास्तेषां कोटीरुपासतामाश्रयतु तेभ्यो गौरपादाम्वुजानाश्रितेभ्यो भगवद्भजन-मार्गं शिक्षतु वा । श्रुतीनां शास्त्राणां पुराणागमादीनां कोटीरधीयतां वा किन्तु श्रीचैतन्यकरुणायुक्तो यः कटाक्षन्तं प्राप्नुवतामेव सम्वन्धे तत्क्षणादेव रहस्यस्य निगूढ़प्रेमवस्तुनो लाभो भवेन्नान्येषां सम्वन्धो-ऽत्राश्रयः । अतस्तदाश्रयिणस्तल्लाभ इत्यर्थः । इति महिमाधिक्य-मुक्तं ॥२५॥

सेवितासंख्यगुर्व्वादि जनानां यः क्वचिन्न हि ।
गौरभक्तैः स लभ्येत निगूढ़प्रियता रसः ॥२५॥

चैतन्यभक्तभक्तानामपि यादृग् गुणगणः सोऽन्यत्र कुत्रापि नास्ति-किं पुनस्तद्भक्तानां महिमोहनीय इत्याह । आस्तामित्यादि । वैराग्य

हरि प्रणय विह्वल बुद्धि विशिष्टता प्रभृति गुण समस्त जगत् में केवल श्रीगौराङ्ग देव के भक्त गण में ही होते हैं ॥२४॥

कोटि संख्यक श्रेष्ठ गुरुओं की सेवा की जाय, कोटि गुणित निगम आगम पुराणादिका पाठ किया गया, किन्तु क्षण मात्र में गूढ़ प्रेम लाभ करने के लिए श्रीचैतन्य की कृपादृष्टि प्राप्त करना एकान्त आवश्यक है इस के विना उक्त प्रेम प्राप्ति नहीं होगी ॥२५॥

कोट्यंशोऽप्यस्य न स्यात्तदपि गुणगणो यः स्वतःसिद्ध आस्ते
श्रीमच्चैतन्यचन्द्रप्रियचरणनखज्योतिरामोदभाजां ॥२६॥
केचित् सागरभूधरानपि पराक्रामन्ति नृत्यन्ति वै
केचिद्देव पुरन्दरादिषु महाक्षेपं क्षिपन्तो मुहुः ।

कोटिः वैराग्यस्य नानाप्रकारः। अथवा वैराग्यस्य शिरोरत्नं अति-वैराग्यमास्तां तिष्ठतु। किम्वा शम दम क्षान्ति मैत्रादिकोटिर्भवतु। शमो भगवन्निष्ठबुद्धिः। दमो विषयेन्द्रियनिग्रहः। क्षान्तिरक्षुभितात्मता। मैत्रादि शुचित्वादि तेषां कोटिराधिकां तत्त्वस्यानुनिरन्तरं ध्यानं तत्त्वमसीत्यस्य चिन्तनं तत्पदार्थत्वम्पदार्थयोः परमात्म-जीवात्मनोरैक्यंभावनमिति। यद्वा। तत्त्वस्य भगवत्स्वरूपस्यानुध्यानं तस्य कोटिराधिक्यं भवतु वा वैष्णवी विष्णुसम्बन्धिनी भक्ति-कोटिर्भवतु किन्तु श्रीमतः सर्व्वशक्तिसारह्लादिनीशक्तियुक्तस्य चैतन्य चन्द्रस्य प्रियाणां भक्तानां पदनखकिरणामोदं भजन्ते सेवन्ते ये तेषां यः स्वभावसिद्धगुणगण आस्ते अस्य गुणगणस्य कोट्यंशोऽप्यन्यत्र कुत्रापि न स्यादिति तद्भक्तभक्तानां महिमेवेदृक् किं पुनस्तद्भक्तानामिति कैमुत्यं ध्वनितं ॥२६॥

चैतन्यभक्तभक्तानां यो गुणः स्वत ईरितः।
तस्य कोट्यंशलेशोऽपि न क्वापि भजतां किमु ॥२६॥

एषामनुभावं दर्शयन् चमत्कारत्वेन महिमानमुन्नयति केचित् सागरभूधरानपीत्यादि। ईदृशी चैतन्यनृत्योत्सवे अद्वैतचन्द्रादयः

वैराग्य कोटि से भी क्या होगा, शम, दम, क्षान्ति, मैत्रादि, शुचित्वादि से भी क्या लाभ होगा, निरन्तर "तत्त्वमसि" अर्थात् परमात्मा व जीवात्मा की ऐक्य चिन्ता से भी क्या लाभ है, और विष्णु सम्बन्धीय भक्ति कोटि से भी क्या प्रयोजन है, श्रीमच्चैतन्य-चन्द्र के प्रिय भक्त गण के चरण नख ज्योति द्वारा आनन्दित मानवों में स्वभाव सिद्ध जो गुण समूह वर्त्तमान है, उसके कोटि अंश का एक अंश भी अपर में नहीं है ॥२६॥

व्यापक आनन्द जाल में विह्वल होकर श्रीमान् अद्वैत आचार्य

आनन्दोद्भटजालविह्वलतया तेऽद्वैतचन्द्रादयः
के के नोद्धतवन्त ईदृशि पुनश्चैतन्यनृत्योत्सवे ॥२७॥
भूतो वा भविताऽपि वा भवति वा कस्याप्रियः कोऽपि वा
सम्बन्धो भगवत् पदाम्बुजरसेनास्मिन् जगन्मण्डले।
तत्सर्व्वं निजभक्तिरूपपरमैश्चर्य्येण विक्रीड़ितो
गौरस्यास्य कृपाविजृम्भिततया जानन्ति निर्म्मत्सराः ॥२८॥

के के जना उद्धतवन्तो न भवन्ति अपि तु सर्व्वे तत्र केचित् भगवद-द्वैतादयो नृत्यन्ति केचित् श्रीवासादयो देवेषु क्रीड़ाशक्तेषु पुरन्द-रादिषु मुहुर्व्वारम्वारं महाधिक्कारं प्रेरयन्तो नृत्यन्ति च कथमेवम्भूता एवं कुर्व्वन्ति तत्राह आनन्देत्यादि। आनन्दः प्रेमामृतस्वादसुख-विशेषः स एव उद्भटं व्यापकं जालं तेन या विह्वलता वाह्यास्फूर्त्ति-स्तयोरपि लक्षिताः सन्त इत्यर्थः। जालरूपकेण वाह्यस्फूर्त्यावरणं ध्वनितं नृत्यादयोनुभावास्तल्लक्षणं। अनुभावास्तु चित्तस्थभावा-नामनुवोधकाः। ते तु नृत्यं विलुठितं हुङ्काराद्याः प्रकीर्त्तिताः ॥२७॥

आनन्दरसपुरस्थाश्चैतन्यपदपार्षदाः।
नानानुभावमीशस्य प्रकाशस्ते नटोत्सवः ॥२७॥

गौरहरिपादपद्मकृपादृक्पातिनां तेषां निगूढ़प्रेमरसपरि-ज्ञातृत्वेन महिमानं प्रकटयति भूतोवेत्यादि। भगवत्पदाम्वुजरसे कस्यापि यः कोऽपि सम्वन्धोऽस्मिन् जगन्मण्डले न भूतः न भविता न भवति वा तत्सर्व्वं निर्म्मत्सरा जानन्ति परोत्कर्षासहनं मात्सर्य्यं

प्रभृतियों के मध्य में कोई कोई व्यक्ति समुद्र पर्वतादिका लङ्घन किये थे, किसी ने इन्द्रादि देवगण को वारम्वार धिक्कार प्रदान भी किया था, अहा! उन सवों के मध्य में कौन ऐसा था, जो चैतन्य देव के नृत्योत्सव में उद्धत न हुआ हो ॥२७॥

इस भूमण्डल में किसी का भी श्रीभगवत् पादपद्म रस के साथ विशेष सम्वन्ध नतो हुआ है; न हो रहा है, और नतो होगा ही इसका परिज्ञान उन सव निर्मत्सर भक्तगणों का ही हुआ था, जिन्होंने भक्तिरूप ऐश्वर्य के साथ नृत्यशील श्रीगौराङ्ग देव की कृपा प्राप्त

महापुरुषमानिनां सुरमुनीश्वराणां निजं
पदाम्वुजमजानतां किमपि गर्व्वनिर्व्वासनं ।
अहो नयनगोचरं निगमचक्रचूड़ाचयं
शचीसुतमचीकरत् क इह भूरिभाग्योदयः ।।२६।।

तद्रहिताः । ननु कथं मात्सर्य्यरहिता कथं वा तं जानन्ति तत्राह अस्य गौरचन्द्रस्य कृपाविजृम्भितया तत्कृपाप्रकाशिततया उपलक्षिता यतो निर्म्मत्सरास्तं रसञ्च जानन्त्येव गौरस्य किम्भूतस्य निजभक्ति-रूपमेवैश्वर्य्यं तेन विक्रीड़ितः । तत्सर्व्वमिति स चासौ सर्व्वश्चेति विग्रहः ।।२८।।

कृष्णपदाम्वुजरससम्वन्धः कस्य न क्वचित् ।
जानन्त्यनुभवन्त्येवं तं रसं गौरपार्षदाः ।।२८।।

गौरहरिपादाम्वुजानाश्रितानामाक्षेपेण तन्महिमानं विस्मृत इव ध्वनयति महापुरुषमानिनामित्यादि । को जन इह मद्विधे जनेऽपि शचीसूतं नयनगोचरमचीकरत् कारयति स्म अहो आश्चर्य्यं यतः स भूरिभाग्योदयः । वहूनां भाग्यानामुदयो यस्य एताहृगेवैतादृशं दर्शयितुं शक्नोति नान्यः । किम्भूतं निगमचक्रचूड़ाचयं श्रुतिसमूहो मुकुटैश्चीयतेऽनुसन्धीयते यस्तं । अतएव सुरमुनीश्वराणां गर्व्व-निर्व्वासनं गर्व्वस्य वासनाया अभावो यस्मात् तं किम्भूतानां निजं पदाम्वुजं तन्माधुर्य्यमजानतामननुभवतां । पुनः किम्भूतानां आत्मानं महापुरुषं मन्यन्ते ये महापुरुषमानिनस्तेषां । महापुरुषम्मन्यत्वेन गर्व्वयुक्तानामित्यर्थः ।।२६।।

गौराङ्गोपासनादर्शि येन स प्रवरो महान्
भूरिभाग्योदयः सम्यक् शास्त्रार्थविधिदर्शकः ।।२६।।

किये थे ।।२८।।

श्रीगौरहरि के चरणारविन्द माधुर्य्यानिभिज्ञ व्यक्तिगण अपने को महापुरुष मान कर गर्वित होते हैं, उनके गर्वनाश कारी श्रुति समूह के शिरोरत्न स्वरूप श्रीशचीनन्दन का दर्शन जो करता है ऐसा भाग्यवान् कौन है ? ।।२६।।

सर्व्वसाधनहीनोऽपि परमाश्चर्य्यवैभवे ।
गौराङ्गे न्यस्तभावो यः सर्व्वार्थपूर्ण एव सः ॥३०॥

॥ अथ श्रीचैतन्याभक्तनिन्दा । ॥

अप्यगण्यमहापुण्यमनन्यशरणं हरेः ।
अनुपासितचैतन्यमधन्यं मन्यते मतिः ॥३१॥

गौरपादाम्बुजार्पितचित्तानामेव पूर्णता । नान्येषामिति दर्शयन् महिमाव्यज्यते उपसंह्रियते च । सर्व्वसाधनहीनोऽपीत्यादि । सर्व्वैः साधनैर्हीनतात्तोऽपि जनो यद्यपि गौगाङ्गेऽर्पितभावो भवति स सर्व्वार्थैः समस्तफलैः परिपूर्णः । यद्वा । सर्व्वेभ्यश्चतुर्वर्गादिभ्योऽर्थः पुरुषार्थशिरोमणि निगूढ़प्रेमा तेन परिपूर्ण एव स इत्यर्थः । गौराङ्गे किम्भूते परमाश्चर्य्यवैभवे सर्व्वोत्कृष्टं चमत्कारकारि वैभवमैश्वर्य्यं तस्मिन् । सर्व्वार्थपूर्णत्वेन महिमाव्यञ्जितः ॥३०॥

साधनादिविहीनोऽपि गौराङ्गार्पितमानसः ।
पुरुषार्थशिरोरत्नः प्रेमपूर्णः स एव हि ॥३०॥

॥॥ इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां टीकायां
चैतन्यभक्तमहिमाप्रकाशश्चतुर्थो विभागः ॥॥

श्रीकृष्णचैतन्यद्वेषिसङ्गत्यागार्थं तदभक्तानपि निन्दति पञ्चदशभिः अथ चैतन्याभक्तनिन्देति लोकप्रवृत्यर्थत्वेनात्र निन्दा नतु खलत्वेन परम कारुण्यपरोपकृतिशीलानां तादृशां महतां परनिन्दकत्वाभावात् । अत्र प्रथमं तदनुपासकस्य निन्दां व्यञ्जरति । अप्यगण्य-महापुण्यमित्यादि नोपासितः श्रीकृष्णचैतन्यचन्द्रो येन तं जनं धन्यं मतिर्न मन्यते । विचारजन्य यथार्थनिर्द्धारणं मतिः सा तु तं जनं धन्यं न मन्यते तं

सर्वोत्कृष्ट चमत्कार कारी ऐश्वर्य्यशाली श्रीगौराङ्ग के प्रति जिनका चित्त समर्पित है, वह निखिल साधन हीन होने परभी सर्वार्थ शिरोमणि निगूढ़ प्रेम से परिपूर्ण होते हैं ॥३०॥

अथ श्रीचैतन्यदेव के अभक्तों की निन्दा—

अगण्य महत् पुण्य होने पर भी, अनन्य मन से श्रीहरिस्मरण

धिगस्तु ब्रह्माहं वदनपरिफुल्लान् जड़मतीन्
क्रियासक्तान् धिग्धिग्विकटतपसो धिक् च यमिनः ।

किम्भूतं अप्यगण्यमहापुण्यमिति । गणनातिरिक्तानि महापुण्यानि यस्य तमपि । पुनः किम्भूतं नास्ति हरेरन्यं शरणं यस्य । हरेरेकान्तभक्तस्यापि धन्यत्वं न मन्यते किमुत अप्यगण्यगुणस्य का कथा धनं तावत् पञ्चमपुरुषार्थः प्रेमा धनमहतीति धन्यस्तं । श्रीकृष्णचैतन्योपासनं विना प्रेमधनं न लभ्यते तस्य कलिकालोपास्यत्वात् । उपास्यत्वञ्च नानातन्त्रविधानेन कलावपि तथा शृण्वित्यादिप्रयोगात् आगमादिषु क्रमदीपिकादौ गौरगोपालस्य सध्यानचतुरक्षरमन्त्रः प्रकाशितोऽस्ति मारपुटित-कृष्णेति एवं गौरहरिगौराङ्गविग्रह श्रीकृष्णचैतन्येत्यादीनि । कामलज्जादिचतुर्थ्या स्वाहान्ता नमोन्ता वा द्वितीया युक्ताहं प्रपद्ये इत्यन्तं वा मन्त्रा ग्रहणीयाश्चेति ध्वनितं ॥३१

चैतन्योपासनं यस्य कलौ नास्ति कदाचन ।
अनन्यहरिभक्तोऽपि स धन्यो मन्यते न हि ॥३१॥

श्रीचैतन्यपदकमलमधुलेशरहितान् निर्भेद-ब्रह्मज्ञानि-कर्म्मि-विकटतापसादीन् धिक्कारपूर्व्वकं निन्दति । धिगस्तु ब्रह्माहमित्यादि ब्रह्मैवाहमितिशब्दोच्चारणमात्रेनैव नतु तत्त्वमसीति महावाक्यार्थ-यथार्थतत्त्वज्ञानेन वदनानि फुल्लानि येषां तान् धिक् क्रिया नित्य-नैमित्तिककर्म्माणि तेषु वा सक्तान् सवाग्रहयुक्तान् अतएव जड़मतीन् जड़ा यथार्थपरमार्थानुसन्धाने विवेकशून्या अथच प्राकृतमायिक-नश्वरसुखलेशानुसन्धानलिप्ता मतिर्व्बुद्धिर्येषान् तान् धिक् विकटं निदाघे तपनज्वलनतापसहिष्णुत्वेन प्रावृषि निरन्तरवृष्टिधारासह-

करने से भी श्रीचैतन्योपासना हीन मनुष्य को अति धन्य नहीं माना जा सकता है ॥३१॥

"मैं ब्रह्म हूँ" इस प्रकार तत्त्व ज्ञान से प्रफुल्ल वदन विशिष्ट व्यक्ति गण को धिक्, नित्य नैमित्तिकादि कर्म समूह में सर्वदा आग्रह युक्त व्यक्ति गण को धिक्, उत्कट तपस्या कारी व्यक्तिगण को धिक्, एवं जिन्होंने सकलेन्द्रिय विषय को वशीभूत किया है, उस प्रकार

किमेतान् शोचामो विषयरसमत्तान्नरपशू-
न्न केषाञ्चिल्लेशोऽप्यहह मिलितो गौरमधुनः ।।३२।।
पाषाणः परिसिञ्चितोऽमृतरसैर्नैवाङ्कुरः सम्भवेत्
लाङ्गूलं सरमापतेर्विवृणतः स्यादस्य नैवार्ज्जवं ।

नत्वेन हेमन्तादौ जलमग्नत्वेन नखश्मश्रुकेशधारित्वेनाभोजनान्तरत्वेन मलापकर्षणरहितत्वेन च घोरं तपः क्लेशसहनजपध्यानादि येषां तान् धिक् यमिनः वशीकृतसर्व्वविषयेन्द्रियान् धिक् यतः उक्तानां केषाञ्चिदपि गौरपदकमलमकरन्दस्य च लेशोऽपि न मिलितः। अहह खेदे। किमेतान् नराकारान् पशून् शोचामः। यतो विषयरसेन भगवत्सम्बन्धरहितविषयभोगेन मदगर्व्वितान्। यथा ग्राम्यपशवः। आहारादिकं कुर्व्वन्ति तथा तेऽपि को विशेषः। गौरपदाश्रयं विना ज्ञानादि सर्व्वं वृथैवेति निन्दा ।।३२।।

ज्ञानकर्म्मतपोयोगयमिनो भोगिनश्च ये ।
तान् धिक् गौरपदाम्भोजमधुलेशविवर्ज्जितान् ।।३२।।

गौरहरिकरुणाकटाक्षं विना सर्व्वं साधनं वृथैवेति सदृष्टान्तं प्रकटय्य तदनाश्रितानां निन्दां व्यञ्जयति। पाषाणः परिसिञ्चित इत्यादि। हे बुधाः यद्यपि सर्व्वं सम्पूर्णं साधनमस्तु तथापि गौरस्य करुणाया अभावे विद्यमानत्वे सति स्वयं भगवद्विषक-रतिविशेषोत्-पन्नानन्दानुभव-सुखविशेषसम्भावनापि न स्यात्। तत्सम्भावनाभावं दृष्टान्तयति। सुधारसैः परिभृशं सिञ्चितः पाषाणो नाङ्कुरः सम्भवेत् सिञ्चितपाषाणस्य यथाङ्कुरसम्भावना न स्यात् एवं नाङ्गूलं

संयमी व्यक्ति गण को धिक्कार, अर्थात् इस प्रकार विषय रस में प्रमत्त नर पशु गण अति शोचनीय है, कारण इन सब के मध्य में किसी ने भी श्रीगौर पदाम्भोजमधु का लेश को भी प्राप्त नहीं किया है ।।३२।।

हे पण्डितवृन्द ! जिस प्रकार प्रस्तर खण्ड अमृत रस के द्वारा उत्तम रूप से सिञ्चित होने पर भी उस में अङ्कुरोद्गम की सम्भा–

हस्तावुन्नयता वुधाः कथमहो धार्य्यं विधोर्मण्डलं
सर्व्वं साधनमस्तु गौरकरुणाभावेन भावोत्सवः ॥३३॥
अवतीर्णे गौरचन्द्रे बिस्तीर्णे प्रेमसागरे ।
सु प्रकाशितरत्नौघे यो दीनो दीन एव सः ॥३४॥

विवृणतो विस्तारयतो सरमापतेः कुक्कुरस्य लाङ्गूलस्याऽर्ज्जवं सारल्यं न स्यात् हस्तावुन्नयता जनेन विधोर्मण्डल कथं धार्य्यं यथा हस्ताभ्यामुन्नताभ्यां विधोर्मण्डलधरणासम्भावना तथा चैतन्यकरुणां विनान्यसाधनैः प्रेमसुखादि सम्यग्भावनापि न स्यात् । अङ्कुरार्थ-पाषाणसेचनश्वपुच्छार्जवार्थ-तत्प्रसारणचन्द्रधारार्थंवाहुप्रसारण-व्यापारो यथा वृथा भवति तथा श्रीकृष्णचैतन्यपादाश्रयं विना अन्य-साधनानि सर्व्वाणि वृथैव भवन्तीति तदनाश्रितनिन्दा व्यञ्जिता। पाषाणः परिसिञ्चितोऽमृतरसैरिति विवृणत इति । हस्तावुन्नयेतेति पाठे साक्षेपविधार्थ-लोड् मध्यम पुरुषवहुवचनसिद्धक्रियापदानि तत्रा-वुधा इति सम्बोधनं अर्थः स एव। उत्पाणिखविधुस्पर्शः शुनः पुच्छर्ज्जुता यथा। सिक्तपाषाणाङ्कुरता कदाचिन्नैव सम्भवेत् ।३३।

यथा श्रीकृष्णचैतन्यकरुणामन्तरेण वै ।
सर्व्वसाधनसत्त्वेऽपि भावसम्भावना न च ।३३॥

सुप्रकाशितप्रेमरत्नसमूहस्य गौरस्य पादाम्वुजयोरकृताश्रयत्वेन प्रेमधनशून्यजनस्य दारिद्रं प्रकटयन्निन्दां व्यञ्जयति । अवतीर्णे गौरचन्द्रे इत्यादि । गौरहरिरूपे चन्द्रे प्रकटीभूते सति यो दीनः स

वना नहीं होती है, जिस प्रकार कुक्कुर की लाङ्गूल प्रसारित होने पर भी उस की ऋजुता नहीं होती है, हस्त को उन्नत कर लोक कभी भी हाथ से चन्द्रका स्पर्श नहीं कर सकता है„ उस प्रकार सर्वसाधन सम्पन्न होकर भी श्रीगौराङ्ग देव की कृपा को छोड़कर लोक प्रेम-सुखादि का अनुभव नहीं कर सकता है ॥३३॥

विस्तीर्ण प्रेमसागर में श्रीगौरचन्द्र उदित होकर श्रवण-कीर्त्तनादि नवविध भक्ति रूप रत्न समूह का प्रकाश करने पर भी

अवतीर्णे गौरचन्द्रे विस्तीर्णे प्रेमसागरे ।
ये न मज्जन्ति मज्जन्ति ते महानर्थसागरे ।।३५।।
प्रसारितमहाप्रेमपीयूषरससागरे ।

दीन एव स्यात् । दीनतात्र मूढ़ता दरिद्रता च किम्भूते विस्तृतप्रेम रूपसागरो रत्नाकरो येन तस्मिन् ननु उदितचन्द्रविस्तृतरत्नाकरत्वेन कथं दरिद्रता हानिरत्राह सु प्रकाशितेति सुष्ठ यथा स्यात् तथा प्रकाशितो रत्नरूपाणां श्रवणकीर्त्तनादि नवविधभक्तीनां किम्वानुभाव सात्त्विकव्यभिचारिभावानां किम्वा हरेकृष्णेत्यादि नाम्ना मोघः समूहो येन तस्मिन् । कोऽपि रत्नाकरनिकटस्थ उदितचन्द्रप्रकाशित-रत्नान्यपरिचित्यान्यत्र लौहगलित कल्ककणाद्यनुसन्धानुमिच्छति तस्य यथा दारिद्रं न याति तथा प्रचारितनिजप्रेमप्रकाशित-नानाविध-भावानुभावादिक गौरविधुपदकमलानाश्रितस्य मूढ़ता न याति अतः सोऽतीवमूढ़ इति निन्दा ध्वनिता ।।३४।।

ततः स्वप्रेमजलधिरत्नं नाम वितन्वतः ।
गौरेन्दोः पादरत्नं यो नाश्रितो मूढ़ एव सः ।।३४।।

गौरपादानाश्रितस्य प्रेमधनात्यन्ताभावात् दीनतां प्रकटय्येदानीं प्रेमसागरमज्जनाभावादनर्थसागरमज्जनत्वमुद्दिश्य निन्दां व्यञ्जयति अवतीर्णे गौर चन्द्रे इत्यादि ।।३५।।

गौरपादानाश्रितस्य प्रेमाम्भोधावमज्जनं ।
किन्तु निन्दातरखरक्षरन्मुत्रे निमज्जति ।।३५।।

प्रेमसुधारसपानाभावात् तृष्णाव्याकुलत्वदीनतारूपमूढ़तां प्रकटयन् निन्दाव्यञ्जते प्रसारितेत्यादि । यथा दरिद्रस्य धनचिन्तया

जो व्यक्ति दीन अर्थात् हतभाग्य है, वह यथार्थ ही दीन अर्थात् दरिद्र है ।।३४।।

श्रीगौरचन्द्र के उदय होने पर भी सुविस्तीर्ण प्रेमसागर में जो जन अवगाहन नहीं करता है, वह महा अनर्थ सागर में निमज्जित होता है ।।३५।।

श्रीमच्चैतन्यचन्द्र प्रकटित होकर प्रेमरूप महा अमृत सागर

चैतन्यचन्द्रे प्रकटे यो दीनो दीन एव सः ॥३६॥
अचैतन्यमिदं विश्वं यदि चैतन्यमीश्वरं ।
न विदुः सर्व्वशास्त्रज्ञा ह्यपि भ्राम्यन्ति ते जनाः ॥३७॥
स्वादं स्वादं मधुरिमभरं स्वीयनामावलीनां
मादं मादं किमपि विवशीभूतविस्रस्तगात्रः ।

सुस्निग्धजलमज्जनाभावेन मिष्टपानकादिपानाभावस्ततो धनचेष्टयैव दूरगमनं तत्रोत्तमजलादि न मिलति क्षारपूतिगन्धजले मज्जनं किन्तु तस्य च पानं तथा चैतन्याभक्तप्रेमधनाभाव: प्रेमसागरमज्जनाभाव: प्रेमसुधारसपानाभाव: ततः कुविषयसुसन्धानादि ॥३६॥

प्रसारितो येन महान् प्रकृष्टः प्रेम्नैव पीयूषरसः स सिन्धुः ।
जनाय तस्मिन् प्रकटे तदङ्घ्रिं यो नाश्रितो मूढतरात् स मूढः ॥३६।

चैतन्याभावविशिष्टे संसारे श्रीचैतन्येश्वराननुभवतां सर्व्व-शास्त्रविदुषामपि संसारभ्रमणं न निवर्त्तते इति निन्दां प्रकटयति। अचैतन्यमिति हि निश्चितं ॥३७॥

तादृशभावाविष्ट श्रीगौरहरिचरणाम्बुजानुभवरहितानां भक्ति-दुर्घटत्वं दर्शयन् निन्दामासञ्जयति स्वादं स्वादमित्यादि । यैरेकवार मपि श्रीगौरहरिर्न दृष्टो नानुभूतस्तेषु भक्तिर्दुष्प्राप्या प्राप्तिसम्भाव-नापि नास्तीत्यर्थः। किम्भूतो निजनाम श्रेणीनां हरेकृष्ण कृष्णे-

---

का विस्तार करने पर भी जो व्यक्ति दीन अर्थात् सुधारस का पान करने में असमर्थ है वह व्यक्ति यथार्थ ही दीन अर्थात् महामूढ़ है ।३१

यदि श्रीचैतन्य को ईश्वर रूप से नहीं जानता है, तब पण्डित गण सर्वशास्त्रज्ञ होकर भी चैतन्य शून्य संसार में वृथा ही भ्रमण करते हैं ॥३७॥

जो "हरे कृष्ण" इत्यादि स्वीय नाम समूह के अतिशय माधुर्य आस्वादन से प्रमत्त होकर अनिर्वचनीय रूप से विवश तथा स्खलित गात्र हुए हैं, एवं जो लोक समूह को कृष्ण गुण गान करो" वारम्वार करते हैं उन श्रीगौरहरि का दर्शन जिन्होंने एकवार भी नहीं किया

वारम्वारं व्रजपतिगुणान् गायगायेति जल्पन्
गौरो दृष्टः सकृदपि न यैर्दुर्घटा तेषु भक्तिः ॥३८॥
विना वीजं किं नाङ्कुरजननमन्धोऽपि न कथं
प्रपश्येन्नोपङ्गुर्गिरिशिखरमारोहति कथं ।

त्यादीनां माधुर्य्यातिशयमास्वाद्य ततो मदित्वा किमप्य निर्व्वचनीयं यथा स्यात् तथा विवशीभूतं पश्चात् स्खलितं गात्रं यस्य स पुनः पुनः व्रजपते श्रीकृष्णस्य गुणान् गायगायेति वारं वारं जल्पन् भक्तिदुर्घट त्वेन निन्दोक्तिः ॥३८॥

स्वनाम-मधुमत्तस्य गौरस्य पादपद्मयोः ।
महिमाननुभूतेषु हरिभक्तिः कदापि नः ॥३८॥

ननु चैतन्याभक्तानां कथं दुर्घटप्रेमभक्तिकत्वं गुर्व्वन्तरोपासन प्राप्तिपूर्व्वकश्रवणकीर्त्तनादिकृतिमत्वात् । तत् दृष्टान्तैर्भक्तिदुर्घटत्वं द्रढ़यित्वा निन्दामपि द्रढ़यति । विना वीजमित्यादि । यदि श्रीचैतन्ये-भक्तानामपि कथञ्चित् प्रकारेण परे परमेश्वरे स्वयं भगवति विषये प्रेमरभसः स्यात् तर्हि वीजं विनाङ्कुरजन्म किं न स्यात् चैतन्ये किम्भुते हरिरसमयाश्चर्य्यविभवे हरेः स्वस्य भक्तिरसस्वरूपः परम चमत्कार कारी विभवोऽतिप्रभावे यस्य तस्मिन् । ननु स्थानविशेषे वैदुर्य्यविशेषाणामङ्कुरः कदाचित् स्यात्तर्हि जन्मान्धोऽपि कथं न प्रकृष्टं पश्येत् । ननु अन्धस्यापि श्रवणद्वारा चक्षुः साधनं ज्ञानसाम्यं स्यात्तत्राह पङ्गुरित्यादि । पङ्गुः पदहीनः सामान्यशब्दस्य विशेष-परत्वात् गिरिः सुमेरुस्तस्य शिखरं तर्हि नारोहति किं यथा वीज-

---

है, उन सव व्नक्तिगण की भक्ति प्राप्ति की सम्भावना भी दुर्घट होती है ॥३८॥

यदि निज भक्ति रस रूप परम चमत् कार कारी विभव विशिष्ट श्रीचैतन्य देव में भक्ति हीन व्यक्ति वृन्द का भगवद् विषयक प्रेमलाभ स्वतः ही होता है, तो विना वीज से अङ्कुरोद्गम क्यों नहीं होता है ? अन्धजन गण दृष्टि लाभ क्यों नहीं करते हैं ? एवं पङ्गु व्यक्ति गण सुमेरु पर्वत के शिखर में आरोहण क्यों नहीं

यदि श्रीचैतन्ये हरिरसमयाश्चर्य्यविभवे-
ऽप्यभक्तानां भावी कथमपि परप्रेमरभसः ॥३९॥
अलौकिक्या प्रेमोन्मदरसविलासप्रथनया
न यः श्रीगोविन्दानुचरसचिवेषेषु कृतिषु ।
महाश्चर्य्यप्रेमोत्सवमपि हठाद्दातरि न य-
न्मतिर्गौरे साक्षात् पर इह पर स मूढ़ो नरपशु ॥४०॥

भावाङ्कुरासम्भावना अन्धस्य दर्शनासम्भावना पङ्गोः सुमेरुशिखरा रोहणात्यन्तासम्भावना तथा गौरपदानाश्रितेषु प्रेमरसस्यात्यन्ता-सम्भव इति ॥३९॥

अवीजादङ्कुरोऽन्धस्येक्षा पङ्गोर्गिरिलङ्घनं ।
न यथा न तथा गौराभक्तस्य प्रेमलम्भनं ॥३९॥

अत्यन्तायोग्यजनसम्प्रदानकप्रेमानन्ददातरि श्रीगौरहरिपरमेश्वरेऽनीश्वर बुद्धया तदनुपासकस्य नरपशुत्वं विख्यापयन् तं निन्दति अलौकिक्याप्रेमोन्मद इत्यादि । इह गौरे साक्षात् परमेश्वरे स्वयं भगवति यस्य मतिर्न स्यात् स नराकारपशुविशेषो ज्ञेयः । यतो मूढ़ः मोहं प्राप्तः । कीदृशे गौरे एषु चैतन्यसङ्गदृष्टविनाशेषु तस्मै परमचमत्कारकारिणं प्रेमानन्दं हठाद्दातरि एषु कीदृशेषु श्रीत्यादि श्रीराधिका गोविन्दश्च तयोः पार्षदरूपाः सहायास्तेषु । अतः कृतिषु तयोर्नित्यस्थेषु कया रीत्या करणेन ददाति तत्राह प्रेमेति । उद्गतो मदो हर्षो यस्मात् स चासौ रसश्चेति उन्मदरसः । प्रेम्नो य उन्मदरसस्तेन यो विलासो विहारस्तस्य प्रथनया विस्तारेण किम्भूतया अलौकिक्या या तादृशविलासप्रार्थना लोके न सम्भवति तया एवम्भूते

करते हैं ॥३९॥

जिन्होंने प्रेमोद् गत हर्ष रस विलास के अलौकिक विस्तार के द्वारा श्रीराधा गोविन्द के पार्षद रूप में साहाय्य कारी अतएव कृती व्यक्ति को परम चमत् कार कारी प्रेमानन्द का वितरण सहसा किया है, उन साक्षात् परमेश्वर श्रीगौर हरि के प्रति जिन की मति

असंख्या: श्रुत्यादौ भगवदवतारा निगदिताः
प्रभावं कः सम्भावयतु परमेशादितरतः।
किमन्यत् स्वप्रेष्ठे कति कति सतां नाप्यनुभवा-
स्तथापि श्रीगौरे हरिहरि न मूढ़ा हरिधियः ॥४१॥

गौरे यस्य मतिरयं श्रीगौरचन्द्रः परमेश्वरः स्वयं भगवान् कलावय-मेवोपास्य इत्याकारनिश्चयात्मकं ज्ञानं नास्ति स नरपशुर्मूढ़ो विशेष ज्ञानाभावत्वं तेन पशुर्यथा केवलमाहारादिकं करोति तथायमपि ।४०

भक्तेषु नास्ति तस्मै योऽददात् प्रेमविलासतः।
प्रेमोत्सवं तत्र गौरे यन्मतिर्न पशुः स हि ॥४०॥

श्रुतिनिगदित भगवदसङ्ख्यावतारत्वेऽपि दृष्टतत्तत्प्रभावत्वे-ऽपि येषां गौरहरौ हरिबुद्धिर्नस्यात् तेषां मूढ़त्वं प्रतिपादयन्निन्दां व्यनक्ति। असङ्ख्या श्रुत्यादौ भगवदित्यादि। पुराणेतिहासाग-मादिषु भगवतोऽवताराः सङ्ख्यातिरिक्ताः। गौरहरौ यादृक् प्रभाव-स्तमीश्वरादन्यत्र कः सम्भावयतु अन्यत् किं वाच्यं स्वप्रेष्ठे निज-प्रियतमे गौरकृष्णे सतां सद्भक्तानां कति कति के के नाप्यनुभावान् दृष्ट्वा स्युस्तथापि गौरहरौ परमेश्वरबुद्धयोः नः भवेयुः। कथं तादृशो न यतो मूढ़ाः। हरिहरीति खेदे। अवतारा ह्यसङ्ख्येया हरेः सत्त्व-निधेर्द्विजा इत्यादिप्रमाणैरसंख्यावतारत्वं जगन्नाथमाधव नाम्नोः कुष्ठिब्राह्मणस्य सौचिक-यवनस्य चान्येषाञ्च तथा विधानामुद्धारकत्वेन ईश्वरप्रभाववत्त्वं भक्तानां षड्भुजादिदर्शनादनुभवश्च। सर्व्व-विद्वच्छिरोमण्डलरत्न-वासुदेव-सार्व्वभौमभट्टाचार्य्याणामनुभवो यथा वैराग्यविद्यानिजभक्तियोगशिक्षार्थमेकः पुरुषः पुराणः। श्रीकृष्ण-

---

नहीं होती है वह ही मूढ़ एवं नरपशु है ॥४०॥

वेद, पुराण, इतिहास, आगमादि में श्रीभगवान् के असंख्य अवतार वर्णित है, किन्तु श्रीगौरहरि में जिस प्रकार अलौकिक प्रभाव दृष्ट होता है, उसकी सम्भावना परमेश्वर भिन्न अपर किसी व्यक्ति में नहीं हो सकती है। अपर क्या कहूँ श्रीगौर कृष्ण के भक्तवृन्द के अलौकिक प्रभाव को शत शत बार देखकर भी जिस की परमेश्वर

साक्षान्मोक्षादिकार्थान् विविधविकृतिभिस्तुच्छतां दर्शयन्तं
प्रेमानन्दं प्रसूते सकलतनुभृतां यस्य लीलाकटाक्षः ।
नासौ वेदेषु गूढ़ो जगति यदि भवेदीश्वरो गौरचन्द्र-
स्तत् प्राप्तोऽनीशवादः शिवशिव गहने विष्णुमाये नमस्ते ।।४२।।

चैतन्यशरीरधारी कृपाम्वुधिर्यस्तमहं प्रपद्ये कालान्नष्टं भक्तियोगं निजं यः प्रादुष्कर्त्तुं कृष्णचैतन्यनामा । आविर्भूतस्तस्य पादारविन्देगाढ़ं गाढ़ं लीयतां चित्तभृङ्ग इति । तत्तदनुभूतेश्वरत्व–सर्व्वचित्ताकर्षकत्व–स्वप्रेमामृतास्वादकत्वादिविशिष्टे गौरे हरौ येषां न हरिधीस्ते मूढ़ा इति निन्दां व्यक्ति प्रार्थनार्थं ।।४१।।

अप्यगण्यावताराणां सतामप्यनुभूतता ।
स्वभावो यस्य तस्मिश्च मूढ़ानां हरिधीर्न हि ।।४१।।

यत्कारुण्यकटाक्षजन्यानन्देन मोक्षादिकार्थास्तुच्छी भवन्ति तस्य श्रीगौरहरेरनीशत्वं वदतां जगदनीशवादाक्षेपेण मायानमस्कार सूचितां निन्दां व्यनक्ति । साक्षान्मोक्षादिकार्थानित्यादि असौ गौर-चन्द्रो जगति यदि ईश्वरो न भवेत् तदा अनीशवादः प्राप्तः शिव शिव हे विष्णुमाये तुभ्यं नमः । हे दुर्ज्ञेयप्रभावे तवेदृशः प्रभावः येन मोहिताः केऽपि गौरमीश्वरं न वदन्ति । कीदृशः वेदेषु गूढ़ आच्छन्न-रूपेण तत्र स्थितत्वात् । यस्य गौरचन्द्रस्य लीलाकटाक्षः विलासयुक्तो नेत्रप्रान्तः सकलतनुभृतां प्रेमानन्दं प्रसूते जनयति । किम्भूतं नाना-विकारैः मोक्षादिकार्थान् तुच्छतां अत्यन्तायोग्यतां दर्शयन्तं । चैतन्य-

---

वुद्धि श्रीगौरहरि में नहीं होती है । हाय ! हाय ! वे सव अति मूढ़ होते हैं ।।४१।।

जिन श्रीगौरचन्द्र के विलास युक्त नेत्रप्रान्त समस्त देह धारियों में प्रेमानन्द का उत्पादन करता है, जिस से मोक्षादि में तुच्छता वुद्धि होती है । वेद में गूढ़ अर्थात् आच्छन्न रूप से स्थित श्रीगौर चन्द्र इस जगत् में यदि ईश्वर नहीं होते हैं, तव तो जगत् अनीश्वर वाद ग्रस्त होगा, शिव शिव हे दुर्ज्ञेय प्रभावे ! हे विष्णु माये ! तुम्हें

धिगस्तु कुलमुज्ज्वलं धिगपि वाग्मितां धिग्यशो
धिगध्ययनमाकृतिं नववयः श्रियश्चास्तु धिक् ।
द्विजत्वमपि धिक् परं विमलमाश्रमाद्यञ्च धिक्
नचेत् परिचितः कलौ प्रकटगौरगोपीपतिः ॥४३॥

कटाक्षशून्यानां तदनीशत्ववादिनां तदनुपासकानां निन्दात्वमुक्तं ॥४२

यत्कारुण्यकटाक्षप्रेमानन्दस्तुच्छतां नयेत् ।
ब्रह्मानन्दं तमीशं ये न जानन्त्यजया हताः ॥४२॥

उज्ज्वलकुलादिविशिष्टानामपरिचितचैतन्यानां कुलादि धिक्कारेण निन्दाव्यज्यते धिगस्तु कुलमुज्ज्वलमित्यादि । यदि कलौ प्रकटीभूतो गौरगोपीपतिर्न परिचितो नोपासितः तर्हि उज्ज्वलकुलादि सर्व्वं धिक् । गोपीनां गोपस्त्रीणां पतिः प्रियः नतु तासां विवोढ़ा यथा ब्राह्मणीपतिरित्युक्ते तस्य उपपतिरेव लक्ष्यते नतु विवोढ़ा । गौरश्चासौ गोपीपतिश्चेति सः । कुलमाचारादियुक्तं सद्वंशप्रसूत्या उज्ज्वलं । वाग्मिता वावदूकता यशः कीर्त्तिः अध्ययनं श्रुत्यादिपाठः आकृतिः सुघटीतकरचरणाद्यवयवः नववयः पूर्णकैशोरं । श्रीरविनाशि सम्पत्तिः । द्विजत्वं यथा विहितसंस्कारोपनयनगायत्र्युपदेशिकत्वं परं श्रेष्टः विमलाश्रमः ऊत्कृष्टाङ्गब्रह्मचर्य्यादि आद्यशब्देन यजन-योगाभ्यासवैराग्यादि । गौरोपासनं विनैव तत्सर्व्वं धिगिति निन्दा व्यक्ता ॥४३॥

कुलवाक्पटुतां वेदपाठाकृतिरयोमुखान् ।
धिक् तेषामिह येषां वै न गौरचरणे रतिः ॥४३॥

नमस्कार है ॥४२॥

कलियुग में प्रकटीभूत श्रीगौर गोपीपति यदि उपासित नहीं होते हैं तब उज्ज्वलकुल, वावदूकता, यशः, अध्ययन, सुघटित कर चरणादि अवयव विशिष्ट आकृति, पूर्ण कैशोरवयस अविनाशि सम्पत्ति, द्विजत्व, उत्कृष्टाङ्ग ब्रह्मचर्य्यादि आश्रम सब कुछ ही धिक्कार के योग्य हैं ॥४३॥

अहो वैकुण्ठस्थैरपि च भगवत् पार्षदवरैः
सरोमाञ्चं दृष्टा यदनुचर-वक्रेश्वरमुखाः ।
महाश्चर्य्यप्रेमोज्ज्वलरस-सदावेशविवशी-
कृताङ्गास्तं गौरं कथमकृतपुण्यः प्रणयतु ॥४४॥
दत्त्वा यः कमपि प्रसादमथसंभाष्य स्मितश्रीमुखं
दूरात् स्निग्धदृशा निरीक्ष्य च महाप्रेमोत्सवं यच्छति ।

वैकुण्ठपार्षदसाग्रहदर्शनविषयत्वेन गौरभक्त प्रशंसया तन्महिमानमुन्नन् तदनाश्रितस्याकृतपुण्यत्वं प्रतिपादयन् तं निन्दति । अहो । वैकुण्ठस्थैरपीत्यादि । अकृत पुण्यं येन स तं गौरहरिं कथं प्रणयतु तदाश्रितः सन् तद्विषयिकां प्रीतिं करोतु तं कं यस्य गौरस्यानुचरा वक्रेश्वरादयः वैकुण्ठस्थितैर्भगवत्पार्षदवरैरपि सरोमाञ्चं यथा स्यात् दृष्टास्तेषां दर्शनविषयीभूताः । अहो आश्चर्य्यं । गौरानुचराः कीदृशाः महान् परम आश्चर्य्यः चमत्कारकारी प्रेम्नो य उज्ज्वलरसस्तत्र सर्व्वदावेश आविष्टता तेन विवशीकृतान्यङ्गानि येषां ते । यस्य भक्ता एवम्भुतास्तमनाश्रितस्याकृतपुण्यत्वमतो निन्दितत्वं ॥४४॥

प्रशंसन्ति परव्योमपार्षदा यत्प्रियानहो ।
अपुण्यवान् कथं तस्य पादपद्मं समाश्रयेत् ॥४४॥

करुणया स्वप्रेमोत्सवदानशीलचैतन्याकृतादराणां कर्कशहृदयानां दुष्टत्वं प्रतिपादयन् निन्दा व्यज्यते । दत्त्वा य इत्यादि । साक्षात् परमेश्वरे श्रीगौर हरौ येषां कुतर्केण कर्कशातिकठिना या

जिन श्रीगौरहरि के अनुचर वक्रेश्वर प्रभृति महा आश्चर्य्य प्रेमोज्ज्वल रस में सदा आविष्ट होकर विवशीकृताङ्ग होते हैं, एवं वैकुण्ठ के पार्षद वर्ग जिन को देखकर पुलकाञ्चित होकर आश्चर्य्यान्वित होते हैं, उन श्रीगौर हरि को अकृतपुण्य व्यक्ति कैसे प्रीति का विषय बनाने में समर्थ होंगे ॥४४॥

जो किसी अनिर्वचनीय व्यक्ति को भी प्रसाद प्रदानकर ईषत् हास्य शोभित श्रीमुख से सम्भाषण पूर्वक स्निग्ध दृष्टि के द्वारा दूर से निरीक्षण कर अत्युत्कृष्ट प्रेमानन्द दान करते हैं, साक्षात् पूर्ण प्रेमरस

येषां हन्त कुतर्ककर्कशधियां तत्रापि नात्यादरः
साक्षात् पूर्णरसावतारिणि हरौ दुष्टा अमी केवलम् ।।४५।।

※ अथ दैन्यरूपस्वनिन्दा ※

वञ्चितोऽस्मि वञ्चितोऽस्मि वञ्चितोऽस्मि न संशयः ।
विश्वं गौररसे मग्नं स्पर्शोऽपि मम नाभवत् ।।४६।।

धीस्तया नात्यादरस्तेऽमी केवलं दुष्टा असुरस्वभावा इत्यर्थः । किम्भूते पूर्णो रसो यस्य स पूर्णरसः अवताराः सन्त्यस्मिन् अवतारी सच स चेति । यद्वा । पूर्णप्रेमरससमवतारयितुं प्रकटयितुं शीलं यस्य तस्मिन् कस्मिन्नित्यपेक्षायामाह यः कमप्यनिर्व्वचनीयमपि प्रसादं प्रसन्नतां दत्ता स्मितेन शोभायुक्तं मुखं यथास्यात्तथानन्तरं संभाष्य स्निग्धया दृशा दूरान्निरीक्ष्य च महान्तमत्युत्कृष्टं प्रेमानन्दं ददाति तस्मिन्नपि नात्यादरो येषां तेषां दुष्टत्वेन निन्दा व्यक्ता ।।४५।।

प्रेमोत्सवं यो ददाति संभाष्य स्निग्धया दृशा ।
तस्मिन्ननादरो येषां ते दुष्टा भुवि केवलं ।।४५।।

।।※।। इति श्रीचैतन्यचन्द्रामृते अभक्तनिन्दाप्रकरणे
पञ्चदश-पद्यात्मकः पञ्चमो विभागः ।।※।।

अथ चैतन्याभक्तनिन्दनेन चातनिर्व्वेदो दैन्यरूपस्वनिन्दा-प्रकरणमुत्थापयत्येकादशभिः पद्यैरथदैन्यरूपस्वनिन्देति । तत्र प्रथम-मात्मनो गौररसे श्रीकृष्णचैतन्यप्रेमरससिन्धौ मग्नमवगाह्य प्रविष्टं । मम पुनः स्पर्शोऽपि नाभवत् अतो मां धिगिति शेषः । इति दैन्यनिन्दा ।।४६।।

प्रकटनशील, उन श्रीगौरहरि का जो लोक कुतर्क कठिन वुद्धि के द्वारा अतिशय अनादर करता है, वे सव दुष्टात्मा अर्थात् असुर स्वभाव के हैं ।।४५।।

※ अथ दैन्यरूप स्वनिन्दा ※

श्रीगौराङ्ग प्रेम रस में विश्व निमग्न हो गया, मुझे स्पर्श भी नहीं हुआ,हाय ! मैं वञ्चित हो गया,मैं वञ्जित हो,गया में वञ्चित हो

कैर्व्वा सर्व्वपुमर्थमौलिरकृतायासैरिहासादितो
नासीद्गौरपदारविन्दरजसा स्पृष्टे महीमण्डले ।
हा हा धिङ् मम जीवनं धिगपि मे विद्या धिगप्याश्रमं
यद्दौर्भाग्यपरावरैर्मम च तत्सम्बन्धगन्धोऽप्यभूत् ॥४७॥
उत्ससर्प जगदेव पूरयन् गौरचन्द्रकरुणामहार्णवः ।
विन्दुमात्रमपि नापतन्महादुर्भगे मयि किमेतदद्भुतं ॥४८॥

गौराङ्गप्रेममाधुर्य्यरसधाराप्लुतं जगत् ।
मम तत्स्पर्शनं नास्ति वञ्चितस्य धिगस्तु मां ॥४६॥

श्रीचैतन्याविर्भावे सर्व्वेषां पुरुषार्थशिरोमणि निगूढ़प्रेमलाभं दृष्ट्वा आत्मानं तदयोग्यम्मन्यत्वेन निर्व्विण्णः स्वधिक्कारेण निन्दति । कैर्व्वा सर्व्वपुमर्थमौलिरित्यादि । महीमण्डले श्रीगौरस्य पदारविन्दयो रजसा स्पृष्टे सति कैर्जनैरकृतायासैः सर्व्वपुमर्थमौलिः प्रेमा इह संसारेणासादित प्राप्तो नासीत् अपि तु सर्व्वैः प्राप्त आसीदित्यर्थः । अकृत आयासो व्यापारो यैः अनायासेनाकृतसाधनोद्यमेनेत्यर्थः । सर्व्वेषां पुमर्थानां धर्म्मार्थकाममोक्षानां मौलिः पञ्चमपुरुषार्थः श्रीकृष्णप्रेमा कैर्व्वा न प्राप्तः हा हा मम जीवनं प्राणधारणं धिक् । विद्यां शास्त्रादिज्ञानं धिक् । आश्रमं तुरीयं सन्यासमपि धिक् । यद्यस्मात् दौर्भाग्यानां परम्पराभिर्म्मम तस्य प्रेम्नः सम्वन्धस्य गन्धो लेशोऽपि नाभूदिति दैन्येन स्वनिन्दा ॥४७॥

कृतावतारे गौराङ्गे प्राप्तः प्रेमरसो जनैः ।
तद्गन्धलेशो मम न धिग्विद्या जीवनादिकं ॥४७॥

जगदाप्लावकप्रभोः करुणासिन्धोः करुणाविन्दुमात्रपतना-

गया, इस में कोई संशय नहीं है ॥४६॥

पृथिवी मण्डल श्रीगौरहरि के पदारविन्द द्वारा स्पृष्ट होने से सर्व पुरुषार्थ शिरोमणि प्रेम को अनायास किसने प्राप्त नहीं किया ? हा कष्ट ! मेरा जीवन, विद्या, आश्रम को धिक्, कारण दौर्भाग्य परम्परा द्वारा मेरा प्रेम सम्बन्ध का गन्धमात्र लाभभी नहीं हुआ ४७

कालः कलिर्व्वलिन इन्द्रियवैरिवर्गाः
श्रीभक्तिमार्ग इह कण्टककोटिरुद्धः।
हा हा क्व यामि विकलः किमहं करोमि
चैतन्यचन्द्र यदि नाद्य कृपां करोषि ।।४९।।

योग्यत्वेन स्वदुर्भाग्यमनुमीयात्मनिन्दां व्यनक्ति। उत्ससर्प जगदेव दूरयन्नित्यादि। गौरचन्द्रस्य करुणारूपो महान् समुद्रो जगत् पूरयन्नाप्लवयन्नेवोत्ससर्प उच्चचाल। विन्दुमात्रमपि मयि नापतत्। किमेतदद्भूतं मां हित्वा सर्व्वाप्लावनाददभुतत्वं। किम्भूते महादुर्भगे तत्करुणालेशपतनाभावादतिदुर्भगत्वमनुमीयते अतिदुर्भगत्वान्निन्दा व्यक्ता ।।४८।।

जगत्प्लाविदयासिन्धोः करुणालेशहीनतः।
आत्मनश्च सुदुर्भाग्यमनुमीयेऽहमद्भूतं ।।४८।।

कालकृताजितेन्द्रियत्वे कण्टकरुद्धभक्तिमार्गत्वे च वैकल्यं प्रकटन् तत् शरणार्थी दैन्येन तत्कृपां प्रार्थयते। कालः कलिरित्यादि कालः कलिरधर्म्मप्रवर्त्तकः अतएव इन्द्रियरूपाः शत्रुवर्गाः वलिनः प्रवलतराः स्वस्वविषयेष्वाकर्षणशूराः श्रियः परमोज्ज्वलायाः भक्तेर्मार्ग इह कलौ कण्टकैः कर्म्मकाण्डशुष्कज्ञानकाण्डकुतर्कवाद-वितण्डा फलगुवैराग्यादिभिः कण्टककोटिप्रायैरुद्धः अतएव हे चैतन्य-चन्द्र ! यदि त्वमद्य कृपां न करोषि तैर्व्विकलोऽहं क्व यामि किं करोमि

कैसी आश्चर्य्य की वात है, श्रीचैतन्यचन्द्रके करुणा रूप महा समुद्र जगत् पूर्ण कर उच्छलित हो उठा, किन्तु में इस प्रकार भाग्य हीन हूँ, मुझपर विन्दु मात्र भी पतित नहीं हुआ ।।४८।।

कलि काल उच्छृङ्खलतापूर्ण काल, अधर्म मार्ग प्रवर्त्तक, अतः इन्द्रियरूप शत्रुवर्ग अतिवलवान्, परम उज्ज्वल भक्ति भी कर्मकाण्ड, शुष्क ज्ञान काण्ड, कुतर्कवाद, वितण्डा फलगु वैराग्यादि रूप कोटि कोटि कण्टक के द्वारा अवरुद्ध है, अतएव हे चैतन्यचन्द्र ! आज यदि दया नहीं करोगे, तव मैं उन सव विपत्तियों से विकल होकर, हाय !

सोऽप्याश्चर्य्यमयः प्रभुर्नयनयोर्यन्नाभवेद्गोचरो
यन्नास्वादि हरेः पदाम्बुजरसस्तद्यद्गतं तद्गतं ।
एतावन्मम तावदस्तु जगतीं येऽन्येऽप्यलं कुर्व्वते
श्रीचैतन्यपदे निखात मनसस्तैर्यत् प्रसङ्गोत्सवः ॥५०॥
दुष्कर्म्मकोटि निरतस्य दुरन्तघोर-
दुर्व्वासनानिगड़शृङ्खलितस्य गाढ़ं ।

इति दैन्येन तत्करुणायोग्यत्वसम्भावनया निन्दा ध्वनिता ॥४९॥

कलिदोषविदुष्टस्य हृषीकाकुलचेतसः ।
ममाद्य शरणं क्वापि न स्याद्गौरकृपां विना ॥४९॥

दैन्येन तद्दर्शन तत्पादपद्मास्वादायोग्यं मत्वा तद्भक्तसङ्गं प्रार्थयते सोऽप्याश्चर्य्यमयः प्रभुरित्यादि । स प्रसिद्धः प्रभुर्गौरहरिः परमचमत्कारस्वरूपः यस्माद्दौर्भाग्यान्नयनयोर्व्विषयो नाभवत् यस्माद्वा गौरहरेः पादाम्बुजयो रसः प्रेमानन्दो नास्वादि नानुभवते स्म तद्यद्गतं तद्गतमेव किन्तु ममैतावदस्तु किं तावत् श्रीचैतन्य पादपद्मे निखातमतिशयेन निविष्टं मनो येषां ते एवम्भूता अन्ये ये जगतीमलंकुर्व्वते तैः सह मत्सङ्गमः समभिव्याहारः श्रीचैतन्यपदारविन्दातिनिविष्टचित्तमधुव्रतैः सहः सङ्गोस्त्वति प्रार्थना ॥५०॥

चैतन्यदर्शनेऽयोग्यस्तत्पादसेवने तथा ।
अतस्तत्पादचित्तैस्तैः सङ्गोऽस्तु विश्वभूषणैः ॥५०॥

स्वदैन्येनातिदुर्गतपतितजनगणोद्धर्त्तृत्वं गौरहरिं विना नास्तीति दर्शयन् स्वनिन्दाप्यभाषते दुष्कर्म्मकोटिनिरतस्य इत्यादि एतादृशस्य

कहाँ जाऊँगा, क्या करूँगा ॥४९॥

उन प्रसिद्ध परम चमत्कार पूर्ण प्रभु श्रीगौरहरि का दर्शन नहीं हुआ, नतो उनके श्रीचरणारविन्द का रसास्वादन ही हुआ, जो हो गया है, उसकी अनुशोचना से कोई लाभ नहीं है । सम्प्रति प्रार्थना यह है कि उन श्रीचैतन्य चरणाम्बुज निविष्ट चेताः तथा भू मण्डल के अलङ्कार स्वरूप जो भक्त गण हैं, उनके सङ्ग मेरा हो।५०

क्लिश्यन्मतेः कुमतिकोटिकदर्थितस्य
गौरं विनाद्य मम को भवितेह बन्धुः ॥५१॥
हा हन्त हन्त परमोषरचित्तभूमौ
व्यर्थी भवन्ति मम साधनकोटयोऽपि ।
सर्व्वात्मना तदहमद्भुतभक्तिबीजं
श्रीगौरचन्द्रचरणं शरणं करोमि ॥५२॥

मम गौरहरिं विना को वाद्य वन्धुरिह कलौ भविष्यति । कीदृशस्य दुष्टानां महापातकादिजनकानां कर्म्मणां कोटिषु निःशेषेण रतस्य यतो दुरन्तेत्यादि । नास्त्यन्तो यासामेवम्भूता घोरा विकटास्त्यक्तुमशक्या या दुर्व्वासनास्ता एव निगड़ाः शृङ्खलास्तैः शृङ्खलितस्य गाढ़ं यथा स्यात्तथा वद्धस्य । ननु दुर्व्वासनया कृतदुष्कृतस्य प्रायश्चित्तादिना शुद्धिः स्यादत आह क्लिश्यन्मते प्रायश्चित्तात्मककर्म्मणि कृत्वा क्लिश्यन्ती क्लेशेनाभिभवं प्राप्नुवन्ती मतिर्यस्य तस्य । ननु तर्हि कथं प्रायश्चित्तादिकमकरोस्तत्राह कुमतिकोटीत्यादि । कुत्सिता मतिर्ज्ञानं येषां ते कुमतयः केवलशुष्ककर्म्माग्रहास्तेषां कोटिभिः संख्याभिः किम्वा तेषामग्रचैरग्रगण्यैः कदर्थितस्य तत्प्रेरणाभिभूतस्य इति स्वनिन्दाभाषेण गौरहरिचरणं विनातिदुर्गतस्य निष्कृतिर्नास्तीति ध्वनितं ॥५१॥

अभक्तसङ्गमुग्धस्य कृतदुष्कृतकर्म्मणः ।
विना गौरपदाम्भोजं नास्त्युधद्धर्त्ता कलौ युगे ॥५१॥

श्रीगौरहर्य्याश्रयं विना सर्व्वाण्यपि साधनानि विफलानि भवन्तीति स्वदैन्य निन्दां व्याजेन प्रकाशयति हा हन्त हन्त परमोषरः

इस कारुण कलियुग में श्रीगौर हरि को छोड़कर आज मेरा बन्धु कौन होगा ? मैं महापातकादि जनक कोटि कर्म में रत हूँ । अशेष घीरतर दुर्वासना रूप शृङ्खल द्वारा बद्ध, क्लेश वृद्धि द्वारा अभिभव प्राप्त एवं कोटि कोटि कुवुद्धि जन के द्वारा कदर्थित हूँ ॥५१

हाय ! मैं आज तक क्या किया, कुछ भी नहीं किया मेरे चित्त रूप ऊषर भूमि में कोटि कोटि साधन भी व्यर्थ हो गए,

हा हन्त चित्तभुवि मे परमोषरायां
सद्भक्तिकल्पलतिकाङ्कुरिता कथं स्यात् ।
हृद्यकमेव परमाश्वसनीयमस्ति
चैतन्यनामकलयन्न कदापि शोच्यः ।।५३।।

चित्तभूमावित्यादि । मम परमोषरायां चित्तरूपायां भूमौ साधनानां कोटयोऽपि व्यर्थी भवन्ति निरर्थका भवन्ति हा हन्त हन्तेति एतावता कालेन किं कृतं न किमपि इति खेदे वीप्सा । तत्तस्मात् सर्व्वात्मनाहं सर्व्वेन्द्रियेण श्रीगौराङ्गचन्द्रस्य चरणपद्मं शरणमाश्रयं करोमि । किम्भूतं अद्‌भुतभक्तिवीजं अद्‌भुतं यद्भक्तेः प्रेमलक्षणाया वीजं । यथान्यवीजानि ऊषरभूमौ लतादिजनकानि न भवन्ति तथान्यसाधनानि व्यर्थी भवन्ति । कर्म्माद्याग्रहकठिनचित्ते गौरपदाश्रयस्य वीजस्याद्‌भुतत्वेन तादृक् कठिनचित्तेऽपि प्रेमलतिकाजनकत्वं अतो गौरचरणशरणं कर्त्तव्यमेव कलाविति स्वदैन्यनिन्दाव्याजेनोक्तं ।।५२

प्रेमभक्तिलतावीजमहो गौरपदाश्रयं ।
विनान्यसाधनं सर्व्वमूषरस्थलवीजवत् ।।५२।।

श्रीचैतन्यनामग्रहणमात्रेणातिकठिना हृदयेष्वपि शुद्धभक्तेरुदयः स्यादिति । स्वदैन्यनिन्दाव्याजेन दर्शयति । हा हन्त चित्तभुवीत्यादि मे मम चित्तरूपायांभुवि परमोषरायां सती व्यभिचारशून्या शुद्धा या भक्तिरेव कल्पलतिका कथमङ्कुरिता स्यात् । हा हन्तेति खेदे । प्रेमलक्षणाया भक्तेः प्रथमावस्थाङ्कुरः रतिरिति यावत् । तथाहि प्रेम्नस्तु प्रथमावस्था भाव इत्युच्यते वुधैरिति । भावोऽत्र रतिरेव । यथोषरमरुभूमौ लताङ्कुरिता न स्यात् । तथा मे चित्तोषरायां भूमौ कथं भक्तिकल्पलतिकाङ्कुरिता स्यात् । चैतन्यनाम कलयन्न-

---

अतएव मैं सर्वेन्द्रिय के द्वारा अद्‌भुत भक्ति वीजस्वरूप श्रीगौरचन्द्र के चरण में शरण ग्रहण करता हूँ ।।५२।।

हाय ! मेरे चित्त रूप ऊषर भूमि मे शुद्ध भक्ति स्वरूपा कल्प लतिका कैसे अङ्कुरिता होगी ? किन्तु एकमात्र आश्वास का विषय

संसारदुःखजलधौ पतितस्य काम-
क्रोधादि-नक्रमकरैः कवलीकृतस्य ।
दुर्व्वासना-निगड़ितस्य निराश्रयस्य
चैतन्यचन्द्र मम देहि पदावलम्वं ।।५४।।
मृग्यापि सा शिवशुकोद्धवनारदाद्यै-
राश्चर्य्यभक्तिपदवी न दवीयसी नः ।

कदापि शोच्यः किन्त्वेकमेत्र केवलमाश्वसनीयं प्रतीति विशेषोऽस्ति हृदये चैतन्यनाम कलयन् गृह्णन् कस्मिन् कालेऽपि न शोच्यः न शोक-विषयोहऽमिति स्वदैन्यनिन्दाव्याजेन चैतन्यनाममहिमा दर्शितः ।।५३

यच्चित्तोषरभूमौ हि न भक्तिलतिकाङ्कुरः ।
चैतन्यनाममात्रेण भक्तिकल्पलताजनि ।।५३।।

दैन्येनातिसंसारित्वमात्मन्युपचर्य्यं स्वनिन्दाः व्यञ्जयन् श्री-चैतन्यपादावलम्वं प्रार्थयते संसारदुःखेत्यादि । संसारे यद्दुखं तदेव जलधिस्तत्र पतितस्य मम हे चैतन्यचन्द्र पादावलम्वं देहि अवलम्वन-प्रार्थने हेतुगर्भमाह निराश्रयस्य निरवलम्वनस्य यथा दार्व्वाद्यव-लम्वनं विना समुद्रस्तर्त्तुमशक्यस्तथा भवदाश्रयं विना संसारजलधि-रपि । ननु हस्तपादैः संतीर्य्य तटं प्राप्नुहि चेत्तत्राह दुर्व्वासनेति दुर्व्वासनया निगड़ितस्य निःशेपवद्धस्य गड़वन्धने धातुः । अतएव कामक्रोधमदमात्सर्य्य मोहाहङ्कारखपैर्नक्रमकरैः कवलीक्रियमानस्य वर्त्तमानेक्तः ।।५४।।

दुःखाब्धिपतितस्याद्य देहि पादाश्रयं मम ।
कामादि-नक्रमकरैरुद्विग्नस्य कृपानिधे ।।५४।।

यह है कि-हृदय मध्य में श्रीचैतन्य नाम ग्रहण करने से किसी भी काल में शोक का विषय नहीं रहता है ।।५३।।

मैं इस संसार में दुर्वासना पाश से निवद्ध होकर दुःख समुद्र में पतित हूँ एवं काम क्रोधादि रूप कुम्भीर मकर द्वारा ग्रस्त हूँ' हे चैतन्यचन्द्र ! इस निराश्रय व्यक्ति को स्वीय चरणावलम्वन प्रदान कीजिये ।।५४।।

दुर्व्वोधवैभवपते मयि पामरेऽपि
चैतन्यचन्द्र यदि ते करुणाकटाक्षः ॥५५॥
क्व सा निरङ्कुशकृपा क्व तद्वैभवमद्भुतं ।

अतिनिगूढ़प्रेमभक्तिपदवीलाभो गौरकरुणयैव नान्यैरिति दर्शयन् स्वनिन्दाव्यञ्जकदैन्येन तत्करुणामाशास्ते मृग्यापीत्यादि । हे चैतन्यचन्द्र तव करुणाकटाक्षः पामरेऽपि मयि यदि स्यात्तर्हि परमाद्भूताया भक्तेः पदवी नोऽस्माकं दवीयसी दूरतरा न किन्तु प्राप्तयै स्यात् किम्भूता शिवादिभिर्मृग्यापि नतु लभ्येति भावः । ननु शिवादिभिर्मृग्याश्चर्य्याभक्तिपदवी मत्कटाक्षमात्रेण लभ्यास्यादेतदाश्चर्य्यं क्व दृष्टं तत्राह दुर्व्वोधेति दुर्व्वोधो ज्ञानाविषयो वैभवमैश्वर्य्यं यस्य तस्य पतिरधीश्वरः हे नव्यभूत पामर इति शब्देन तत् करुणाकटाक्षपातद्योतकेन दैन्यमुक्तं ॥५५॥

देवैरलभ्या या भक्तिपदवी चेद्दया तव ।
पामरेणापि लभ्या सा गौरदुर्ज्ञेयवैतव ॥५५॥

ननु श्रुतिपुराणादिप्रतिपाद्य साक्षाद्भगवदवताराणां नानैश्वर्य्यवतां करुणाप्रार्थनमन्तरेण कथं चैतन्यकारुण्यकटाक्षमाकाङ्क्षसे तत्राह क्व सा निरङ्कुशकृपेत्यादि । हे गौर हे शौरे शूरवंशजात श्रीकृष्ण तव गौरे देहे यादृशी निरङ्कुशा अङ्कुशरहिता वारयितुमशक्या कृपा सा क्व कुत्रापि न । अतिकठिनहृदयमहापापि-दुर्जन दुर्गतजनेषु प्रसक्तत्वात् । एवं गौरदेहे यादृगद्भुतं वैभवमैश्वर्य्यं तादृगपि न कुत्रापि न कुत्रापि दर्शितं तादृश षड्भुजादित्वात् । सा प्रसिद्धा वत्सलता भक्तेषु वात्सल्यं क्व न कुत्रापि । सातु कर्णपूरादौ

हे ज्ञानातीतवैभवाधिपते ! हे चैतन्यचन्द्र ! यदि मादृश पामर जन में करुणाकटाक्षपात होता है, तो शिवादि द्वारा अन्वेषणीय परमाश्चर्य्य भक्ति पदवी भी हम सब से दूरवर्तिनी नहीं होगी ॥५५॥

हे कृष्ण ! आप के गौर देह में यादृशी अनिर्बाच्या कृपा, अद्भुत वैभव एवं वात्सल्य भाव दृष्ट होते हैं, तद्रूप और किसी शरीर

क्व सा वत्सलता शौरे गौरे यादृक् तवात्मनि ।।५६।।

※ अथोपास्यनिष्ठा ※

स्वतेजसा कृष्णपदारविन्द-महारसावेशितविश्वमीश्वरं ।
कमप्यशेष श्रुतिगूढ़वेशं गौराङ्गमङ्गीकुरु मूढ़चेतः ।।५७।।

प्रसिद्धा अतो वात्सल्येन तादृशवैभवमनुभावयित्वा कृपां कुरु मय्य-योग्येऽपीतिभावः ।।५६।।

कृपावैभववात्सल्यमद्भुतञ्च कृपानिधे ।
यत्तत् क्वापि च नास्तीति कुरु गौरहरे कृपां ।।५६।।

।।※।। इति श्रीचैतन्यचन्द्रामृते स्वनिन्दाप्रकरणे षष्ठो विभागः ।।※।

श्रुतिस्मृतिपुराणादिप्रमाणप्रतिपन्न-कलियुगोपास्यत्वेन परम-विद्वच्छिरोमणिसार्व्वभौमादि-तत्तदैश्वर्य्यानुभवविषयत्वेन स्वानुभव-दार्ढ्येन च भगवतः श्रीकृष्णचैतन्यदेवस्योपास्यत्वं निश्चिन्वानः स्वो-पास्यनिष्ठामाहात्मोपास्यनिष्ठेति च त्रयोविंशत्या पदैः। तत्र प्रथमं मनोनुशासनेन तत्पदाश्रयणमाह। स्वतेजसा कृष्णेत्यादि । हे मूढ़चेतः गौराङ्गमीश्वरं स्वीकुरु तच्चरणारविन्दमाश्रय। किम्भूतं येन प्रभावेन स्वस्वरूपस्य कृष्णस्य पादपद्ममहारसेनावेशितमनुरक्ती-कृतं विश्वं येन तं। पुनः किम्भूतं अशेषाणां श्रुतीनां गूढ़ं यथा स्याद्वेशः प्रवेशो यत्र। यद्वा। अशेषाभिः श्रुतिभिर्गूढ़ं आच्छन्नो वेशः प्रवेशो यत्र तं। अतएव कमपि कैरपि अनिर्व्वचनीयमपि किन्तु तत्करुणा कटाक्षभाग्भिर्निर्व्वचनीयमित्यर्थः। अतएवम्भूतो गौरहरिरेव समो-पास्य इति ध्वनितं ।।५७।।

में नहीं है, अर्थात् श्रीकृष्ण आदि अवतार में ऐसी कृपा आपने नहीं की ।।५६।।

※ अथ उपास्यनिष्ठा ※

हे मूढ़ चित्त ! जो निज प्रभाव से स्व स्वरूप श्रीकृष्णपदार विन्द मकरन्द द्वारा जगत् को अनुरागी किए हैं, एवं जिस में अशेष श्रुतियों का प्रच्छन्न प्रवेश है, उन अनिर्वचनीय श्रीगौराङ्ग देव को

श्रवणमननसङ्कीर्त्यादिभक्त्या मुरारे
र्यदि परमपुमर्थं साधयेत् कोऽपि भद्रं ।
मम तु परमपारप्रेमपीयूषसिन्धोः
किमपि रसरहस्यं गौरधाम्नोनमस्यं ॥५८॥
ईशं भजन्तु पुरुषार्थचतुष्टयाशा
दासा भवन्तु च विहाय हरेरुपास्यान् ।

कृष्णप्रेमाविष्टविश्वं श्रुतिगूढ़ं गौरहरिं ।
भज रे मूढ़ मे चित्त हित्वान्यं जगदीश्वरं ॥५७॥

श्रीकृष्णभक्तमप्याक्षिपन् स्वोपास्यनिष्ठामाह । श्रवण-मननेत्यादि कोऽपि मुरारिभक्तः मुरारेः श्रीकृष्णस्य श्रवणादिसाधन-भक्त्या परमपुमर्थं प्रेमाणं यदि साधयेत्तर्हि भद्रं साधयतु मम पुनर्गौर-धाम्नो हरेर्भक्तिरसेषु यद्रहस्यं प्रेमवस्तु परं केवलं आदरणीयत्वेन भजनीयं गौरं गौरवर्णधाम कान्तिर्यस्य तस्य हरेः। किम्भूतस्य अपारे इत्यादि। पाररहितप्रेमरूपस्य पीयूषस्य सिन्धुस्तस्य ॥५८॥

श्रीकृष्णप्रेमप्राप्त्यर्थं अन्येषामन्यसाधनं ।
मम तु श्रीगौरहरेर्भजनीयं पदाम्बुजं ॥५८॥

श्रीचैतन्यचरणस्मरणं विना एकान्तदासभक्ता अप्यपरिचित-रहस्याः किं पुनः साभिलाषभक्तानां कथेति दर्शयन् स्वोपास्यनिष्ठा-माह। ईशं भजन्तु पुरुषार्थ इत्यादि। पुरुषार्थचतुष्टयेषु धर्म्मार्थ-

---

ईश्वर रूप से अङ्गीकार करो ॥५७॥

यदि कोई मुरारि भक्त मुरारि श्रीकृष्ण के श्रवण कीर्त्तनादि नवविध साधन भक्ति द्वारा परम पुरुषार्थ प्रेम साधन करें तो मङ्गल है, किन्तु मेरेलिए अपार प्रेम सुधासिन्धु स्वरूप श्रीगौरहरि के भक्ति रस जो अति रहस्य प्रेमवस्तु है, वह ही आदरणीय रूप से भजनीय है, अर्थात् में आदर से गौर भक्ति रस में ही मग्न रहूँगा ॥५८॥

जो कोई मनुष्य धर्म, अर्थ, काम, मोक्ष, इन पुरुषार्थ चतुष्टय अभिलाषी होकर श्रीकृष्ण भजन करें अथवा अन्य उपास्य आराधना

किञ्चिद्रहस्यपदलोभितधीरहन्तु
चैतन्यचन्द्रचरणं शरणं करोमि ॥५६॥
निष्ठां प्राप्ता व्यवहृतिततिर्लौकिकी वैदिकी वा
या वा लज्जाप्रहसनसमुद्गाननाट्योत्सवेषु ।
ये वाभूवन्नहह सहजप्राणदेहार्थधर्म्मा
गौरश्चौरः सकलमहरत् कोऽपि मे तीव्रवीर्य्यः ॥६०॥

काममोक्षेष्वाश। मनोरथो येषां ते ईशं श्रीकृष्णं भजन्तु तेषां का कथा अन्यानुपास्यान् विहाय त्यक्त्वा हरेः कृष्णस्यैकान्तदासा अपि भवन्तु ये केऽपि। अहं पुनश्चैतन्यचन्द्रस्य चरणं आश्रयं करोमि। तत्र हेतुभूतविशेषणमाह किञ्चिद्रहस्यपदलोभितधीः किञ्चिदतिदुर्लभां रहस्यं श्रीवृन्दावनेश्वरयोर्निगूढ़प्रेमरसास्वादनं तस्य पदे विषये लोभिता धीर्यस्य सोऽहं ॥५६॥

तुच्छीकृतचतुर्वर्गा हरेरेकान्तदासकाः ।
न प्रापुस्ते यद्रहस्य तल्लाभो गौरपादतः ॥५६॥

ननु लौकिकवैदिकादिव्यवहारपरमार्थादिकं सर्व्वं त्यक्त्वा कथमत्रैवानुरक्तोसीत्यस्य प्रत्युत्तरेण स्वोपास्यनिष्ठामाह निष्ठां प्राप्ता व्यवहृतिततिरित्यादि। कोऽपि गौररूपश्चौरो मे मम सकलमेवाहरत् हृतवान्। ननु सावधानस्य तव कथं हृतवान् तत्राह तीव्रवीर्य्यः अतिशय प्रभाववान् अतो वलाद्धृतवानित्यर्थः। किं किं हृतवान् तत्राह व्यवहृतिततिरित्यादि। लोक सम्वन्धिनी वेदसम्वन्धिनी वा सनिष्ठां प्राप्ता या व्यवहारश्रेणी तां एवं प्रकृष्टहास सम्यगूर्द्ध्वगान नाट्योत्सवेषु या वा लज्जा तामपि स्वाभाविकाः प्राणदेहानां निमित्त

को छोड़कर श्रीकृष्ण के एकान्त दास होते हैं, किन्तु मैं अति दुर्लभ विषय में अर्थात् श्रीराधा कृष्ण के निगूढ़ प्रेमरसास्वादन विषय में लोभित वुद्धि होकर श्रीचैतन्य चन्द्र के चरणों का आश्रय लेता हूँ ५६

अतिशय वलवान् किसी गौरमूर्त्तिने हमारी निष्ठाप्राप्त लौकिक वैदिक व्यवहार की श्रेणी, प्रहसन, उच्चैः स्वर से सङ्कीर्त्तन, नृत्यादि

सान्द्रानन्दोज्ज्वलरससमयप्रेमपीयूषसिन्धोः
कोटिं वर्षन् किमपि करुणास्निग्ध नेत्राञ्चलेन ।
कोऽयं देवः कनककदलीगर्भ गौराङ्गयष्टि-
श्चेतोऽकस्मान्मम निजपदे गाढ़युक्तं चकार ।।६१।

भूता ये धर्म्मास्तानपि हृतवान् अतोऽहं शरणं प्रविशामि येन स आत्म सात् कृत्वा स्वपदप्रेमधनादिदत्त्वा तत्रैव स्थापयेदिति स्वोपास्य निष्ठा ।।६०।।

वलाल्लाजा व्यवहृति प्राणदेहार्थधर्म्मकाः ।
एते मेऽपहृता येन तं गौरहरिमाश्रये ।।६०।।

ननु परमगाम्भीर्य्यशीलो भवान् अविचारेणाविलम्वेन तत्रैव कथमनुरक्तोऽस्ति तत्राह सान्द्रानन्दोज्ज्वल इत्यादि । अयं देवः कोऽप्यनिर्व्वचनीयः स्वपदारविन्देऽकस्मान्मम चित्तं दृढ़ेन युक्तं चकार कृतवान् किं कुर्व्वन् करुणास्निग्धनेत्राञ्चलेन सान्द्रानन्दोज्ज्वलरसमय प्रेमपीयूषसिन्धोः कोटिं किमपि अनिर्व्वचनीयं यथा स्यात् तथा वर्षन् निविड़ आनन्दो यत्र एवम्भूत उज्जलनवरसो यत्र तादृक् यः प्रेमा स एवार्थः । करुणया स्निग्धो यो नेत्राञ्चलस्तेन । कारुण्यचमत्कार मुक्त्वा शोभा चमत्कारमाह कनककदलीति । हेमकदल्यागर्व्भ इव गौरी अङ्गयष्टिर्यस्य सः ।।६१।।

कारुण्यप्रेमपीयूषसिन्धुमग्नीकृतं जगत् ।
हेमरम्भागर्व्भगौरहरिर्मेहृतवान् मनः ।।६१।।

विषयकलज्जा, प्राण देहादि के कारण स्वरूप धर्म समूह को अपहरण कर लिया है ।।६०।।

जिन की अङ्गयष्टि कनक कदल के गर्भ के समान गौरवर्ण है, जो करुणा स्निग्ध नेत्र प्रान्त के द्वारा निविड़ उज्ज्वलरसमय प्रेमरूप सुधासिन्धु कोटि को वर्षाते रहते हैं, इस प्रकार किसी अनिर्वचनीय देव अकस्मात् हमारे चित्त को निज चरणारविन्द में दृढ़ रूप में नियुक्त कर दिया है ।।६१।।

स्वयं देवो यत्र द्रुतकनकगौरः करुणया ।
महाप्रेमानन्दोज्ज्वलरसवपुः प्रादुरभवत्
नवद्वीपे तस्मिन् प्रतिभवनभक्त्युत्सवमये
मनो मे वैकुण्ठादपि च मधुरे धाम्नि रमते ॥६२॥

श्रीनवद्वीपस्थगौरहरिः कैशोरादि परमचमत्कारलीलामाधुरीं स्मृत्वा मनोविलासाकाङ्क्षत्वे स्वोपास्यनिष्ठां दर्शयति स्वयं देवो यत्रेत्यादि । मम मनः तस्मिन् प्रसिद्धे श्रीनवद्वीपे धाम्नि स्थाने रमते-विलसति किम्भूते यत्र नवद्वीपे स्वयं देवो भगवान् प्रादुरभवत् करुणया हेतुभूतया । किम्भूतं द्रुतकनकगौरः तप्तकाञ्चनगौराङ्गः । पुनः कीदृक् महाप्रेमा महानुद्भूटप्रेमा यस्मात् स महाप्रेमा । पुनः किम्भूतः आनन्दस्वरूपः शृङ्गाररसस्वरूपश्च वपुर्यस्य सः । यद्वा महेत्यादि वपूरित्यन्तमेकं पदं । महाप्रेमा महाभावस्तत् स्वरूपमानन्द स्वरूपमुज्ज्वलरसस्वरूपश्च वपुर्यस्य सः श्रीराधिकास्वरूपत्वात् । नवद्वीपे किम्भूते प्रतिभवनेत्यादि । भवनं भवनं प्रति प्रतिभवनं प्रति-गृहं भक्त्याः प्रेमभक्तिदेव्याः य उत्सवस्तन्मये तत्प्रचुरे । तथाहि चैतन्यचन्द्रोदयनाटके विरागं प्रति गगनवाणी । गौड़क्षौणी जयति कतमा पुण्यतीर्थावतंसाप्रायाय्यसौ वहति नगरीं श्रीनवद्वीपनाम्नीं यस्यां चामीकरचयरुचिरीश्वरस्यावतारो यस्मिन्मर्त्याः पुरि पुरि परिस्पन्दते भक्तिदेवीति । पुनः किम्भूते वैकुण्ठादपि माधुर्य्यविशिष्टे चकाराद्गोलोकादपि मधुरे ॥६२॥

परव्योमादितः श्रेष्ठे प्रेमभक्तिविलासके ।
गौरकृष्णावतारे श्रीनवद्वीपे मनश्चल ॥६२॥

तप्त काञ्चन के समान गौरवर्ण स्वयं भगवान् अतिशय प्रेमानन्द और श्रीराधिका के स्वरूप प्रयुक्त शृङ्गार रसमय शरीर विशिष्ट होकर करुणावश जहाँपर आविर्भूत हुए थे, एवं जिस स्थान में प्रेम रूपा भक्ति देवी का उत्सवपूर्ण प्रति गृह हैं, और जिस स्थान वैकुण्ठ की अपेक्षा भी माधुर्य्यमय है, उन प्रसिद्ध नवद्वीप धाम में मेरा मन विलसित है ॥६२॥

यत्तद्वदन्तु शास्त्राणि यत्तद्व्याख्यान्तु तार्किकाः ।
जीवनं मम चैतन्यपादाम्भोजसुधैव तु ।।६३।।
पतन्ति यदि सिद्धयः करतले स्वयं दुर्ल्लभाः
स्वयञ्च यदि सेवकी भवितुमागताः स्युः सुराः ।
किमन्यदिदमेव वा यदि चतुर्भुजं स्याद्वपु-
स्तथापि मम नो मनाक् चलति गौरचन्द्रान्मनः ।।६४।।

रागाध्वपान्थः लोभोत्पत्तिपरिपाट्या स्वनिष्ठामाह यत्तद्व-दन्त्वित्यादि । शास्त्राणि विधिवाक्यानि यच्च तच्च वदन्तु तार्कि-कास्तर्कमधीतवन्तो यत्तत् व्याख्यान्तु युक्तिं कुर्व्वन्तु मम जीवनन्तु चैतन्यपादाम्वुजसुधैव नान्यदिति स्वनिष्ठा गाढ़ः ।।६३।।

वदन्तु विधिवाक्यानि युक्तिं कुर्व्वन्तु तार्किकाः ।
अहन्तु गौरपादाब्जं विनान्यत् क्वापि नाश्रये ।।६३।।

गौरहरिपदाम्वुजभक्तानां मनस्तस्मादन्यत्र कुत्रापि न चलतीति दर्शयन् तथैवच स्वनिष्ठामाह पतन्ति यदि सिद्धय इत्यादि । अणि-मादयोऽष्टाऽतिदुर्लभाः सिद्धयः स्वयं करतले पतन्ति सुरा देवाश्च यदि स्वयं सेवकीभवितुमागताः स्युः । अन्यत् किं इदं मम वपुर्यदि चतुर्भुजं स्यात् तथापि मम मनः कदापि ममागल्पमपि नोचलतीति निष्ठा प्रगाढ़ता ।।६४।।

सिद्धयः स्युः करस्थाश्चेत् भवेयुः सेवकाः सुराः ।
चतुर्व्वाहुवपुश्चेन्मे तथापि न चलेन्मनः ।
श्रीगौरहरिपदाम्वुजादिति शेषः ।।६४।।

शास्त्र समूह जो कुछ कहते हैं, कहें, तार्किकगण जैसी व्याख्या करते हैं, करें, किन्तु श्रीचैतन्य चरणारविन्द की सुधा ही मेरा जीवन स्वरूप है ।।६३।।

अति दुर्लभ अणिमादि सिद्धि समूह यदि स्वयं हस्तगत हो, और देवतागण किङ्कर होने के लिए यदि स्वयं आगमन करते हैं, अन्य और क्या कहें, मेरा यह शरीर यदि चतुर्भुज हो जाता है, तथापि मेरा मन श्रीगौरचन्द्र से किञ्चिन्मात्र भी विचलित नहीं होगा

वासो मे वरमस्तु घोरदहनज्वालावलीपञ्जरे
श्रीचैतन्यपदारविन्दविमुखैर्मा कुत्रचित् सङ्गमः ।
वैकुण्ठादिपदं स्वयञ्च मिलितं नो मे मनोलिप्सते
पानाम्भोजरजश्छटा यदि मनाक् गौरस्य नोरस्यते ॥६५।
आस्तां नाम महान् महानिति वरं सर्व्वक्षमामण्डले
लोके वा प्रकटास्तु नाम महती सिद्धिश्चमत् कारिणी ।

दुःखातिदुःखदचैतन्यविमुखसङ्गो न जातु कर्त्तव्यइति श्रीचैतन्यचरणारविन्द भजनसुखं स्वयं मिलित वैकुण्ठादावपि नास्तीति च दर्शयन् स्वोपास्यनिष्ठामाह । वासो मे वरमस्त्वित्यादि । घोरा या दहनस्य वह्नेर्ज्वालास्तासामावली तस्याः पञ्जरे वरं वासोऽस्तु श्रीचैतन्यपदारविन्दात् ये विमुखास्तैः सह कुत्रचित् समयेऽपि सङ्गमो मास्तु । ननु श्रीचैतन्यविमुखसम्मुखविचारेणालं श्रीवैकुण्ठ-प्राप्ति साधनानि क्रियन्तां तत्राह वैकुण्ठेत्यादि । गौरस्य भगवतः पादाम्भोजस्य छटा मनगल्पमपि यदि नो रस्यते नास्वाद्यते तर्हि ये मम मनः साधनानि विनादि यदि स्वयं वैकुण्ठादि स्थानं मिलितं स्यात् तथापि न लिप्सते न लब्धुमिच्छति ॥६५॥

वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः ।
मास्तु गौरपदाम्भोजविमुखैः सह सङ्गमः ॥६५॥

श्रीचैतन्योपासनं विना अन्योपासकान् कटाक्षयन् स्वोपास्यनिष्ठपराकाष्ठामाह । आस्तामित्यादि । सर्व्वं पृथ्वीमण्डलेऽयं मनानयं

यदि भयङ्कर अग्निशिखाराशि पञ्जर में मेरा निवास हो, वह भी उत्तम होगा, तथापि श्रीचैतन्यपदारविन्द विमुख व्यक्ति गण के साथ कभी भी मेरा सङ्ग न हो, और यदि मेरा मन उनके पादपद्म रजः कण की आस्वादन अत्यल्प भी करे, तब स्वयं प्राप्त वैकुण्ठादि स्थान प्राप्ति की इच्छा वह नहीं करेगा ॥६५॥

मेरा मन श्रीगौरहरि को भक्ति को छोड़कर पृथ्वी मण्डल में अति महत् ख्याति अथवा प्रकटीभूत चमत् कारिणी महती सिद्धि,

कामं चारुचतुर्भुजत्वमयतामाराध्य विश्वेश्वरं
चेतो मे वहुमन्यते नहि नहि श्रीगौरभक्तिं विना ॥६६॥
चैतन्येति कृपामयेति परमोदारेति नानाविध-
प्रेमावेशित सर्व्वभूतहृदयेत्याश्चर्य्यधामन्निति ।

महानिति महान्त इति वरं ख्यातिरास्तां नाम। एवं महती चिरकालस्थायिनी अथच चमत्कारिणी सिद्धिर्वा लोके भूतले प्रकटास्तु नामावश्यं। किम्वा विश्वेश्वरं विष्णुमाराध्य साभिलाषं मनोहरः चतुर्भुजत्वमयतां गच्छतु तथापि मम चेतः श्रीगौरहरिभक्ति विना पूर्व्वोक्तं सर्व्वं न वहु मन्यते। नहि नहीति वीप्सातिशय-दाढर्यार्थमिति गौरोपासनमेव परं ॥६६॥

लोके महत्त्वविख्यातिः परमा परमाद्भुता ।
सिद्धिश्चतुर्भुजत्वञ्च वृथा गौराश्रयं विना ॥६६

अस्मिन् कलौ श्रीचैतन्यनामान्येव ग्रहणीयानि तेषामेव परम-पुरुषार्थप्रेमसाधकत्वादिति दर्शयन् तदुपासननिष्ठत्वेन तन्नाम्नां जपमेव प्रार्थयते। चैतन्येत्यादि। हे चैतन्य हे कृपामय हे परमोदार हे नानाविधप्रेमावेशितसर्व्वभूतहृदय हे आश्चर्य्यधामन् हे गौराङ्ग हे गुणार्णव हे रसरूप हे स्वनामप्रिय उपलक्षणयान्यान्यपि हे शची-नन्दन हे विश्वम्भर हे नवद्वीपचन्द्र हे गौरविधो हे कलियुगपावना-वतार हे पतितप्रेमद हे भक्तवत्सल हे स्वप्रेमोत्सवेत्यादि। नामान्य-विरतं जल्पतोममेयं जनिर्जन्म पायादित्येवाहं प्रार्थये नान्यत्। नामार्थश्च चैतन्य सच्चिदानन्दमय। अथवा सर्व्वेषां चित्तं पश्यति किम्वा गृह्णाति आकर्षतीति चैतन्यः। यद्वा। सर्व्वेषामुपलब्धौ

किम्वा विश्वेश्वर विष्णु की आराधना से मनोहर चतुर्भुजत्व प्राप्ति प्रभृति को महत्त्व नहीं देता ॥६६॥

हे चैतन्य! हे कृपामय! हे परमोहार! हे विविध प्रेम से सर्व प्राणियों के हृदय में प्रवेशकारिन्! हे आश्चर्य्यधामन्! हे गौराङ्ग! हे गुणसागर! हे रसरूप! हे स्वनामप्रिय! इत्यादि नाम

गौराङ्गेति गुणार्णवेति रसरूपेति स्वनामप्रिये-
त्यश्रान्तं मम जल्पतो जनिरियं यायादिति प्रार्थये ।।६७।।
कदा शौरे गौरे वपुषि परमप्रेमरसदे
सदेकप्राणे निष्कपटकृतभावोऽस्मि भविता ।
कदा वा तस्यालौकिकसदनुमानेन मम हृ-
द्यकस्मात् श्रीराधापदनखमणिज्योतिरुदगात् ।।६८।।

निवसति चैतन्यः ! हे तथाभूत । कृपामय कृपाप्रचुर किम्वा कृपास्वरूप तत्स्वरूपे प्राचुर्य्ये च मयट्विधानात् । परमोदार सर्व्वदातृशिरोमणे पतितेभ्योऽपि प्रेमदातृत्वात् । नानाविधेषु शान्त दास्य सख्य वात्सल्य मधुरेषु प्रेमषु आवेशितानि सर्व्वेषां भूतानां हृदयानि येन हे तथाभूत आश्चर्य्यं परमचमत्कारकारि धाम तप्तकाञ्चनवत् कान्तिर्यस्य स हे तथाभूत ! गौरं पीतमङ्गं यस्य । रसरूप शृङ्गाररसरूप । नामानि प्रियानि यस्य हे तथाभूत ।।६७।।

कृष्णचैतन्य गौराङ्ग विश्वम्भर शचीसुत ।
अवधौतप्रिय प्रेमसिन्धो कुरुकृपां मयि ।।६७।।

यस्य गौरहरौ निष्कपटप्रेमा स्यात्तस्यैव हृदये श्रीराधिकापद-नखमणि ज्योतिरुदयति नान्यस्येति प्रतिपादयन् तदेवासाधारणमनु-मानं प्रमाणयति कदा शौरे गौरे इत्यादि । हे शौरे श्रीकृष्ण तव गौरे वपुषि कदा कस्मिन् काले निष्कपट कृतभावो भवितास्मीत्यन्वयः अकैतवेन कृतो भावः । प्रेमा येन सोऽहं । ननु श्यामसुन्दरे वपुषि भावमकृत्वा गौरे कथं तच्चिकीर्षा तत्र हेतुमाह । वपुषि किम्भूते परमप्रेमरसदे अत्युत्कृष्टं प्रेमरसं ददाति तस्मिन् यतएवम्भूते अतएव सदेकप्राणे सतां तादृशप्रेमरसवतामसाधारण प्राणस्वरूपे हे शौरे इति

का कीर्त्तन अविरत करते करते आयु अति वाहित हो, मेरी यही प्रार्थना है, अपर कुछ भी नहीं चाहते हैं ।।६७।।

हे कृष्ण ! प्रेम रस निष्ठव्यक्तियों के असाधारण प्रेम स्वरूप अत्युत्कृष्ट प्रेम रसदायक आपके गौर देह में मेरा अकपट भाव कब

उद्दामदामनकदामगणाभिराम-मारामराममदिरामगृहीतनाम ।
कारुण्यधामकनकोज्ज्वलगौरधाम चैतन्यनाम परमं कलयाम धाम ६९

सम्वोधनं निष्कपट कृतभावाय कारुण्यदाने वीरत्वसूचनम् तस्य निष्कपटभावस्यालौकिकेन वाह्येन्द्रियागोचरेण सतां यथार्थेनानुमानेन श्रीराधायाः पादयो र्ये नखमणयस्तेषां ज्योतिर्मम हृदि हठात् कदा वा कस्मिन् काले वा उदगात् उदेष्यति भूतविहिताश्च कर्हि कदाभ्यां वेति भविष्यत् काले अद्यतनी प्रत्ययः । अनुमानं यथा इदं हृदयं गौरहरिविषयक भाववत् श्रीराधापदनखमणिज्योतिरुदगात् । यत् श्रीराधापदनखमणिज्योतिरुदयात् तच्चैतन्यविषयक भाववद्यथा गौरभक्तहृदयमिति व्याप्तिः । यत्तादृश प्रेमाभाववत् तत्तादृश ज्योतिरुदयाभाववदिति व्यतिरेकी । यथा गौराभक्तहृदयं । अत्र लौकिकदृष्टान्तः । यथा पर्व्वतोवह्निमान् धूमवत्वात् योयो धूमवान् स सवह्निमान् यथा महानसं यो वह्न्यभाववान् स धूमाभाववान् यथा जलह्रदः ॥६८॥

श्रीमद्गौराङ्गविषयभावो यत्र न विद्यते ।
तत्र श्रीराधिकापादपद्मे जातु रतिर्न हि ॥६८॥

इदानीं ध्यानमाह तत्र रूपध्यानं उद्दामेति । चैतन्य इति नाम यस्य तद्धाम ज्योतिः परमं सर्व्वोत्कृष्टं कलयाम चिन्तयाम । किम्भूतं उद्दाम दामनक दाम उद्दामानि प्रफुल्लोत्कृष्टानि दामनकानि दामनकपुष्पाणि तत्सम्वन्धि दाममाला यस्य तत् । पुनः किम्भूतं गणाभिरामं गणान् जनसमूहान् । अभितो रमयत्यानन्दयतीति तत् पुनः किम्भूतं आरामरामं आरामे उपवने निर्जन स्थाने स्मरणेन

होगा, एवं कव श्रीराधा के उस अकपट भाव का अलौकिक अनुमान द्वारा श्रीराधिका के पद नख मणि ज्योति का अकस्मात् उदय मेरे हृदय में होगा ॥६८॥

जो प्रफुल्ल दमन के पुष्प माला से शोभित हैं, मनुष्यों को आनन्द दायक हैं, उपवन में आत्माभिराम अविरत हरेकृष्ण प्रभृति

सदा रङ्गे नीलाचलशिखरशृङ्गे विलसतो
हरेरेव भ्राजन्मुखकमलभृङ्गेक्षणयुगं ।
समुत्तुङ्गप्रेमोन्मदरसतरङ्गं मृगदृशा ?
मनङ्गं गौराङ्गं स्मरतु गतसङ्गं मम मनः ।।७०।।

रमयत्यात्मानं सुखयतीति तत् । पुनः कीदृक् अविराम गृहीत नाम अविरामं सततं गृहीतानि हरेकृष्ण इत्यादीनि नामानि येन तत् । कारुण्यधाम करुणायाः स्थानं । कनकोज्ज्वलगौरधाम कनकेभ्योऽपि गौरं पीतं धाम कान्तिर्यस्य तत् ।।६६।।

गौरं दामनकोद्दाम माल्यमाराम रामकं ।
प्रगृहीत हरेकृष्ण नाम धाम मनः स्मर ।।६६।।

नीलाचलाचलस्वमूर्त्तिमाधुरीधुरीणास्वादनचमत्कारकारिरूप माधुरीं ध्यायति सदा रङ्ग इत्यादि मम मनः श्रीगौराङ्गं स्मरतु । किम्भूतं गतः सङ्गो विषयाशक्तिर्यस्य परमवैराग्यवन्तमित्यर्थः । पुनः किम्भुतं हरेः श्रीकृष्णस्य भ्राजद्दे दीप्यमानं यन्मुखकमलं तस्मिन्नेव भृङ्गरूपं नेत्रयुगं यस्य तं । हरेः किम्भूतस्य नीलाचलस्य शृङ्गे मूर्द्धनि सर्व्वदोत्सवयुक्ते विलसतो विहार कुर्व्वतः । पुनः किम्भूतं समुत्तुङ्ग प्रेमोन्मदरसतरङ्गं समुत्तुङ्गः परममहान् यः प्रेमा तस्य उद्-गतो मदो यस्सात् एवम्भूतो यो रसस्तेन तरङ्गः लहरी यस्य तं । अथ च मृगदृशां युवतीनां साक्षात् कन्दर्पस्वरूपं ।।७०।।

श्रीनीलाचलशृङ्गे स्वमुखपद्मार्पितेक्षणं ।
महाभावतरङ्गाढ्यं गौराङ्गं स्मर मे मनः ।।७०।।

नाम जपकारि, करुणा का आधार स्वर्णोज्ज्वल कान्ति युक्त हैं, उन श्रीचैतन्य नामक परम ज्योति का ध्यान हम सब करतेहैं, ।।६६।।

उत्सव पूर्ण नीलाचल के शिखर देश में विहरण शील श्रीहरि के मुख कमल में जिन के नयन युगल भृङ्ग स्वरूप हुए हैं, जिन के हृदय में प्रेमरस तरङ्ग प्रवाहित है, एवं जो मृगनयनीललना की दृष्टि मैं साक्षात् कन्दर्प स्वरूप हैं, मेरा मन उन परम वैराग्य सम्पन्न श्री-

अलङ्कारः पङ्केरुहनयननिःस्यन्दिपयसां
स्पृषद्भिः सन्मुक्ताफलसुललितैर्यस्य वपुषि ।
उदञ्चद्भिरोमाञ्चैरपि च परमा यस्य सुषमा
तमालम्बे गौरं हरिमरुणरोचिष्णुवसनं ॥७१॥
कन्दर्पादपि सुन्दरः सुरसरित्पूरादहोपावनः
शीतांशोरपि शीतलः सुमधुरोमाध्वीकसारादपि ।

उद्दीप्तसात्त्विकभावालङ्कृतत्वेन परमशोभावदालम्वनमाह । अलङ्कारः पङ्केरुहेत्यादि । तं गौरहरिमालम्वे अन्तःकरणे चिन्तयामि किम्भूतं अरुणरोचिष्णु वसनं । अरुणं रोचनं स्वभावं वसनं यस्य तं । पङ्केरुह इव ये नयने ताभ्यां निःस्यन्दीनि निःसरणशीलानि यानि पयांसि तेषां पृषद्भिर्विन्दुभिर्यस्य वपुषि श्रीयुक्ताङ्गेऽलङ्कारस्तं पृषद्भिः किम्भुतैः सन् मुक्ताफल सुललितैः सन्ति पृष्टवर्त्तुलाकाराणि यानि मुक्ताफलानि तेभ्योऽपि सुललितै रतिमनोहरैः । एवमुदश्चद्भिरूर्ध्वं गच्छद्भीरोमाञ्चैरपि यस्य वपुषि परमोशोभा तं ॥७१॥

मुक्ताफलसदृङ् नेत्र वारिविन्दुविभूषितं ।
रोमाञ्च सुषमं शोणवस्त्रं गौरहरिं भजे ॥७१॥

श्रीगौरहरेः सौन्दर्य्यं पावनत्व शीतलत्व माधुर्य्यदातृत्व स्निग्धत्वान्युपमानातिरिक्तान्यनुभुय तच्चिन्तया तत्पदाम्वुजस्फूर्त्ति-माशास्ते कन्दर्पादपीत्यादि । एवम्भूतो गौरहरिर्ध्यातो ध्यानविषयी-भूतः सन्नु भो कदा मम हृदये प्रेम्ना स्नेहेन पदं ध्यास्यति अर्पयिष्यति

गौराङ्ग देव का स्मरण करे ॥७०॥

अरुण वर्ण वसन, नयन पद्म से निःसृत मनोहर मुक्ताफल सदृश अश्रुविन्दु एवं उद्गत रोमाञ्च जिनके श्रीअङ्ग में अलंकार के समान शोभासम्पादन कर रहा है, मैं उन श्रीगौर हरि की चिन्ता हृदय में करूँ ॥७१॥

जो कन्दर्प से भी सुन्दर, गङ्गा प्रवाह से भी पवित्र, चन्द्र से भी सुशीतल, अमृत से भी सुमधुर, कल्प वृक्ष से भी दाता, जननी

दाता कल्पमहीरुहादपि महास्निग्धो जनन्या अपि
प्रेम्ना गौरहरिः कदानु हृदि मे ध्यातः पदं धास्यति ॥७२॥
पुञ्जं पुञ्जं मधुरमधुरप्रेममाध्वीरसानां
दत्त्वा दत्त्वा स्वयमुरुदयो मोदयन् विश्वमेतत् ।

किम्भुतः कन्दर्पादपि सुन्दरः कं ब्रह्माणं दर्पयति पृषोदरादित्वान्मकारागमे कन्दर्पस्तस्मादपि सुन्दरः मनोहरः कन्दर्पमोहकत्वात् । कन्दर्पस्तावदुद्वेजको मोहकश्च गौरहरिसौन्दर्य्यन्तु तदुद्वेगमोहौ नाशयित्वा परमप्रेमानन्दसुखमनुभावयतीति सौन्दर्य्यचमत्कारः । पावनत्वचमत्कारमाह । सुरसरिद्गङ्गा सर्व्वपावनश्रेष्ठा तस्याः पूरात्प्रवाहादपि पावनः । अहो आश्चर्य्यं गङ्गाप्रवाहः पापानि नाशयति न पुनः पापहृदयं । अयन्तु हृदयं शोधयित्वा परमप्रेमाणं स्थापयतीति चमत्कारः । शीतांशोश्चन्द्रादपि शीतलः । चन्द्रस्तु बाह्यतमस्तापादिनाशकः । अयन्तु अन्तस्तमस्तापनाशनपूर्व्वकानन्दजनकः । माध्वीकसारादमृतादपि मधुरः । अमृतमाधुर्य्यं देवैरनुभूयते तत्पानेन प्राकृतगर्व्वं मत्सरतादि भवति गौरमाधुर्य्यं देवैर्दुर्ल्लभं । एतदास्वादनन्तु प्राकृतगर्व्वमत्सरादिरयित्वा परमप्रेमानन्दं जनयति । कल्पवृक्षादपि दाता । स तु प्रार्थितः सन् प्रार्थितं ददाति । अयन्तु करुणया स्वयमयोग्यायाप्रार्थितप्रेमादि ददाति । जनन्या अपि स्निग्धः जननीतु स्वापत्येषु स्निह्यति । अयन्तु प्राणिमात्रे ॥७२॥

स्मर गङ्गेन्दुमाध्वीकसुरपादपमातृतः ।
अद्भुत श्रीपवित्रादि यस्य तं गौरमाश्रये ॥७२॥

निगूढोज्ज्वलप्रेमरसपुञ्जदानवीप्सया विश्वमोदकत्वेन मनोरमरूपत्वेन च प्रसक्तां प्रीतिं प्रकटयति । पुञ्जं पुञ्जमित्यादि ।

से भी महास्नेहवान् वे श्रीगौरहरि चिन्तित होकर स्नेह से कब मेरे हृदय में पदार्पण करेंगे ॥७२॥

जो स्वयं अतिमधुर माध्वी रस के पुञ्ज पुञ्ज दानकर विश्व को आनन्दित करते रहते हैं, जिन्होंने कटितट में मनोहर अरुण वसन

एकोदेवः कटितटमिलन्मञ्जुमञ्जिष्ठवासा
भासानिर्भत्‌सितनवतड़ित् कोटिरेव प्रियो मे ।।७३।।
कान्त्या निन्दितकोटिकोटिमदनः श्रीमन्मुखेन्दुच्छटा
विच्छायीकृतकोटि कोटिशरदुन्मीलत्तुषारच्छविः ।।

एकोऽसाधारण एव देवो मे प्रियोऽस्ति । किं कुर्व्वन् मधुरादपि मधुरा अतिमधुरा ये प्रमाणस्त एव माध्वीरसास्तेषां पुञ्जं पुञ्जं स्वयं दत्वा एतद्विश्वं मोदयन् हर्षयन् दानवीप्सया हेतुरुदयः । उर्व्वी महती दया यस्य सः पुनः कीदृक् कटितटे मिलन्मञ्जुमनोहरं मञ्जिष्ठया रञ्जितं वासो यस्य सः पुनः किम्भूतः भासा स्वकान्त्या निर्भत्‌सिता तिरस्कृता नवानां तड़ितां कोटिर्येन सः ।।७३।।

प्रेमामृतरसव्रात दानहृष्टजगद्धरिः ।
अङ्गनिन्दितविद्युत् श्रीमञ्जिष्ठांशुः प्रियोऽस्तु मे ।।७३।।

परमचमत्कारि-तदद्भूतरूपमाधुरीधुरीणत्वं तथा तादृश परमौदार्यं चानुभूय स्वान्तःकरणे तत्पादाम्बुजध्यानमाशास्ते । कान्त्या निन्दितेत्यादि । एवम्भूतो गौरहरिर्ममान्तःकरणे कोटिजनुषामसंख्यजन्मनां सम्बन्धिभिः प्रतिपाद्यैर्भाग्यैः पुण्यैः साधनविशेषैः कृत्वा पदं निजपादपद्मं धास्यति अर्पयिष्यति किमिति शेषः । जनुषामिति प्रतिपाद्य प्रतिपादकसम्बन्धे षष्ठी किम्भुतः कान्त्या कमनीयः रूपलावण्येन निन्दितास्तिरस्कृताः कोटिकोटिमदनाः कन्दर्पा येन सः । यद्यपि मदनस्यैकत्वमेव नतु बहुत्वं तथापि कविप्रौढ़ोक्त्या सर्व्वत्रैवं

धारण किया है, जिनकी अङ्ग कान्ति कोटि कोटि विद्युत् को तिरस्कार करती रहती है, उन परम दयालु असाधारण देव मेरा प्रिय हो, ।।७३।।

जिन के कमनीय रूप लावण्य से कोटि कोटि कन्दर्प तिरस्कृत हो रहे हैं, जिन के मुखचन्द्र की छटा से शरत् कालीन उदयशील कोटि कोटि चन्द्र मलिन हो रहे हैं, एवं जिन की वदान्यता से कोटि कोटि कल्पबृक्ष स्वर्व हो रहें हैं, उन गौर हरि क्या मेरे अन्तः करण

औदार्य्येण च कोटिकोटिगुणितं कल्पद्रुमं ह्यल्पयन्
गौरो मे हृदि कोटिकोटिजनुषां भाग्यैः पदं ध्यास्यति ॥७४॥
अन्तर्ध्वान्तचयं समस्तजगतामुन्मूलयन्ती हठात्
प्रेमानन्दरसाम्बुधिं निरवधि प्रोद्वेलयन्ती बलात् ।

प्रयोगः सिद्धः कोटिकन्दर्पलावण्यः। कोटीन्दुमधुरद्युतिरिति। सुदुर्द्दर्शं हरेश्चक्रं सूर्य्यकोटिसमप्रभमित्यादि। यदि कोटिसंख्या असंख्या वा कन्दर्पा भवन्ति चेत्तथापि निन्दिताः किं पुनरेक एव । एवं चन्द्रादौ द्रष्टव्यं। पुनः किम्भूतः श्रीमन्मुखेन्दुच्छटेत्यादि। श्रीमतः परम शोभावतः मुखचन्द्रस्य छटाभिरुच्छलितकान्तिभिर्विच्छायीकृतः मलिनीकृतः। कोटिकोटिसंख्या शरत्सम्बन्धिरुदयं प्राप्नुवन् तुषारच्छविश्चन्द्रो येन सः। पुनः कीदृक् औदार्य्येण परमदातृत्वेन कोटिकोट्या गुणितं परावृत्त्या संख्यातं कल्पद्रुमं हि निश्चितमल्पयन्। आपामराबाचितप्रेमदातृत्वात् ॥७४॥

अगण्यविधुजिद्वक्त्रो द्युतिनिन्दिस्मरायुतः।
कोटिकल्पतरोर्द्दाता गौरः किं धास्यते पदं ॥ मे हृदीति शेषः ॥७४॥

पुनश्चन्द्ररूपकत्वेनात्मनि तद्दीप्तिप्राबल्यमाशास्ते। अन्तर्ध्वान्तचयमित्यादि। सा चैतन्यचन्द्रस्य छटाऽस्माकं हृदये चकितं क्षणमात्रमपि चकास्तु प्रकटीभवतु। या समस्तजगता मन्तर्ध्वान्तानामज्ञानतमसां चयं समूहमुन्मूलयन्ती समूलं विनाशयन्ती हठात् बलात्कारेण अन्यापि बाह्यतमोविनाशिनी। याच प्रेमेत्यादि। प्रेम्नां य आनन्दरसः सुखविशेषः स एवाम्बुधिस्तं निरवधि अवधिशून्यं यथा स्यात् प्रोद्वेलयन्ती वेलामतिक्रामयन्ती अन्यापि समुद्रमुद्वेलयन्ती। याच तापत्रयेणाधिदैविकेनाध्यात्मिकेनाधिभौति-

में पदार्पण करेंगे, मैं उसे कोटि कोटि जन्मार्जित पुण्य का ही फल मानूँगा ॥७४॥

श्रीचैतन्य को कान्ति बलपूर्वक समस्त जगत के आन्तरिक तमः समूह को मूलतः विनष्ट कर रही है, प्रेमानन्द रसमय समुद्र को निरवधि उच्छलित कर रही है, एवं निरन्तर आध्यात्मिकादि तापत्रय से

विश्वं शीतलयन्त्यतीव विकलं तापत्रयेणानिशं
सास्माकं हृदये चकास्तु चकितं चैतन्यचन्द्रच्छटा ।।७५।।
क्षणं क्षीणः पीनः क्षणमहह साश्रु : क्षणमथ
क्षणं स्मेरः शीतः क्षणमनलतप्तः क्षणमपि ।

केनानिशं निरन्तरं अतीव विकलं अतिशयपीड़ितं विश्वं शीतलयन्ती अन्यापि रवितापतप्तं जगच्छीतली करोति ।।७५।।

जगदन्तस्तमोहन्त्री प्रेमाम्बुधिविवर्द्धिनी ।
चकास्तु हृदयेऽस्माकं श्रीगौराङ्गविधुच्छटा ।।७५।।

इदानीमलौकिकपरमोद्भटानुभावविशिष्ट—भगवद्गौरदेहस्फूर्त्ति-मासास्ते क्षणं क्षीणः पीन इत्यादि । भगवतः श्रीकृष्णस्य गौरदेहो मम हृदये स्फुरतु प्रकटीभवतु । किम्विशिष्टस्त्वनुभाववैशिष्टामाह क्षणमभिव्याप्तौ द्वितीयक्षणमभिव्याप्येत्यर्थः । क्षीणः कृशतां प्राप्तो विरहिनीभावमग्नत्वात् । पुनः श्रीकृष्णस्फूर्त्या साक्षात् क्षणं पीनः पुष्टतां प्राप्तः । अतएव क्षणं साश्रुरानन्दस्यन्दमानाश्रुतिः सह वर्त्तमानः अहह आश्चर्य्यं ननु आनन्दाश्रुसरणमिति कथमवगतमत्राह क्षणं शीतः पूर्व्वं विरहतापेन तप्त आसीदिदानीं तत्स्फूर्त्या शीतलः । अत-एव अथानन्तरं क्षणं स्मेरः परिहास प्रयुक्तेयद्धास्येन विकशितगण्डः पुनः प्रेमवैचित्र्यलक्षणेनानलतप्तः । प्रेमवैचित्र्यलक्षणं यथा । प्रियस्य सन्निकर्षेऽपि प्रेमोत्कर्षस्वभावतः । या विश्लेषधियार्त्तिस्तत्प्रेम—वैचित्त्यमुच्यते । सन्निकृष्टेऽपि श्रीकृष्णे क्व गत इति वुद्धया विरहा-नलेन तप्तः पुनः पलायमानमिव तं दृष्ट्वा धृतोऽपि धृतोऽसीतुक्त्वा धावन् वेगेन द्रुतं गच्छन् पुनः क्षणं स्थानान्तरं गत्वा कृष्णेन स्पृष्ट इव

तापित जगत् को शीतल कर रही है, उन कान्ति हमारे हृदय में क्षण काल के लिए प्रकाशित हो ।।७५।।

क्षण काल क्षीण भाव, क्षण काल स्थूल भाव, क्षण काल आनन्दपरिपूर्ण, क्षण काल हास्य मुख, क्षण काल शीतल, क्षण काल परितप्त, क्षण काल धावमान, क्षण काल स्तम्भित, क्षण काल

क्षणं धावन् स्तव्धः क्षणमधिकजल्पन् क्षणमहो
क्षणं मूकोगौरः स्फुरतु मम देहो भगवतः ॥७६॥
पात्रापात्रविचारणां न कुरुते नस्वं परं वीक्ष्यते
देयादेयविमर्शको नहि नवा कालप्रतीक्षः प्रभुः ।

स्फूर्त्या हर्षामर्षाभ्यां स्तव्धः । ततः क्षणमधिकजल्पन् अधिकैरनुचितैर्वाक्यै रे रे लम्पटगुरो हे अनवस्थितास्थिरचित्त हा प्रेमशून्यहृदय हा सतीव्रतध्वंसन मां मास्पृशः इतो दूरीभवेत्यादि गद्गदादिकया युक्तैर्भर्त्सयन् ततः क्षणं मूकः । अयि प्राणेश्वरि क्षमस्व एवं क्वचिदपि मया न कर्त्तव्यं तवाश्रयोऽमिति विनयादिनोक्ते इति स्फूर्त्या मानमुद्राव्यञ्जनमौनावलम्वीत्यर्थः ॥७६॥

अनुभावादिभावानां शावल्योदयशान्तिभाक् ।
भावमुद्रेक्षितोगौरो हरिः स्फुरतु मे हृदि ॥७६॥

विहिताविहितयोग्यायोग्यादिनिरपेक्षतयातिदुर्ल्लभनिगूढ़प्रेमदातृत्वेन परमं कारुण्यं व्यञ्जयन् तस्यैव पदाम्वुजसेव्यत्वनिष्ठां दर्शयति । पात्रापात्रेत्यादि । स एव गौरो भगवान् परं केवलं मे मम गतिर्गम्यः सेवनीयः नान्य इत्यर्थः । यः पात्रापात्रादिविशेषणैर्विशिष्टः सदास्तत्क्षणाद्भक्तिरसं दत्ते भक्तिरसं किम्भूतं श्रवणेक्षण प्रणमनध्यानादिसाधनैर्दुर्ल्लभं । श्रवणं । श्रीमद्भागवतादेरीक्षणं श्रीजगन्नाथादेः प्रणमनं दण्डवत्प्रणामः ध्यानं श्रीकृष्णगुणलीलाचिन्तनं एतान्यादीनि येषां तैरेतेषां साधनत्वेन भक्तिरसमित्यत्र भक्तिः प्रेमलक्षणा ज्ञेया तेन प्रेमभक्तिरसमित्यर्थः । ननु देयादेयादिविचारमकृत्वा कथं दत्ते तत्राह प्रभुः स्वतन्त्रेश्वरः । भगवद्भक्तिदानादाने पात्रापात्रादिविचारो देयादेयपरामर्शः स्वपरेक्षणं काला-

---

वहभाषी, क्षण काल मौनावलम्वी, इस प्रकार श्रीकृष्ण के गौर देह की स्फूर्ति मेरे हृदय में हो ॥७६॥

जो प्रभु पात्रापात्र विचार, आत्मपरदृष्टि, देयादेय विचार, कालाकाल प्रतीक्षा न कर, श्रवण, दर्शन प्रणाम ध्यानादि द्वारा दुर्लभ जो भक्तिरस उस को क्षणमात्र में ही प्रदान करते हैं उन

सद्यो यः श्रवणेक्षण प्रणमन ध्यानादिना दुर्लभं
दत्ते भक्तिरसं स एव भगवान् गौरः परं मे गतिः ।।७७।।
पापीयानपि हीनजातिरपि दुःशीलोऽपि दुष्कर्म्मणां
सीमापि श्वपचाधमोऽपि सततं दुर्वासनाढ्योऽपि च ।
दुर्द्देशप्रभवोऽपि तत्र विहितावासोऽपि दुःसङ्गतो
नष्टोऽप्युद्धृत एव येन कृपया तं गौरमेवाश्रये ।।७८।।

कालप्रतीक्षणश्च नास्तीति सूचितः विशेषत भगवदुपासनेतरे काला-कालादिविचारः। भगवदुपासने कालादिविलम्वे क्षणभङ्गुरदेह-पातेऽनर्थपातः स्यात् इतरेतु कर्म्मादौ कालादिदोषेण यदि छिद्रादि स्यात् तदा भगवन्नामादिनाऽच्छिद्रं भवति। तदुपासनस्य कोवा कालादिदोषः। अच्छिद्रं यथा। मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्ह वस्तुतः। सर्व्वं करोति निश्छिद्रं नामसङ्कीर्त्तनः हरेः। ७७।।

पात्रस्वपरकालादि निरपेक्षो सुदुर्लभं ।

दत्ते प्रेमरसं ये वै स मे गौरहरिर्गतिः ।।७७।।

श्रीचैतन्यस्य नीचातिनीच दुर्गतादितारकत्वेन परमकारुण्यवत्त्वं प्रकाशयन् स्वाश्रयनिष्ठामाह। पापीयानित्यादि। येन गौरहरिणा कृपया एवं भूतो जन उद्धृतः स्वपदारविन्द मधुरप्रेमरसास्वादनया आत्मसात् कृतस्तमेवाश्रये किम्भूतो जनस्तत्राह पापीयानित्यादि। अतिशयपापवान् कुष्ठीब्राह्मण इत्यादि। हीनजातिः सौचिक यवनोऽपि दुःशीलो रेमुनास्थघट्टाधिकारवानपि। दुष्टानि परदारहरणब्रह्म-स्वहरणसुरापान स्वर्णचौर्य्यादीनि कर्म्माणि येषां सीमापरिणामी जगाई माधाई ख्यात ब्राह्मणवन्धुद्वयमपि अतएव तत्कर्म्मणां प्रायश्चित्तमपि नास्ति। यतः सततं दुर्व्वासनाढ्योऽपि दुर्व्वासनया

भगवान् गौर हरि ही एकमात्र मेरीगति है, उनको छोड़कर और कोई मेरी गति नहीं है ।।७७।।

अति पातकी नीच जाति, दुरात्मा, दुष्कर्मशाली, चण्डाल, सतत दुर्वासना रत, कुस्थान जात, कुदेशवासी, असत् संसर्गी आदि सकल दुष्ट व्यक्ति गण को जिन्होंने कृपापूर्वक उद्धार किया है, मैं

कलिन्दतनयातटे स्फुरदमन्दवृन्दावनं
विहाय लवणाम्बुधेः पुलिनपुष्पवाटीं गतः ।
धृतारुणपटः परीहृत सुपीतवासा हरि-
स्तिरोहितनिजच्छविः प्रकट गौरिमा मे गतिः ॥७९॥

तत्तत्कर्म्मणि निरतोपि अतः श्वपचाधमोऽपि श्वपचानां वरं निष्कृति रस्ति तद्द्वयस्य निष्कृतिर्नास्तीत्यर्थः । दुष्टैर्दस्युभिराक्रान्तो देशो दुर्द्देशस्तत्र प्रभवो जनिर्यस्य सोऽपि । ननु दुर्द्देशजनिर्यदि पुण्यदेश-कृतावासः स्यात्तर्हि किं तत्राह तत्र विहितावासोऽपि तव दुष्कर्म्म-निमित्तविहित आवासो येन सोऽपि। एतैरुपलक्षितैरन्येऽप्युद्धृता इति ज्ञेयं ॥७८॥

नीचातिनीचपापिष्ठा दुष्टा नष्टाश्च दुर्ज्जनाः ।
येनोद्धृता स गौराङ्गो हरिरेवाश्रयो मम ॥७८॥

स्वयं भगवान् व्रजराजनन्दन एव गौराङ्गोऽवतार इति प्रति पादक तद्वेशादिपरिवर्त्तनोक्त्यात्मनस्तद्गतित्वमाह । कलिन्देति । एवम्भूतो हरिर्मे गति र्गमनीयत्वेन प्राप्योऽस्तु किंभूतः कलिन्द-पर्व्वतस्य तनया पृथिव्यामुत्पन्नायाः । कलिन्दगिरिरेव प्रथमो-पलम्भनस्थानमत एव तत्कन्या यमुना तस्यास्तटे तीरे प्रकाशमान-मुत्कृष्टं यद् वृन्दावनं तद्विहाय लवणसमुद्रस्य तटे स्थितां पुष्पवाटीं गतः। त्यक्तं शोभनः पीतं वासो येन सः। अथच धृतारुणपटः। तिरोहितान्तर्धापिता निजा इन्द्रनीलमणिविड़म्बिनी छविः कान्तिर्य्येन स। अथच प्रकटः प्रकटीकृतो गौरिमा येन सः ॥७९॥

राधिकारूपमासाद्य तिरोहितनिजच्छविः ।
परिवर्त्तितलीलादि गतिर्गौरहरिर्मम ॥७९॥

उन श्रीगौर हरि का ही आश्रय ग्रहण किया ॥७८॥

जिन्होंने–यमुनातीर वर्ति सुरम्य वृन्दावन को छोड़कर लवण समुद्र के तीरस्थ पुष्प वाटिका में गमन किया है, पीताम्वर को छोड़ रक्त वसन धारण किया है, निज इन्द्रनीलमणि कान्ति को छोड़कर गौर कान्ति धारण कियाहै, वही श्रीगौर हरि ही मेरी गतिहै ॥७९॥

❋ अथ लोकशिक्षा ॥ ❋

**अरे मूढ़ा गूढ़ां विचिनुत हरेर्भक्तिपदवीं
दवीयस्या दृष्ट्वाप्यपरिचितपूर्व्वां मुनिवरैः ।
नविश्रम्भश्चित्ते यदि यदि च दौर्लभ्यमिव तत्
परित्यज्याशेषं व्रजत शरणं गौरचरणं ॥८०॥**

॥❋॥ इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां स्वनिष्ठा प्रकरणोनामसप्तमोविभागः ॥❋॥७॥

कलौ श्रीकृष्णचैतन्य एवोपास्यस्तदाश्रयं । विना कलिदोष-वारिधितरण सत् सिद्धान्तकृता निगूढ़प्रेमभक्ति लाभादयो न भवन्तीति तच्चरणभजने लोकान् प्रवर्त्तयितु प्रकरणमारभते विंशतिपद्यैः अथ लोकशिक्षेति । तत्र प्रथमं परमपुरुषार्थनिगूढ़भक्तिलाभो गौरहरि-चरणशरणं विना न भवतीति तच्चरणशरण प्रवर्त्तयति । अरे मूढ़ा गूढ़ेत्यादि । अरे मूढ़ा हरेः परममनोहरस्य श्रीकृष्णस्य सम्बन्धिनीं भक्तेः पदवीं मार्गं विचिनुत अनुसन्धत्त । ननु प्रसिद्धायां तस्यां कथमनुसम्बन्धीमहि तत्राह गूढ़ां श्रुतिभिर्गुप्तां । अतएव मुनिवरैर्दवीयस्या दूरप्रचारिण्या दृष्ट्वाप्यपरिचितपूर्व्वां पूर्व्वं न परिचिता अपरिचितपूर्व्वा तां तस्या गूढ़त्वे यदि युष्माकं चित्ते न विश्वासः यदि च तस्या दौर्लभ्यमिव अन्येष्वेतत्तदशेषं सर्व्वं परित्यज्य गौरहरिचरणं शरणं व्रजत । श्रीगौरहरि चरणशरणागताय तस्या गूढ़ता ज्ञान पूर्व्वकलाभो भविष्यत्येवेत्यर्थः ॥८०॥

**श्रुतिगूढ़महाभक्तौ दुर्लभ्यायां मुनीश्वरैः ।
प्रवेशाय विशन्तु श्रीगौराङ्गपदपङ्कजं ॥८०॥**

इति सप्तम विभाग ।

❋ लोकशिक्षा ❋

अरे मूढ़गण ! अति गूढ़ एवं अति दूरवर्त्ती, अदृष्ट वशतः मुनि जनों के अपरिचित श्रीहरि के भक्तिमार्ग हैं, उसे तुम सब जानो, अति दुर्लभ उस वस्तुका लाभ कैसे होगा ? इस प्रकार अविश्वास यदि तुम्हारे चित्त में हो, तो मैं उपाय करता हूँ श्रवण करो, सर्वस्व

दधन्मूद्ध्वंन्यूद्ध्वंमुकुलितकराम्भोजयुगलं
गलन्नेत्राम्भोभिः स्नपितमृदुगण्डस्थलयुगं।
दुकूलेनावीतं नवकमलकिञ्जल्करुचिना
परं ज्योतिर्गौरं कनकरुचचौरं प्रणमत ॥८१॥
भ्रातः कीर्त्तय नाम गोकुलपतेरुद्दामनामावलीं
यद्वा भावय तस्य दिव्यमधुरं रूपं जगन्मङ्गलं।
हन्त प्रेम महारसोज्ज्वलपदे नाशापि ते सम्भवेत्
श्रीचैतन्यमहाप्रभोर्यदि कृपादृष्टिः पतेन्न त्वयि ॥८२॥

तत्परिचायक रूपमाधुरीं वर्णयित्वा प्रणमयति। दधन्, मूर्द्धनीत्यादि। अरे लोकाः परं सर्व्वोत्कृष्टं गौरं ज्योतिर्ब्रह्म प्रणमत दण्डवत् साष्टाङ्ग प्रणिपातेन तदाश्रयत किम्भूतं कनकरुचिचौरं तप्तकाञ्चनद्युतिपूरखण्डकं पुनः किम्भूतं मुकुलितं अञ्जलिवद्धं यत् कराम्भोजयुगलमूद्ध्वं मूर्द्धिन दधत्। जलद्भिर्नेत्राम्भोभिः स्नपितं मृदुलयोर्गण्डस्थलयोर्युगं यस्य तत् नवकमल किञ्जल्कानां रुचिर्यत्र तेन दुकूलेनावीतं शोभितं शोभितमध्यदेशं एवंभूतं गौरदेहं ब्रह्म-भजेतेति लोकशिक्षा ॥८१॥

शिरोऽञ्जलिगलनेत्रं विभ्रच्छोणवराम्वरं।
तप्तकाञ्चनगौराङ्गं प्रणमस्तु महः परं ॥८१॥

व्रजराजकिशोरस्य नामसंङ्कीर्त्तन मधुररूपध्यानादि सर्व्वेपि श्रीचैतन्यकृपा दृष्टि विना तदुज्ज्वलप्रेमभक्तिरसविषये आशासम्भावनापि नास्तीत्याह। अये भ्रातः कीर्त्तय नामेत्यादि। अये भ्रात-

---

परित्यागकर उन श्रीगौरहरि के चरणों में शरणागत हो जाओ ॥८०

जो मस्तकोपरि अञ्जलि वद्ध हस्त युगल को स्थापन किए हैं, जो विगलित नेत्र जल समूह के द्वारा गण्ड स्थल युगल को प्लावित कर रहें हैं, जो नव कमल केशर के समान अरुण वसन धारण किए हैं, उन परम ब्रह्म स्वर्णवर्ण श्रीगौरहरि को प्रणाम करो ॥८१॥

हे भ्रातः! तुम व्रजराज नन्दन के परम प्रभाव विशिष्ट नामावलि का कीर्त्तन उच्चैःस्वर से कर, अथवा उनकी जगल मङ्गल

अये न कुरु साहसं तव हसन्ति सर्व्वोद्यमं
जनाः परित उन्मदा हरिरसामृतास्वादिनः ।
इदन्तु निभृतं शृणु प्रणयवस्तु प्रस्तूयते
यदेव निगमेषु तत्पतिरयं हि गौरः परं ॥८३॥

गोकुलपतेर्व्रजराजनन्दनस्य उद्दाम्नी परमप्रभाववती या नामश्रेणी तां नामप्रकाश्यं यथा स्यात्तथा कीर्त्तय लक्ष लक्षं कृत्वा वोच्चार्य्यतां यद्वा तस्य गोकुलपतेर्दिव्यं देदीप्यमानं मधुरमास्वादनीयं स्वत एव जगन्मङ्गलं यस्मादेवम्भूतं रूपं भावय चिन्तय । किन्तु श्रीचैतन्य-महाप्रभोः कृपादृष्टिर्यदि त्वयि न पतेत्तर्हि प्रेममहारसोज्ज्वलपदे ते तव आशापि न सम्भवेत् प्रेम्ना महान् सर्व्वोत्कृष्टोरसो यत्र उज्ज्वले तस्य पदे विषये । शृङ्गारः शुचिरुज्ज्वल इत्यमरः ।।८२।।

श्रीचैतन्यकृपारूपा दृष्टिस्त्वयि पतेन्नहि ।
ध्यानादिनापिकृष्णस्य नाशा प्रेमरसोज्ज्वले ।।८२।।

ननु गुरुभिरुपदिष्ट नाना श्रुत्यागम विहित बहुविध साधना चरितत्वेन कृतार्थः स्यात् किं तत् तत्कृपादृष्ट्येत्यत आह । अये न कुरु साहसमित्यादि । अये साहसं न कुरु चैतन्यपादाश्रयं विनान्य-साधनेषु सहसा न प्रवर्त्तस्व जना श्चैतन्यभक्तचस्तव सर्व्वोद्यमं हसन्ति यतस्ते हरिरसामृतास्वादिनः । हरेः स्वान्तर्हरणशीलस्य श्रीकृष्णस्य भक्तिरस एवामृतं तदास्वादनशीलाः अतएव सर्व्वतो-भावेनोद्गतो मुदो हर्षो येषां ते । ननु तर्हि किं कर्त्तव्यमुपदिशन्तु स्वामिपादास्तत्रोपदेशरूप सिद्धान्तमाह । इदन्त्वित्यादि निभृतमति

स्वरूप मनोहर मधुर मूर्त्ति को चिन्ताकर, किन्तु यदि श्रीचैतन्य महाप्रभु की कृपादृष्टि तुम्हारे प्रति पतित न हो, हाय ! तव उस महाप्रेम रसोज्ज्वल विषय में तुम्हारी आशा भी सम्भव नहीं है ।।८२

अये भ्रातः ! श्रीचैतन्य पदाश्रय को छोड़कर अन्य साधन करने के लिए साहस न करना, अर्थात् उस में सहसा प्रवृत्त न होना कारण, चैतन्य भक्तगण, जो सव प्रकार से प्रेमोद्गत हर्षता के लिए

ज्ञानादिवर्त्मविरुचिं व्रजनाथभक्ति-
रीतिं न वेद्मि नच सद्गुरवो मिलन्ति ।
हा हन्त हन्त मम: क: शरणं विमूढ़
गौरोहरिस्तव न कर्णपथं गतोऽस्ति ॥८४॥

गोप्यमिदं श्रृणु। अत्र भिन्नक्रमनियमे इदमेवाश्रयितव्यमित्यर्थः। तत्कथयति प्रणयेत्यादि। निगमेषु यदेव प्रणयवस्तु प्रस्तूयते तस्य वस्तुन: पति: परं केवलं गौरहरिरेव। तच्चरणाश्रितत्वेन सर्व्वं ते भविष्यतीति अतएव तद्गणे प्रविश्य तच्चरणाश्रयेति शिक्षा ॥८३॥

तवान्यचेष्टने गौरभक्ता अथ हसन्ति हि ।
श्रुत्यागमचरद्वस्तु पतिं गौराङ्गमाश्रयः ॥८३॥

ज्ञानादि वर्त्मेत्यादि। व्रजनाथस्य श्रीकृष्णस्य भक्तिरीतिं भजनपरिपाटीं न वेद्मि न जानामि किम्भूतां ज्ञानादिवर्त्मविरुचि ज्ञानं भक्तिविरोधि निर्भेद ब्रह्मज्ञानं आदिना नित्यनैमित्तिक धर्म्मा-ध्यात्मयोगशुष्कवैराग्यादयः। तेषु विरुचिर्यस्यास्तां सद्गुरवोति न मिलन्ति यतोज्ञास्यामि हा हन्त हन्त मम क: शरणं भवितेति। निर्व्वेद वन्तमाक्षिप्योपदिशति हे विशिष्टमूढ़ तव कर्णपथं गौरहरि र्न गतो ऽस्ति हन्त शीघ्रं तदुपासनं स्वकर्णपथमानयतु भवान् विलम्बेनाल-मिति ध्वनितं ॥८४॥

भक्तिरीतिं न जानामि ज्ञानकर्म्माद्यनावृतां ।
इति निर्व्वेदचित्तेन गौराङ्गभक्तिमादिश ॥८४॥

हरि रसामृत का आस्वादकारी हैं, वे सब तुम्हारे सब प्रकार उद्यम को देखकर उपहास करेंगे। सम्प्रति जो कहता हूँ, श्रवण करो, वेदादिशास्त्र जिन को प्रणयसार रूप से वर्णन किए हैं, श्रीगौरहरि ही उनके प्रभु हैं ॥८३॥

ज्ञानादि मार्ग में अरुचि प्रदायिनी व्रजनाथ श्रीकृष्ण की जो भक्ति परिपाटी है, उसे मैं नहीं जानता हूँ। एवं सद्गुरु लाभ भी नहीं हुआ है, हाय ! हाय ! मेरा अपाय क्या होगा ? अरे मूढ़ ! श्रीगौरहरि शब्द क्या तुम्हारे कर्ण पथ में उपस्थित नहीं हुए हैं ॥

वृथावेशं कर्म्मस्वपनयत वार्त्तामपि मनाक्
न कर्णाभ्यर्णेऽपि क्वचन नयताध्यात्मसरणेः ।।
न मोहं देहादौ भजत परमाश्चर्य्यमधुरः
पुमर्थानां मौलिर्मिलति भवतां गौरकृपया ।।८५।।
अलं शास्त्राभ्यासैरलमहह तीर्थाटनिकया
सदा योषिद्वाद्यचास्त्रसत वितथां थुत् कुरु विबं ।

ततः कर्म्माध्यात्मदेहादिषु मोहितान् प्रति तत्तदावेशं त्याजयन् श्रीगौरकृपालेशलाभमात्रेणैव परमपुरुषार्थं मधुरप्रेमलाभ इति शिक्षयति वृथा वेशं कर्म्मेत्यादि। कर्म्मसु नित्यनैमित्तिकादिषु वृथा निष्प्रयोजनमावेशमपनयत दूरीकुरुत। अध्यात्ममात्मानात्मविवेचनं तस्य सरणेर्मार्गस्य मनागल्पामपि वार्त्तां कर्णस्याभ्यर्णे निकटे क्वचन समयेऽपि न नयन सामान्यस्यापि भक्तिविरोधित्वात् देहादौ मोहं न भजत न कुरुत आदिपदेन तत् सम्बन्धिषु च भगवद्रति विरोधित्वात् ननु यथार्थोपदेशकभवदाज्ञया सर्व्वमस्माभिस्त्यक्तमेव। किन्तु परमार्थप्राप्त्युपायं वदतु भवानित्यत्राह परमाश्चर्य्यं मधुर इत्यादि। परमः सर्व्वोत्कृष्टः आश्चर्य्यं चमत्कारकारी माधुर्य्यवैशिष्टेनास्वाद्यश्च यः पुरुषार्थानां मौलिः मुकुटमणिः पञ्चमपुरुषार्थः प्रेमा भवतां गौराङ्गस्य कृपया मिलति मिलित प्रायो भविष्यति। वर्त्तमानसान्निध्ये लट्। अतस्तादृश प्रेमैव परमपुरुषार्थस्तत्प्राप्त्युपायश्च गौरहरिकृपातस्तद्भक्तजनमेव सर्व्वोपायमूलमिति तदितर सर्व्वं परि त्यज्य तच्चरणशरणं व्रजत इति ध्वनितम् ।।८५।।

पुरुषार्थशिरोरत्नप्रेमलाभाय पुत्रकाः।
भजत श्रीगौरहरिं यत्कृपा सर्व्वसाधिका ।।८५।।

नित्य नैमित्तिकादि कर्म में वृथाभिनिवेश परित्याग कर, आत्म अनात्म विचार पद्धति की वार्त्ता को कर्ण के समीप में आने न देना, देहादि के प्रति मोह परित्याग कर, तव श्रीगौराङ्ग देवकी कृपा से परमाश्चर्य्य माधुर्य्य विशिष्ट सकल पुरुषार्थ शिरोमणि रूप प्रेम

तृणम्मन्या धन्याः श्रयत किल सन्नयासिकपटं
नटन्तं गौराङ्गं निजरसमदादम्बुधितटे ॥८६॥

इदानीं योषिदभिलाषि स्वर्गाभिलाषि हरिरसेतरशास्त्राभ्यासि तीर्थाटन-कारिणः प्रति तत्र तत्राग्रहं श्लथयित्वा श्रीगौरपदाम्बुजाश्रयणमेव व्यवस्थापयति । अलं शास्त्राभ्यासैरित्यादि । योषिदेव व्याघ्री तस्याः सकाशात् सदा त्रसत यथा व्याघ्री दर्शनेनोद्विग्ना भवन्ति तथा तद्रूपायाः स्त्रिया उद्विग्ना भवत । ननु व्याघ्रीरूपकत्वेन स्त्रीसम्भाषणं निषिद्धञ्चेत्तर्हि सस्त्रीककृतयागादि कर्म्मभिर्विना स्वर्गसुखं कथं साधयामस्तत्राह वितथामित्यादि । दिवं स्वर्गं तृणं मन्या स्तृणप्रायं मत्वा थुत् कुरुत तत्र निष्ठिवनं क्षिपत वितथां मिथ्याभूतां प्राकृतत्वेन नश्वरत्वात् । ननु स्वर्गसुखं नश्वरं चेत्तर्हि योगशास्त्राभ्यासैर्योगादिकं साधयामस्तस्मादेव सर्व्वसिद्धिः स्यात्तत्राह अलं शास्त्रेति शास्त्रैकृतैर्योगाभ्यासैरलं व्यर्थं मनोविक्षेपादारूढयोगानामपि भ्रष्टत्वात् किं पुनस्तदभ्यासिनां । सिद्धेऽपि भक्तिफलसुखत्वाभावात् अभ्यासस्यापि दुःखजनकत्वात् । ननु यद्येवं तर्हि तत्तत्तीर्थानां निषेवया ज्ञानादिकमुत्पाद्य सालोक्यादि मोक्षं साधयामस्तत्राह अलमहह तीर्थाटनिकयेति । तीर्थानामटनिकया पुनः पुनरटनेन अहह इत्यधिक्षेप खेदे अलं व्यर्थं । प्रथमतोऽटने परिश्रमात् अभक्तेषु तीर्थानां यथार्थफलदातृत्वाभावात् । अटनिकेति भावे नकः । क्रियामाभीक्ष्णे इति नकः । नकस्यादिच्चेति अकारस्य इकारः । ननु तर्हि किं कर्त्तव्यमित्यपेक्षायां यथार्थस्वानुभूत तात्पर्य्यवस्थाश्रय कर्त्तव्यतां सिद्धान्तयति धन्याः श्रयत किलेति । तदुक्तौ सन्मुखान् दृष्ट्वा सम्बोधयति धन्याः प्रेमधनप्राप्तियोग्याः । गौराङ्गं श्रयत तत् पदाम्बुजमाश्रित्य सेवन्तां किलेति निश्चये । कीदृशमम्बुधितटे

की प्राप्ति तुम सब की होगी ॥८५॥

भक्तगण ! शस्त्राभ्यास, तीर्थ पर्य्यटन में कुछ भी लाभ नहीं है, व्याघ्रीरूपा स्त्री से सर्वदा भीत रहना, स्वर्ग को तुच्छ ज्ञान से

किं तावद्व्रत दुर्गमेषु विफलं योगादिमार्गेष्वहो
भक्तिं कृष्णपदाम्बुजे विदधतः सर्व्वार्थमालुण्ठत ।
आशा प्रेममहोत्सवे यदि शिवब्रह्माद्यलभ्येऽद्भुते
गौरे धामनि दुर्व्विगाहमहिमोदारे तदा रज्यतां ॥८७॥

नटन्तं ननु कर्म्मान्नृत्यति तत्र हेतुमाह निजरसमदात् निजस्य श्रीकृष्णस्वरूपस्यात्मनः यः प्रेमरसस्तेन योमदो हर्षः तस्माद्धेतोः । ननु निजशब्दस्य कृष्णस्य स्वरूपत्वेन व्याख्यानात् कथं सन्नचासकृत् शमः सन्नचासिकपटमिति । सन्नचासिषु कपटमाच्छन्नमाच्छन्नावतारत्वात् सन्नचासी तत्राह शान्तो निष्ठाशान्तिपरायण इत्यादि सार्थकत्वाच्च । वस्तुतः परमहंसानां केषु शिरःसु पटं शिरोभूषणवस्त्रमिव आत्मारामशिरोमणिमित्यर्थः । तेषां सेव्यमिति यावत् ॥८६॥

योगतीर्थाटन स्त्रीस्वराभ्यासाटनधीस्पृहाः ।
हित्वा भजत गौराङ्गं यतीन्द्रं नित्यकौतुकं ॥८६॥

तेषां मध्ये केषाञ्चिद्योगादिष्वीषदाग्रहं दृष्ट्वा श्रीकृष्णप्रेमधनप्रलोभेन तदाग्रहं श्लथयित्वा श्रीगौराङ्गेऽनुरक्तिं प्रसञ्जयति किं तावदिति । योगादिमार्गेषु विभलं किं तावदनुसन्धानमितिशेषः । यत खेदे अहो भ्रातरः । श्रीकृष्णपदाम्बुजे भक्तिं विदधतः सर्व्वेषु पदार्थेषु योऽर्थः प्रेमधनं तमालुण्ठत बलात्कारेण गृह्णीत प्रेमार्थमिति पाठे छन्दोऽर्थश्च सुगमः । तेषामपि साम्मुख्यं दृष्ट्वा आह आशेति । युष्माकं शिवब्रह्मादलभ्ये अद्भुते परमप्रेममहोत्सवे यद्याशास्ति तदा गौरे धामनि भगवति रज्यतामनुरक्तं भूयतां । किम्भूते दुर्व्वियो-

---

थुत्कार करना, जो सन्न्यास ग्रहण कर निज प्रेमानन्द में मत्त होकर समुद्र तट में नृत्य करते रहते हैं, उन श्रीगौराङ्ग का तुम सब आश्रय ग्रहण करो ॥८६॥

हे भ्रातः योगादि मार्ग अतिदुर्गम, उस का अनुसन्धान करना विफल है, अतएव तुमसब श्रीकृष्ण चरणाम्बुज में भक्ति बल पूर्वक प्रेमधन ले लो, श्रीशिव ब्रह्मा प्रभृति के अलभ्य परमाश्चर्य प्रेम-

यथा यथा गौरपदारबिन्दे बिन्देत भक्तिं कृतपुण्यराशिः ।
तथातथोत्सर्पति हृद्यकस्मा-द्राधापदाम्भोजसुधाम्बुराशिः ॥८८॥

महिमा यस्य सः । अतएवोदारः परमदातृशिरोमणिः सच स चेति कर्म्मधारयस्तस्मिन् । षष्ठान्तयोर्विदधतः आलुण्ठत इत्येतयोः पाठ-स्तयोस्तु योगाद्यनुसन्दधतं श्रीकृष्णभक्तं प्रत्याह किं तावदित्यादि । अहो भ्रातः श्रीकृष्णपदाम्वुजे भक्तिं विदधतस्तव योगादिमार्गेषु दुःसाध्येषु विफलं किं तावत् । तासु किञ्चित् फलं नास्त्येव । ननु कथं विफलं तत्राह सर्व्वार्थमालुण्ठतः । कृष्णभक्तस्य उक्त्यैव सर्व्वार्थानां वलात्कारेण प्राप्तत्वात् । किन्तु प्रेम्ना यो महोत्सव आनन्द-विशेषस्तत्र यदि तवाशास्ति तदा गौरे धामनि रज्यतामिति । त्वदाशापूरणस्तु गौरानुरक्तिं विना न भवतीति ॥७८॥

मनस्त्यजत योगादिं कृष्णं भजत लुण्ठत ।
प्रेमसु त्वन्महाशा चेत्तदा गौरेऽनुरज्यतां ॥८७॥

श्रीचैतन्यचरणविषया रतिर्यादृशी यत्र तत्र तादृशी श्रीराधा पदाम्वुजविषया रतिः । स्फूर्त्तिरपीत्यन्वय वाप्त्या यत्र सा नेति व्यतिरेकव्याप्तिं सूचयन् शिक्षयति यथायथेत्यादि ॥ कृत पुण्यां राशिः पुञ्जो येन सः कृतवहुसाधनः । यद्वा कृतानां पुण्यानां साधनानां राशिर्यस्य एवं भूतो यः श्रीगौरहरिपदारविन्दे यथायथा यादृशीं भक्तिं विन्देत लभेत तस्य हृदि तथा तथा तादृशः पदाम्भोज सुधाम्वु-राशिरकस्मादुत्सर्पति प्रोद्गच्छति । श्रीराधायाः पदाम्वुजयोः सुधा प्रेमासुधा तत्सम्वन्धी अम्वुराशिर्जलधिः । अम्वुराशिरूपकत्वेन श्रीचैतन्यपदारविन्द भजनस्याद्भु तचन्द्रत्वं ध्वनितं ॥८८॥

यादृशी यादृशी भक्तिश्चैतन्यचरणाम्वुजे ।
तादृशी हृदये स्फूर्त्तिः श्रीराधापादपद्मयोः ॥८८॥

महोत्सव में यदि तुम्हारी आशा हो, तव सर्वदाता शिरोमणि, दुर्वोध महिमान्वित श्रीगौर हरि में अनुरक्त हो जाओ, ॥८७॥

वहु साधन सम्पन्न व्यक्ति की श्रीगौर हरि के पदारविन्द में जैसी भक्ति होगी, श्रीराधा के चरण कमल सम्वन्धीय प्रेमरूप सुधा

अपारस्य प्रेमोज्ज्वलरसरहस्यामृतनिधे-
र्निधानं ब्रह्मेशार्च्चित इह हि चैतन्यचरणः।
अतस्तं ध्यायन्तः प्रणयभरतो यान्तु शरणं
तमेव प्रोन्मत्तास्तमिह किल गायन्तु कृतिनः ॥८९॥
दन्ते निधाय तृणकं पदयोर्निपत्य कृत्वा च काकुशतमेतदहं ब्रवीमि।
हे साधवः सकलमेव विहाय दूरा-द्गौराङ्गचन्द्रचरणे कुरुतानुरागं ९०

अतः सर्व्वतोभावेन श्रीचैतन्यचरणं शरणीयमिति शिक्षयन् तदुत्कर्षं दर्शयति अपारस्य प्रेमोज्ज्वलेति। श्रीचैतन्यचरणः ब्रह्मा च ईशो महादेवश्च ताभ्यामर्च्चितः पूजितः स्वयं भगवत्वात्। पुनः कीदृक् प्रेम्नो य उज्ज्वलरसस्तत्रापि यद्रहस्यामृतं महाभावचरम-भागस्तदेव निधिः रसनिधिस्तस्य पारशून्यस्य। निधानं निधीयते स्थाप्यतेऽत्रेति निधानमाधारः हि यत एवम्भूतोऽतः कृतिनः सार-ग्राहिणः इह कलौ प्रणयातिशयात् तं चैतन्यचरणं ध्यायंस्तमेव शरणं यान्तु प्राप्नुवन्तु। तच्चरणाम्वुजमाधुर्य्येण प्रकृष्टोत्कृष्ट हर्षयुक्तास्तं चरणाम्वुजमहिमानं किल निश्चितमिह समये गायन्तु इत्युपलक्षणं शृण्वन्तु अनुमोदयन्तु वर्णयन्तु इत्यादि ॥८९॥

शिवब्रह्माद्यचर्च्चनीयं महाभावपराश्रयं।
कलौ भजन्तु रसिकाश्चैतन्यचरणाम्वुजं ॥८९

पुनः संमिश्रात् भक्तान् प्रति दैन्येन सर्व्वत्यागपूर्व्वकमनुराग-मासञ्जयति। दन्ते निधाय तृणकमित्यादि। सकलं तदितर-साधनादि कर्म्मज्ञान सांख्ययोग शुष्कवैराग्य चतुर्व्वर्गधर्म्मविषय-

---

समुद्र,-अकस्मात् उन के हृदय में उसीभाव से उद्गत होगी ॥८८॥

जो अपार प्रेमोज्ज्वल रूप सुधा समुद्र का आधार, एवं श्रीब्रह्मा शिव के द्वारा पूजित है, अतएव हे सारग्राहिजन आप सब इस कलि युग में प्रणयातिशय से प्रेमानन्द से उन चैतन्य चन्द्र के चरण कमल का आश्रय ग्रहण करो, एवं उनका ध्यान गान करो ॥८९॥

हे भक्त गण मैं दातों में तृण को दबाकर चरणों में गिरकर

अहो न दुर्ल्लभा मुक्तिर्न च भक्तिः सुदुर्ल्लभाः ।
गौरचन्द्रप्रसादस्तु वैकुण्ठेऽपि सुदुर्लभः ॥९१॥
भजन्तु चैतन्यपदारविन्दं भवन्तु सद्भक्तिरसेन पूर्णाः ।
आनन्दयन्तु त्रिजगद्विचित्रं माधुर्य्यसौभाग्यदयाक्षमाद्यैः ॥९२॥

वासनादिकं सर्व्वं दूराद्विहाय न पुनराग्रहं यथा स्यात्तथा त्यक्त्वा गौराङ्ग एव चन्द्रस्तस्य चरणे पादपद्मे अनुरागं कुरुतेति ॥६०॥

दन्ते कृत्वा तृणं पादे पतित्वा विनयाकुलः ।
याचे हित्वाखिलं गौरपदे रज्यन्तु साधवः ॥९०॥

ननु मुक्ति भक्तिप्रभृति सर्व्वं त्याजयित्वा कथं गौरचन्द्रानुरागं कारयसि तत्राह । अहो न दुर्लभा मुक्तिरित्यादि मुक्तिः सालोक्यं भक्तिः सेवा ते द्वे ज्ञानमिश्रसुसाधनभक्तिसाध्ये अतो न दुर्लभासु दुर्लभे । गौरचन्द्रस्य प्रसादः प्रसन्नता । तत्प्रसादात् प्रकटीभूतः तादृक् परमनिगूढ़प्रेमामृतास्वादः प्रसन्नता । तत्प्रसादात् प्रकटीभूतो यादृक् परमनिगूढ़प्रेमामृतास्वादः स वैकुण्ठेपिसुदुर्लभः । तत्र तस्यात्यन्ताभाव इत्यर्थं । तद्वासिनामप्येतत् प्रार्थितत्वादहो वैकुण्ठ-स्थैरपीत्युक्तेः ॥९१॥

मुक्तिर्ज्ञानादि साध्या स्याद्धरिभक्तिप्रसादनात् ।
गौरचन्द्रप्रसादात्तु प्रेमा वैकुण्ठदुर्लभः ॥९१॥

ततस्तत् प्रसादप्रेमा वैकुण्ठेपि दुर्लभोऽतो भगवच्चैतन्यस्य भजनं प्रवर्त्तयति । भवन्तु चैतन्यपदारविन्दमित्यादि । भजन्त आश्रयन्तु अतएव सद्भक्तिरसेन पूर्णा भवन्तु सन् सर्व्वोत्कृष्टो यो

विनय के साथ प्रार्थना करता हूँ कि—तुम सब सर्व धर्म को छोड़कर श्रीगौर चन्द्र के चरणों में अनुराग करो ॥९०॥

अहो ! मुक्ति भी दुर्लभ नहीं है, एवं भक्ति भी सुदुर्ल्लभा नहीं है, किन्तु श्रीगौरचन्द्र की प्रसन्नता वैकुण्ठ में दुर्लभ है, कारण वहाँ के निवासी व्यक्ति गण भी श्रीगौर चन्द्र की प्रसन्नता को चाहते हैं।८१

तुम सब श्रीचैतन्य चन्द्र के पादारविन्दों का आश्रय ग्रहण करो, तब उत्तम भक्ति रस से पूर्णहोकर मधुर स्वभाव, जगत्

संसारसिन्धुतरणे हृदयं यदि स्यात्
सङ्कीर्त्तनामृतरसे रमते मनश्चेत् ।
प्रेमाम्बुधौ विहरणे यदि चित्तवृत्ति-
श्चैतन्यचन्द्रचरणे शरणं प्रयातु ॥९३॥

ज्ञानवैराग्यभक्त्यादि साधयन्तु यथा तथा ।
चैतन्यचरणाम्भोजभक्तिलभ्यसमं कुतः ॥९४॥

भक्तिरसस्तेन । अतएव माधुर्य्यादिभिर्यद्विश्वं विचित्रं यथा स्यात्तथा आनन्दयन्तु । माधुर्य्यं मधुरस्वभावः सौभाग्यं जगत्पूज्यत्वं दया नीचे करुणा क्षमा तृणादपि सहिष्णुता ॥९२॥

चैतन्यपदभक्तेषु निगूढ़प्रेमपूर्णता ।
माधुर्य्यादि गुणैर्येषां जगदानन्ददातृता ॥९२॥

इदानीं संसारतितीर्षुः संकीर्त्तनामृतरसरिरंसु प्रेमाम्बुधि विजिहीर्षुन् प्रति चैतन्यपदाश्रयं सिद्धान्तयति । संसारसिन्धुतरणे हृदयमित्यादि ॥९३॥

कलौ संसारतरणं संकीर्त्तनरसे रतिः ।
प्रेमाम्बुधौ विहारश्च नास्ति गौराश्रयं विना ॥९३॥

नन्वत्रापि ज्ञानवैराग्यादि दृश्यते तर्हि कथं तत्साधनाय गौरचन्द्रभजनं प्रवर्त्तयसीति वदतः कांश्चित् प्रत्याह ज्ञानवैराग्येत्यादि । समाहारद्वन्द्वे नैकत्वक्लीवत्वे । तज्ज्ञानादि यथा तथा प्रकारेण साधयन्तु उत्पादयन्तु किन्तु श्रीचैतन्यपादपद्मभजनेन यज् ज्ञानादि वैलक्षण्यं प्रकटं भवति तेन तुल्यं कुत्रापि नास्तीत्यर्थः वैलक्षण्यं यथा

पूज्यता, कारुण्य, सहिष्णुतादि गुण द्वारा त्रिजगत को विचित्र रूप से आनन्दित करोगे ॥९२॥

संसार सागर के पार जाने, सङ्कीर्त्तन रूप सुधारस के आस्वादन में एवं प्रेम समुद्र में विहार करने की यदि इच्छा हो तो श्रीचैतन्य के चरणों में आश्रय ग्रहण करो ॥९३॥

जिस किसी प्रकार से स्वरूप अववोध रूप ज्ञान, विषय वैराग्य भक्ति प्राप्त होने पर भी श्रीचैतन्य चन्द्र के चरण कमल भजन के

अचैतन्यमिदं विश्वं यदि चैतन्यमीश्वरं।
न भजेत् सर्व्वतोमृत्युरुपास्यममरोत्तमैः ॥६५॥
आशा यस्य पदद्वन्द्वे चैतन्यस्य महाप्रभोः।
तस्येन्द्रो दासवद्भाति का कथा नृपकीटके ॥६६॥

ज्ञानं सलीलपरिकरस्वयं भगवत् श्रीकृष्णसर्व्वोत्कृष्टमाधुर्य्यंतत्त्वं वैराग्यं तत्तत्त्वमात्र विषयीच्छाविशेषः। भक्तिर्निगूढ़ परमोत्कर्षोज्ज्वलप्रेमलक्षणा ॥६४॥

याद्दक्तत्त्वं प्रेमभक्तिः सवैराग्या गौरहरेः।
भक्तेषु तादृक् कुत्रापि ज्ञानादि नहि दृश्यते ॥६४॥

ननु तर्हि कथं विश्वस्थाः सर्व्वे जनाश्चैतन्यं न भजन्ति तत्रास्वरसमाह। अचैतन्यमिदं विश्वमित्यादि। इदं विश्वं अचैतन्य चैतन्यशून्यं यदि कृष्णचैतन्यं न भजेत्तदा सर्व्वत्र मृत्यूः। चैतन्यं किम्भूतं अमरोत्तमैर्ब्रह्मादिभिरूपास्यं अतएवेश्वरं सर्व्वनियामकत्वात् स्वयं भगवन्तमित्यर्थः ॥६५॥

ब्रह्माद्युपास्यं चैतन्यं नाश्रयेद् यो जनः कलौ।
तस्य संसारसरणौ गमनागमनं भवेत् ॥६५॥

ननु पृथिवीपतयस्तावदिदं चैतन्यपादाम्वुजाश्रयणं मंस्यन्ते नवेति सन्देहः सर्व्वत्र राजानुगतधर्म्मप्रचारितत्वात् इत्यत्र सक्रोधमाह आशा यस्य पदद्वन्दे चैतन्यस्येति। आशा यस्य तस्यैवं तदाश्रितस्य का वा कथा तत्रारूढ़भावानां कथातिसुदूरे इति न्यूनातिन्यूने आधिक्ये च कैमुत्यं सूचितं। दासवद्भाति दासत्वमेव प्रकाशते। कीटके इत्यल्पार्थे क प्रत्ययः भूपएव क्षुद्रकीटः क्षुद्रप्राये नृपे का कथा।

द्वारा जो ज्ञानादि होते हैं, उस का सादृश्य कहींपर नहीं है ॥६४॥

ब्रह्मादि देवों के उपास्य, सर्वजन नियन्ता स्वयं भगवान् श्री चैतन्य देव का भजन यदि जगतके कोई प्राणी नहीं करता है तब उसे अचेतन ही माना जायेगा ॥६५॥

जिनकी आशा श्रीमन्महाप्रभु श्रीचैतन्य देव के चरण युगल में है, उनके निकट इन्द्र भी दास के समान प्रकाशित होता है। कीट

यस्याशा कृष्णचैतन्ये नृपद्वारि किमर्थिनः ।
चिन्तामणिमयं प्राप्य को मूढ़ो रजतं व्रजेत् ।।९७।।
ध्यायन्तोगिरिकन्दरेषु वहवो ब्रह्मानुभूयासते
योगाभ्यासपराश्च सन्ति वहवः सिद्धा महीमण्डले ।

वशीभवन्ति देवाद्या यस्याशा गौरपादयोः ।
क्षुद्रा नृपास्तु किं गण्यास्तद्भक्तास्त्वधिकारिकाः ।।९६।।

ननु देवा दासवद्भवन्तु राजानः क्षुद्रतरास्तेषां कथा नान्तु संप्रति गृहस्थानामस्माकं राजद्वारं विना जीविका हानिरित्यत्र सेर्ष्यमाह यस्याशा कृष्णचैतन्ये नृपद्वारीति । यस्यार्थिनः श्रीकृष्णश्चैतन्ये आशा तस्य नृपद्वारि किं । तत्र दृष्टान्तः चिन्तामणिं प्राप्य मूढ़ोऽयं कः रजतमनुसन्धातुं व्रजेत् ।।९७।।

श्रीगौरभजनं चिन्तारत्नं प्राप्य महाजनाः ।
न यान्ति क्वापि राजादौ यान्ति चेत् करुणावशाः ।।९७।।

ननु केऽपि निर्जनस्था ब्रह्मध्याननिष्ठाः केऽपि च विद्याधनादि गर्व्वाधिकजल्पाश्च कथमत्र नाभिलषन्ति नाभिलषन्तु तेषां प्रेमरसास्वादनसुखं नास्तीत्याह । ध्यायन्तो गिरिकन्दरेष्वित्यादि । गिरिकन्दरेषु वहवो ब्रह्मनिर्भेदं स्वज्ञानस्वरूपं ध्यायन्तो ब्रह्मसुखमनुभूयासते उपविशन्ति । एवं योगाभ्यासपराश्च वहवः सन्ति । सिद्धा

तुल्य नृपति की कथा तो क्या है ।।९६।।

देवगण दास के समान, राजागण क्षुद्रतर होने पर भी अर्थाधीन जगत् है, अर्थ के लिए समर्थ व्यक्ति के पास जाये विना जीविका निर्वाह नहीं होगा ? इस के उत्तर में कहते हैं–भिख माँगने बाला व्यक्ति की आशा श्रीचैतन्य चरणों में हो तो, उसका राजा के पास जाने की आवश्यकता ही क्या है ? चिन्तामणि प्राप्त होने के पश्चात् कौन व्यक्ति रजत प्राप्ति की आकाङ्क्षा करता है ।।९७।।

कोई पर्वत की गुहा में ब्रह्म चिन्ता में लीन है, कोई योगाभ्यास में तत् पर है, सिद्धगण जनालय में विचरण करते रहते हैं, हैं, कोई कोई विद्या ऐश्वर्य्य धन, अभिजन मद से मत्त होकर मिथ्या

योगाभ्यासपराश्च वहवो जल्पन्ति मिथ्योद्धताः
कोवा गौरकृपां विनाद्य जगति प्रेमोन्मदो नृत्यति ॥९८॥
काशीवासीनपि न गणये किं गयां मार्गयामो
मुक्तिः शुक्तीभवति यदि मे कः पदार्थप्रसङ्गः ।
त्रासाभासः स्फुरति न महारौरवेऽपि क्व भीतिः
स्त्रीपुत्रादौ यदि कृपयते देवदेवः स गौरः ॥९९॥

अपि महीमण्डले सन्ति । एवं वहवो जना विद्यादिभिर्मिथ्योद्धताः प्रमत्ता जल्पन्ति । ते ते तत्तत् कुर्व्वन्तु । किन्तु गौरहरिकृपां विना जगति कोवा प्रेम्ना उद्गतहर्षं सन्नृत्यति । अतो गौरकृपापात्राणां यादृक् प्रेमानन्दस्तादृक् कुत्रापि नास्तीति । सर्व्वं त्यक्त्वा गौरहरि चरणाम्वुजमाश्रयतेति भावः ॥९८॥

ज्ञानयोगकन्तुनिष्ठावहवः सन्तु भूतले ।
चैतन्यचरणाम्भोजकृपाजन्यसुखं कुतः ॥९८॥

श्रीचैतन्यकृपाविलासिनां कुत्राप्यभिलाषभये नस्त इति दर्शयन् काश्याद्याक्षेपेण तत्कृपामुत्कृष्टां स्त्रीपुत्रादिभीतान् शिक्षयति । काशी वासीनपीत्यादि । यदि देवानां देव उपास्यः स गौरः कृपयते करुणां करोति तदा काशीवासीनपि न गणये न गणयामि काश्यां वसती–त्यर्थेनानुवन्ध इ प्रत्ययेन इदन्तः नत्विनन्त । द्वितीयावहुवचने काशी-वासीनिति । तानपि न गणयामि किं गयामन्वेषयामः । यदि मम सम्वन्धे मुक्तिः शुक्तीभवति शम्वुकतुल्यां भवति परस्यान्यास्यार्थस्य फलस्य कः प्रसङ्गः ननु तथापि स्त्रीपुत्रादिविषये शङ्का तत्राह यदि महारौरवे नरकविशेषेऽपि न त्रासाभासः स्फुरति तर्हि स्त्रीपुत्रादौ

कथन में प्रवृत्त हैं, किन्तु, श्रीगौरहरि के विना संसार में कौन व्यक्ति प्रेममद से मत्त होकर नृत्य करेगा ? ॥९८॥

श्रीगौरहरि की कृपा होती, काशी वासी को भी नहीं मानुँगा और गयाधाम का अन्वेषण भी नहीं करूँगा, जब मेरे लिए मुक्ति भी अतितुच्छ पदार्थ है, तो दूसरी वातों को कहना ही क्या है ? महा रौरव नामक नरक के नाम से जव हृदय भयग्रस्त

।।*।। इत्यष्टमो विभागः ।।*।।

* अथ चैतन्योत्कर्षता ।। *

मत्तकेशरिकिशोरविक्रमः प्रेमसिन्धु जगदाप्लवोद्यमः ।
कोऽपि दिव्यनवहेमकन्दली कोमलो जयति गौरचन्द्रमाः ।।१००।।

क्व भीतिः अतः सर्व्वत्राग्रहभये त्यक्त्वा श्रीचैतन्यचरणाम्बुजमाश्रयन्तु तत्कृपयैव पञ्चमपुरुषार्थलाभोनान्यैरित्युपसंहारः ।।९९।।

काश्यादेर्गणना न स्यान्मोक्षः शम्बुककक्षकः ।
क्व भीर्निरयपत्न्यादौ श्रीचैतन्यरूपा यदि ।।९९।।

।।*।। इति श्रीचैतन्यचन्द्रामृते लोकशिक्षाप्रकरणे-
रसिकास्वादिन्यां टीकायामष्टमो विभागः ।।*।।

इदानीं रूपगुणमाधुर्य्यवीर्य्यौदार्य्यादिभिरवतारोत्कर्षतां वर्णयन् प्रकरण मारभते दशभिः पद्यैः। अथ चैतन्योत्कर्षता इति तत्र प्रथमं रूपगुण माधुर्य्यं वीर्य्यं प्रेमौदार्य्यञ्चाह। मत्तकेशरीति। गौरहरिरेव चन्द्रमा गौरचन्द्रमा जयति सर्व्वोत्कर्षेण वर्त्तते। जयति रत्राकर्म्मकः सर्व्वोत्कर्षवचनः। कोऽपि कैरप्यनिर्व्वचनीयः। किम्भूतः केशरिषु सिंहेषु यः किशोरः स केशरिकिशोरः मत्तश्चासौ स चेति स तस्य विक्रम इव कलिकालवारणे विक्रमो यस्य सः। किम्भूतः प्रेमेत्यादि। प्रेमैव सिन्धुस्तेन जगतां चतुर्द्दशभुवनानामाप्लावने उद्यमो व्यवसायो यस्य सः। पुनः किम्भूतः दिव्येत्यादि। दिव्या मनोहरा हेम्नां कन्दली नवोद्भिदि कोरकस्ततोऽपि कोमलः सुकुमारः। मत्तेति लुप्तोपमालङ्कारेण वीर्य्यं दीर्घग्रीवत्वं क्षीणमध्यत्वं

नहीं होती है तो स्त्री पुत्र से भय की आशाङ्का ही क्या है? अतः सर्वत्र आग्रह एवं भय को छोड़कर श्रीचैतन्य चरणाश्रय करना ही श्रेयस्कर है, उस से ही पञ्चम पुरुषार्थ लाभ होगा ।।९९

इति अष्टमविभाग।

**** अथ श्रीचैतन्यदेवकी श्रेष्ठता। ****

मत्त सिंहशावक के सदृश विक्रमशाली, सुवर्ण के नवाङ्कुर सदृश सुकुमार श्रीगौरचन्द्र प्रेमसिन्धु के द्वारा जगत् को आप्लावित

सौन्दर्य्ये कामकोटिः सकलजनसमाह्लादने चन्द्रकोटि-
र्वात्सल्ये मातृकोटिस्त्रिदशविटपिनां कोटि रौदार्य्यसारे।
गाम्भीर्य्येऽम्भोधिकोटिर्मधुरिमणि सुधाक्षीरमाध्वीककोटि-
र्गौरोदेवः स जीयात् प्रणयरसपदे दर्शिताश्चर्य्यकोटिः ॥१०१॥

कलिदोष वारणमथनश्च ध्वनितं। ध्वनिरतिशयितपदपदार्थत्वात्। चन्द्रमा इति प्रेमसिन्धुरिति च रूपकःजगद प्लावकइति आतशयोक्तिः कोऽपि दिव्येति व्यतिरेकः। यथा कथञ्चित् सादृश्यमुपमा सा भवेद्द्विधा। पूर्णा लुप्तेति सादृश्येवादेर्योगविलोपयोः। इत्युपमा-लक्षणं अभिन्नयोः कश्चिदंश उपमानोपमेययोः। यत्तादात्म्यं द्वयोस्त-त्तद्रूपकं कथ्यते वुधैः। व्यतिरेकः स विज्ञेय उपमानाद्विलक्षणः॥१००

नवकाञ्चन कन्दलकान्ततनुः प्रियताम्बुधिवर्द्धिशचीप्रजनुः।
जितकेशरिदिव्यकिशोरमदः किल गौरविधुर्जयति प्रमदः।१००।

ततः सौन्दर्य्याह्लादनवात्सल्यौदार्य्यगाम्भीर्य्यमाधुर्य्याधिक्य-मुल्लाशयन् वातिरेकविशेषोक्तालङ्काराभ्यां सर्व्वोत्कर्षं प्रतिपादयति सौन्दर्य्ये कामकोटि रित्यादि। स प्रसिद्धः श्रीगौरोदेवः दीव्यति निजगूढ़प्रेमरसास्वादनार्थं तद्द्वारा तद्विस्ताराय च भक्तवृन्दै र्विहरति देवो जीयात् सर्व्वोत्कर्षेण वर्त्तते। किम्भूतः सौन्दर्य्ये कामकोटि-रित्याद्यैः सप्तभिविशेगणैर्विशिष्टः। त्रिदशविटपिनां कल्पद्रुमानां प्रणयरसस्य पदे विषये। विशेषोक्तिर्यथा। विशेषोक्तिः परिकर, स्यात् साकूतैर्विशेषणैरिति॥१०१॥

स्मरचन्द्रसुरद्रुमातृशत प्रियसिन्धुसुधारुचिरादिकतः।
अतिसुन्दरतादिक कोटिगुणो जय माधव काञ्चनकान्तितनो ॥१०१॥

कर सर्वोत्कर्ष से विराजित हैं॥१००॥

जो कोटि कन्दर्प के समान परम सुन्दर कोटि चन्द्र के समान सव के आह्लाद जनक, कोटि मातृ सदृश स्नेहवान्, कोटि कल्पवृक्ष सदृश दाता, कोटि समुद्र के समान गम्भीर स्वभाव, अमृत सदृश मधुर, कोटि कोटि वैचित्र प्रणय रसका प्रदर्शक श्रीचैतन्य चन्द्र जय युक्त हो, ॥१०१॥

स्वपादाम्भोजैकप्रणयलहरीसाधनभृतां
शिवब्रह्मादीनामपि च सुमहा विस्मयभृतां ।
महाप्रेमावेशात् किमपि नटतामुन्मद इव
प्रभुर्गौरोजीयात् प्रकट परमाश्चर्य्यमहिमा ।।१०२।।
माद्यत्कोटिमृगेन्द्रहुंकृतिरबस्तिग्मांशुकोटिच्छविः
कोटीन्दूद्भटशीतलो गतिजितप्रोन्मत्तकोटिद्विपः ।

शिवादि चमत्कारकारि स्वभक्तवृन्द दृष्ट प्रकटपरमाद्भुत-महिम्नः श्रीगौरहरेः सर्व्वोत्कर्षतामुल्लासयति स्वपादाम्भोजैक प्रणयलहरीत्यादि। गौरो जीयात् सर्व्वोत्कर्षेण विराजतां अतएव प्रभुः स्वयं भगवान्। भक्तानां सम्वन्धे प्रकटीभूत परमचमत् कार-कारी महिमा येन सः। भक्तानां कीदृशानां पादाम्भोजयोरेका पर्व्वातिशायिनी प्रणयस्य स्नेहपरिपाकस्य लहरी तरङ्गरूप नाना विकारस्तस्याः साधनमिन्द्रियव्यापारसाध्यं भावप्राकटाप्रयोजक-विशेषं विभ्रति पुष्णस्ति ये तेषाः अथच शिवब्रह्मादीनामपि सम्वन्धे अतिशयं विस्मयं विभ्रति येच तेषां। पुनः किम्भूतानां महाप्रेमा महाभावस्तत्रावेशादुन्मद इव किमपि सचमत्कारं नटतां नर्त्तनं कुर्व्वतां ।।१०२।।

शिव पद्मज दैवत विस्मयने स्वपदाम्बुजषट् पदभक्तगणे ।
विततादभूत हि महिमादिभरः कलधौततनुर्जयतीशवरः ।।१०२।।

इदानीमतिविक्रमतेजोदीप्ति स्निग्धता गतिमाधुर्य्यैश्वर्याद्वैत ब्रह्मश्रैष्ठानि दर्शयन्नुत्कर्षतामाह। माद्यत् कोटीत्यादि श्रीश्रीशची-नन्दनो विजयते सर्व्वोत्कर्षेण वर्त्तते किम्भूतः माद्यन्तः कोटिसख्या-

---

स्वीय चरण पद्म के स्नेह तरङ्ग धारी शिव विरिञ्चि का विस्मय प्रद, एवं प्रेमावेश से उन्मत्तवत् नृत्य कारी भक्त गणों के सम्वन्ध में जो परमाश्चर्यं महिमा प्रकाश करते रहते हैं, उन स्वयं भगवान् श्रीगौर हरि सर्वोत्कर्ष रूप से विराजित हों ।।१०२।।

कोटि मत्त मृगेन्द्र के समान जिनका हुङ्कार शब्द, कोटि सूर्य्य तुल्य जिनकी कान्ति, कोटि चन्द्र सदृश जिनकी शीतलता, कोटिमत्त

नाम्ना दुष्कृतकोटिनिष्कृतिकरो ब्रह्मादिकोटीश्वरः
कोट्यद्वैतशिरोमणिर्विजयते श्रीश्रीशचीनन्दनः ॥१०३॥
योमार्गं दूरशून्योवत इह वलवत् कण्टको योतिदुर्गो
मिथ्यार्थभ्रामको यः सपदि रसमयानन्दनिःस्यन्दको यः ।

विशिष्टा ये मृगेन्द्रास्तेषां हुङ्कृति रिव रवो यस्य स तिग्मांशुनां कोटि च्छवितोऽपि छविर्यस्य सः। नन्वेक सूर्य्य छविरसह्या कथं कोटि संख्यकानां छवयः सह्यास्तत्राह कोटिसंख्याकानामिन्दूनामुद्भुटादति-शयाद् शीतलादपि शीतलः। गत्या जिताः प्रोन्मत्ता कोटिद्विपा हस्तिनो येन सः नाम्ना हरेकृष्ण इत्यादिना मन्त्रेन किम्वा स्वनाम्ना श्रीशचीनन्दन चैतन्य श्रीकृष्णचैतन्य विश्वम्भरेत्यादिना कोठ्यात-पध्नदुर्गतानां निष्कृतिकरः उद्धारकरः ब्रह्मादीनां देवानां कोटीश्वरः कोटिसंख्यानामद्वैतानां निर्भेद ब्रह्मणां शिरोमणिः परमपराकाष्ठा-परीपाकः घनीभूतनराकार परब्रह्मेत्यस्य। उदात्तालङ्कारेण सर्व्वोत्कृष्टत्वमुक्तम्। परा समृद्धिवस्तूनामुदात्तमिति कथ्यते ॥१०३॥

मदमत्तमृगेन्द्रशतामुतहुङ्कृतिरावततिसुखयंश्च वहून् ।
सुखचिन्मयकोटि शिरोमुकुटः कनकाञ्चि तनुर्जयति प्रणटः ॥१०३

हृदयान्धकारनाशकत्वेन निगूढ़प्रेमरसास्वादनमार्गप्रकाश-कत्वेन च प्रदीपरूपकत्वेन तमुत्कर्षयति। योमार्गो दूरशून्येत्यादि नवद्वीपे दीप्तिं कुर्व्वन् नवद्वीपं दीप्यन् स चासौ प्रदीपश्चेति स कोऽपि तादृक् प्रदीपारूपः गौरहरिर्जयति यस्तं प्रसिद्धं मार्गं सद्यः प्रद्योतयन् यो मार्गो दूरश्चासौ शून्यश्चेति सः यो वा वताश्चर्य्ये वलवन्तः

हस्ती की अपेक्षा भी जिनकी सुन्दरगति जो निज नाम के द्वारा दुर्गत व्यक्ति का निष्कृति कारक, कोटि कोटि ब्रह्मादि का ईश्वर, कोटि कोटि अद्वैतवादियों के शिरोमणि हैं, वे श्रीशची नन्दन जय युक्त हो ॥१०३॥

दूर शून्य, शुष्कज्ञान, नित्य नैमित्तिक कर्म्मादि का आग्रह रूप अतिशय कण्टकाकीर्ण, मिथ्या विषय भ्रान्ति जनक जो मार्ग उसको जो रसमय आनन्द निःस्यन्दो रूप से उद्दीप्त करने के लिए,,

सद्यः प्रद्योतयंस्तं प्रकटितमहिमा स्नेहवान् हृद्गुहायाः
कोऽप्यन्तर्ध्वान्तहन्ता स जयति नवद्वीपदीप्यत् प्रदीपः ॥१०४॥
दूरादेव दहन् कुतर्कशलभान् कोटीन्दुसंशीतलो
ज्योतिः कन्दलसद्मसन्मधुरिमा वाह्यान्तरध्वान्तहृत् ।

कण्टकाः शुष्कज्ञाननित्यनैमित्तिककर्म्माद्याग्रहरूपाः यत्र सः अत-एवातिदुर्गः दुष्प्रवेशनीयः । यो वा मिथ्याभूतेष्वर्थेषु भ्रमयतीति तद् भ्रामकः । अथच प्रेमरसमयो य आनन्दस्तं निःस्यन्दयति प्रवाहयति यः स प्रदीपरूपः स किंभूतः प्रकटितो महिमा प्रभावो येन सः हृदेव गुहा तस्या अन्तर्ध्वान्तहन्ता तन्नाशकः । ध्वान्तान्यन्धकाराः पक्षे अज्ञानापराध कामक्रोधाद्यसत्चेष्टादयः । ननु तैलादि विना कथं ज्वलतिप्रकाशते वा तत्राह । स्नेहवान् स्नेहस्तैलादि । पक्षे प्रेम-परिपाकः । नवद्वीप प्रकटस्नेहपूरित प्रोज्ज्वल प्रदीपरूपः श्रीशची-नन्दनः कर्म्मज्ञानाद्याग्रहकण्टकादिकं दरयित्वा हृत्तमोनाशयित्वा च परमप्रेमानन्दरस प्रकाशकोजयतीत्यर्थः ॥१०४॥

रुचिदीपकरूपशचीतनुजः प्रियहृत्तम आदिकनाशमयः ।
निजभाव चकाशन दीप्तिचयो जयतीह महामहिमादिमयः ।१०४।

पुनरद्भूतप्रदीपत्वेनोत्कर्षयति । दूरादेवदहन्नित्यादि । स गौरचन्द्रो नवद्वीपेऽद्भूतः प्रदीपरूपोजाज्वलीति । पक्षे भावोद्दीप्तया जगदन्तः प्रकाशयन् सर्व्वोत्कर्षेण वर्त्तते । अद्भुतत्वमाह अन्यः प्रदीपः निकटस्थान् कीटान् दहति अयन्तु कुतर्कपतङ्गान् दूरादेव दहन् । अन्योदीपस्तापकोऽयं पुनः कोटिसङ्ख्यातेन्दुभ्यः सम्यक् शीतलः । ज्योतिषां कन्दलस्य सम्मुहस्य सद्म वसतिस्थानं । रात्रि-

---

हृदय कन्दरा का अन्धकार नाशक स्नेहपूर्ण उज्ज्वल नवद्वीप स्वरूप प्रभूत प्रभाव शाली श्रीगौर हरि जय युक्त हो ॥१०४॥

दूर से कुतर्क रूप पतङ्ग दहनकारी, कोटि चन्द्रकी अपेक्षा से भी शीतल, ज्योतिः समूह का आवास स्थान, अतिशय मधुर, वाह्याभ्यन्तर का अन्धकार नाशक, स स्नेह अन्तःकरण रूप वर्त्तिका के द्वारा

सस्नेहाशयवर्त्तिदिव्यविसरत्तेजाः सुवर्णद्युतिः
कारुण्यादिह जाज्वलीति स नवद्वीपप्रदीपोऽद्भुतः ।।१०५।
चीत्कारैर्दशदिङ्मुखं मुखरयन्नट्टट्टहासच्छटा
वीचीभिः स्फुटकुन्दकैरवगणप्रोद्भासि कुर्व्वन्नभः !
सर्व्वाङ्गं पवनोच्चलच्चलदलप्रायप्रकम्पं दध-
न्मत्तः प्रेमरसोन्मदाप्लुतगतिर्गौरोहरिः शोभते ।।१०६।।

न्दिवं समानत्वात् । सन् अत्युत्कृष्टो मधुरिमा माधुर्य्यं यस्य स तस्य तु तादृशमाधुर्य्याभावात् । सत्वनावृतध्वान्तहारी । अयन्तु वाह्यान्तरयोर्ध्वान्तिमन्धकारं हरति । स्नेहेन सह वर्त्तमानो य आशयः स एव वर्त्ति शलाका ततो दीव्यत् विसरत् निर्गच्छत्तेजो यस्य सः सुवर्णकान्तिरिव कान्तिर्यस्य सः। कारुण्याद्धेतोर्जाज्ज्वलीति प्रकाशते १०५
विधु शीतल दूरदहोज्वलितः प्रियताशयवर्त्तिमहोमहितः ।
परमाद्भुतदीपशचीतनयः सततं ज्वलति प्रणयादिमयः ।।१०५।।

पुनरनुभावसात्त्विकैः शोभामुत्कर्षयति । चीत्कारैर्दशदिङ्मुखमित्यादि। गौरहरिः शोभते दिव्यसुधया सर्व्वोत्कर्षेण वर्त्तते । चीत्कारो हर्षविषादजन्योत्कण्ठतालुव्यापारित स्वरविशेष मुखरयन् शब्दयन् मुखरशब्दे प्रतिध्वनयन्नित्यर्थः । अट्टेति सशब्दप्रहासकान्तिलहरीभिः स्फुटः सुविकासितो यः कुन्दकैरवानां गण इव तेन नभः प्रोद्भासि परमोज्ज्वलं कुर्व्वन् । पवनेनोच्चलत् यच्चलदलं तत्प्रायं कम्पो यत्र तदङ्गं दधत् । यतोमत्तः अतएव प्रेमरसेन उद्गतोमदो हर्षविशेषस्तेनाप्लुता कुन्दनरूपा गतिर्यस्य सः ।।१०६।।

प्रज्वलित सुवर्ण कान्ति, श्रीगौरचन्द्र करुणावशतः इस प्रकार अद्भुत प्रदीप रूप में, श्रीनवद्वीप में जाज्वल्यमान है ।।१०५।।

उच्चहरि ध्वनि द्वारा दशदिक् मुखरित अट्ट अट्ट अर्थात् स शब्द प्रहास कान्तितरङ्ग से गगन मण्डलको कुन्द पुष्प कुमुद पुष्प के समान धवलित तथा चलितपत्र प्राय प्रकम्पित अङ्ग को धारण कर प्रेमरस मद से उन्मत्त होकर कुन्दन गति से श्रीगौर हरि विराजित हैं ।।१०६।।

निर्द्दोषश्चारुनृत्यो विधुतमलिनता वक्रभावः कदाचि-
न्निःशेषप्राणितापत्रयहरणमहाप्रेमपीयूषवर्षी ।
उद्भूतः कोऽपि भाग्योदयरुचिर शचीगर्भदुग्धाम्बुराशे
र्भक्तानां हृच्चकोरस्वादितपदरुचिर्भाति गौराङ्गचन्द्रः ॥१०७॥

सिञ्चन् सिञ्चन्नयनपयसा पाण्डुगण्डस्थलान्तं
मुञ्चन् मुञ्चन् प्रतिमुहुरहो दीर्घनिःश्वासजातं ।

मुखरीकृतचीत्कृतिदिग्विदिशः प्रियतारसमुन्मदकुन्दयशः ।
ध्वनिहासमहोज्ज्वलविष्णुपदः परिशोभित ईशवरोवरदः ॥१०६॥

पुनरद्भुतचन्द्रत्वेनोत्कर्षयति । निर्द्दोष इत्यादि । कोऽप्य-निर्व्वचनीय श्रीगौरचन्द्रोभाति । परमोद्दीप्तिलहर्य्या सर्व्वोत्कर्षेण वर्त्तते अद्भुतत्वमाह विशेषणैर्निर्द्दोषोनास्ति दोषा रात्र्यपेक्षा यस्य चारु मनोहरं नृत्यं यस्य सः । विधुतो दूरीकृतो मलिनता वक्रभावो यस्य सः । तद्दर्शनमात्रेण मालिन्यकौटिल्यादि दूरीभवतीति सूचितं निःशेषाणां सर्व्वेषां प्राणिनां तापत्रयं पञ्चभूतेन्द्रियदेवताजन्यं तस्य हरणाय महाप्रेमामृतं वर्षितुं शीलं यस्य सः । भाग्यानामुदयो यस्याः सा रुचिरा परमसुन्दरीचासौ शचीचेति सा रुचिरशची । भाग्योदयाचासौ रुचिरशचीचेति सा तस्या गर्भ एव दुग्धाम्बुराशिः समुद्रस्तस्मादुद्भुतः भक्तानां हृदयान्येव चकोरास्तैः स्वादिता-स्वादितपदरुचिः पदाम्बुजमाधुरी यस्य । पक्षे पदं रश्मिः चन्द्रस्य रात्र्यपेक्षा नृत्याभावः कलङ्कवक्रताध्यात्मिकादि तापहरण।भावा-देवास्याद्भुतत्वं तत्तद्गुण वैशिष्ट्यात् ॥१०७॥

स शचीजलधिजात निशापतिर्दिनरात्रिरुचिर्नटराजगतिः ।
निजभक्तचकोरकरस्य पदः परिभाति जगत्त्रयतापनुदः ॥१०७॥

रात्रि की अपेक्षा रहित, निष्कलङ्क वक्रभाव हो,शून्य मनोहर नृत्य कारी सकल प्राणि के तापत्रय हरणार्थ महाप्रेमवर्षी एवं भक्त गण के चित्तचकोर जिन के चरण माधुरी का आस्वादन कर रहें हैं, वे अद्भुत श्रीगौरचन्द्र शचीगर्भरूप दुग्ध समुद्र से उत्पन्न होकर प्रकाशित हैं ॥१०७॥

उच्चैः क्रन्दन् करुणकरुणोद्‌गीर्णहाहेति रावो
गौरः कोऽपि व्रजविरहिणीभावमग्नश्चकास्ति ॥१०८॥
बिभ्रद्वर्णं किमपि दहनोत्तीर्णसौवर्णसारं
दिव्याकारं किमपि कलयन् दृप्तगोपालबालः।
आविष्कुर्व्वन् क्वचिदवसरे तत्तदाश्चर्य्यलीलां
साक्षाद्राधामधुरिपुवपुर्भाति गौराङ्गचन्द्रः ॥१०९॥

विरहिण्या राधिकाया भावमग्नत्वानुभावान् दर्शयन् तमुत्कर्षयति। सिञ्चन् सिञ्चन्नित्यादि। कोऽपि गौरश्चकान्ति सर्व्वत्र निजभावं प्रकाशयन् सर्व्वोत्कर्षेण वर्त्तते। व्रजे विरहिणी श्रीराधा तस्या भावे महाभावामृतजलधौ मग्न सिञ्चन् सिञ्चन्नित्यादिवीप्सया मुद्दीप्तसात्त्विकभावोर्दाशतः। नयनाश्रुजलेन पाण्डुगण्डस्थलान्त इत्येकवचनेन वामगण्डस्थलप्रान्तमिति बोद्धव्यं। विरहिण्या वामहस्तोपरिस्थितत्वात्। गण्डस्थलान्ताविति वा पाठः। पाण्डुत्वेन वैवर्ण्यमुक्तं। दीर्घानां निःश्वासानां जातं समूहं प्रति मुहुर्मुहुः मुञ्चन् मुञ्चन्। उच्चैर्यथा स्यात्तथा क्रन्दन् रुदन्। करुणादपि करुणः अति करुणारससूचकः उद्‌गीर्णो हा हेति रावो यस्य ॥१०८॥

नयनाश्रुछलाप्लुतगण्डयुगः कलितश्वसन व्रजहारवणः।
विरहार्त्ति सखीरतिमग्नतरः परिभाति च कोऽपि सुगौरवरः ॥१०८॥

परमदिव्यरूपोल्लासेन राधामाधवयोरेकीभूतवपुषः श्रीगौरहरेरुत्कर्षमुपसंहरति बिभ्रद्वर्णमित्यादि। गौराङ्गचन्द्रो भाति परमशोभोत्कर्षेण वर्त्तते। किम्भुतः दहनादुत्तीर्णः सुवर्णसम्बन्धो सारो यत्र तथाभूतं किमपि वर्णं बिभ्रत्। पुनः किम्भूतः दृप्त उद्दीप्तरूपः

जो श्रीराधा के महाभावामृत जल निधि में निमग्न होकर नयन जल द्वारा पाण्डुवर्ण गण्डस्थल के प्रान्तभाग को सेचन कर रहे हैं, जो बारम्बार दीर्घनिःस्वास परित्याग करते हैं, एवं जो करुणा सूचक हा हा स्वर से उच्चैः स्वर से क्रन्दन करते है, एतादृशा अनिर्वचनीय श्रीगौर हरि सर्वोत्कर्ष से विराजित हैं, ॥१०८॥

दाहोत्तीर्ण सुवर्ण वर्ण परम सुन्दराकृति श्रीगौरचन्द्र गोपाल

॥*॥ इति नवम विभागः ॥*॥

* अथावतारमहिमा *

अकस्मादेवाविर्भवति भगवन्नामलहरी
परीतानां पापैरपि पुरुभिरेषां तनुभृतां ।
अहो वज्रप्रायं हृदपि नवनीतायितमभू-
न्नृणां लोके यस्मिन्नवतरति स गौरो मम गतिः ॥११०॥

गोपालवालः सन् किमपि दिव्याकारं चिन्मयविग्रहं कलयन् क्वचिद-वसरे तां तामतिचमत्कारकारिणीं गोपाल कैशोरलीलां आविष्कुर्व्वन् प्रकटयन् साक्षाद्राधामाधवयोर्बपुर्यत्र सः । साक्षात्तयोरेकीभुत-शरीरत्वात् ॥१०९॥

वृषभानुसुता वपुरेकतनु कनकोज्ज्वलभ्राजितपुष्पधनुः ।
कृतगोपकुमार विलासभरः परिभाति विधूज्ज्वलगौरवरः ॥१०९

॥*॥ श्रीचैतन्यचन्द्रामृते श्रीचैतन्योत्कर्षप्रकरणे रसिका-स्वादिन्यां टीकायां दशपद्यात्मकोनाम नवमो विभागः ॥*॥

इदानीं श्रीचैतन्यावतारमहिमानं दर्शयितुं प्रकरणमारभते । एकविंशत्या पद्यैरथावतारमहिमेति । अत्र प्रथमं भगवन्नामाविर्भावं अति कठिनहृदयानां द्रवीभावञ्च दर्शयन्नवतारमहिमानमवतारयति अकस्मादित्यादि । स गौरो मम गतिर्गम्यः यस्मिन् गौरहरौ नृणां लोके प्रपञ्चगोचरे लोके ऽवतरति सति महद्भिः पापैर्व्याप्तानां तनुभृतां सम्बन्धे भगवतः स्वयं भगवतः श्रीकृष्णस्य नाम्नां लहरी हरेकृष्ण

वाललीला को प्रकाश कर श्रीराधा माधव के एकीभूत विग्रह स्वरूप परम शोभित होभित होकर विराजित हैं, ॥१०९॥

इति श्रीचैतन्योत्कर्ष दशपद्यात्मक नवमविभाग ।

* अथावतारमहिमा *

मनुष्य लोक में श्रीचैतन्य चन्द्र अवतीर्ण होने पर सुमहत् पाप लिप्त मनुष्य को उद्धार करने के लिए स्वयं भगवान् श्रीकृष्ण की नाम लहरी अर्थात् हरे कृष्ण हरेकृस्ण इत्यादि नाम परिपाटी सहसा

न योगो न ध्यानं नच जपतपस्त्यागनियमा
न वेदा नाचारः क्व नु वत निषिद्धाद्युपरतिः ।
अकस्माच्चैतन्येऽवतरति दयासारहृदये
पुमर्थानां मौलिं परमिह मुदा लुण्ठति जनः ॥१११॥

हरेकृष्ण इत्यादीनां परिपाटी अकस्मादेवाविर्भवति प्राकट्यं प्राप्नोति अहो आश्चर्य्यं कोवा गौरावतारस्य महिमा वक्तव्यो येनैतेषां वज्र-प्रायमतिकठिनं हृदपि नवनीतायितं स्नेहेन द्रवीभूतमभूत् ॥११०॥

यस्मिन् गौरेऽवतीर्णे प्रागधरेकृष्णेति वर्णकाः ।
आविः स्युश्चित्तकोमल्यं स्यात् श्रीगौरः स मे गतिः ॥११०

साधनमात्ररहितानां निषिद्धाद्यासक्तानामपि प्रेमालाभात्तद-वतारमहिमानमुल्लासयति । न योगोनध्यानमित्यादि । दयासार-हृदये चैतन्येऽवतरति सति यस्य जनस्य योगादयो न सन्ति निषिद्धादौ पापादिकर्म्मणि वत खेदे क्व उपरति निवृत्तिस्तत्र तत्राति शयरतिरित्यर्थः । स जनः पुमर्थानां मौलिं प्रेमाणं परमुत्कृष्टं इह संसारे मुदा हर्षेण लुण्ठति बलात्कारेण गृह्णाति वतेत्यत्रैवान्वितं आश्चर्य्यार्थे किमाश्चर्य्यमेवंभूतस्यापि तादृक् प्रेमलाभः कोऽसाववतार महिमा ॥१११॥

नास्ति योगादिकं यस्य निषिद्धाचरणं सदा ।
लुण्ठति प्रेमरत्नं स गौरेऽवतरति प्रभो ॥१११॥

प्रकाशित हुई, एवं सब पातकी के वज्रतुल्य हृदय भी नवनीत के समान स्नेह से द्रवीभूत हुआथा, वही श्रीगौराङ्ग मेरी गति हैं, ११०

अकस्मात् सदय हृदय श्रीचैतन्य देव अवतीर्ण होने से जिन लोकों में योग, ध्यान, जप, तप, दान, व्रत, वेदाध्ययन, सदाचार प्रभृति कुछ भी नहीं था, पाप कर्म से निवृत्ति की वात तो क्या कहूँ, इस संसार में वे सब भी हृष्टचित्त होकर परम पुरुषार्थ के शिरो-भूषण प्रेमानन्द प्राप्त किए हैं, आश्चर्य यह है कि-इस प्रकार प्रेमलाभ किसी अवतार से भी नहीं हुआ ॥१११॥

महाकर्म्मस्रोतो निपतितमपि स्थैर्य्यमयते
महापाषाणेभ्योऽप्यतिकठिनमेति द्रवदशां।
नटत्यूद्‌र्ध्वं निःसाधनमपि महायोगिमनसां
भुवि श्रीचैतन्येऽवतरति मनश्चित्रविभवे ॥११२॥
स्त्रीपुत्रादिकथां जहुर्व्विषयिणः शास्त्रप्रवादं वुधा
योगीन्द्रा विजहुर्मरुन्नियमजक्लेशं तपस्तापसाः।

तदवतारेण सर्व्वेषामन्यानि साधनानि विघटय्य तत्प्रेमसाधनमेव स्थापितमिति तदवतारमहिमानं प्रकटयति महाकर्म्मस्रोत– इत्यादि। भुवि श्रीचैतन्येऽवतरति सति चित्रमाश्चर्य्यं विभवो यस्य तस्मिन्। कर्म्मिणां मनः महाकर्म्मरूपेषु स्रोतः सु प्रवाहेषु पतितमपि स्थैर्य्यमयते तत्प्रेमाणं प्राप्य स्थिरीभूतं भवति। महापाषाणेभ्यो ऽकर्म्मशिलाभ्योऽतिशयकठिनमपि मनः द्रवदशामेत पोप्नोति प्रेमद्रवी भूतं भवति। महायोगिमनसां महायोगयुक्त मनोयेषां। महायोगमनसामितिपाठे महायोगे मनो येषां: मनः निःसाधनं योगाद्विरतं सदूद्‌र्ध्वं नटति प्रेमरसेन प्रफुल्लितं भवति। एतेनावतारस्य महिमोक्तः ॥११२॥

त्यक्तकर्म्माग्रहः कर्म्मतीलाहृद्‌द्रवतां गतं।
नठत्युद्धं योगिमनो गौरे प्रकटतां गते ॥११२॥

विषयिणो दार्शनिका योगीन्द्रास्तापसा यतयश्च चैतन्यावतारे स्वस्वमतं त्यक्त्वा भक्तिरसमात्रैकनिष्ठा अभवन्नित्याह। स्त्री– पुत्रादीत्यादि। चैतन्यचन्द्रे परां निगूढ़प्रेमलक्षणानुभाविकां भक्ति-

---

भूमण्डल में श्रीचैतन्य देव अवतीर्ण होने से काम्यकर्म परायण व्यक्ति गण के मन काम्य कर्मरूप स्रोत में निपतित होकर भी स्थैर्य्य प्राप्त कर लिया है, एवं महापाषाण अकर्म रूप शिला समूह से भी कठिन मन प्रेमद्वारा द्रवीभूत हो रहा है, योगिगण के मन भी योग साधन से विरत होकर प्रेमरस से प्रफुल्लित हो रहा है ॥११२॥

श्रीचैतन्य चन्द्र परम भक्ति योग पदवी अर्थात् रागानुगीय भक्ति को प्रकाश करने पर अपर कोई रसभी देखने में नहीं आता है,

**ज्ञानाभ्यासविधिं जहुश्च यतयश्चैतन्यचन्द्रे परा-
माविष्कुर्व्वति भक्तियोगपदवीं नैवान्य आसीद्रसः ॥११३॥
अभूद्गेहे गेहे तुमुलहरिसङ्कीर्त्तनरवो
बभौ देहे देहे विपुलपुलकाश्रु व्यतिकरः ।
अपि स्नेहे स्नेहे परममधुरोत्कर्षपदवी
दवीयस्याम्नायादपि जगति गौरेऽवतरति ॥११४॥**

योगस्य पदवीं रागानुगीयमार्गं आविष्कुर्व्वति प्राकट्यमानीते सति विषयिणः प्राकृतविषयचेष्टावन्तः स्त्रीपुत्रादिकथां जहुस्त्यक्तवन्तः। बुधाः षड्‌दर्शनिका आलङ्कारिकाश्च शास्त्राणां प्रवादं प्रकृष्टविचारं योगीन्द्रा आरूढ़योगा मरुन्नियमः पवनवशीकरणं तज्जन्यक्लेशं जहुः तापसास्तपो देहेन्द्रियक्लेशं जहुः। यतयो ज्ञानिनः ज्ञानाभ्यास-विधिं निर्भेदब्रह्मानुसन्धानं जहुः। विषयिप्रभृतयः स्व स्व साधनं त्यक्त्वा रागानुगीयभक्तिरस एव मग्ना बभूवुरित्याह नैवान्य आसीद्रस इति तादृश भक्तिरसं विनान्यो विषयादि रसो नास्तीत्यर्थः ॥११३॥

**विषयि बुध योगीन्द्र मतयस्तापसा अपि ।
जहुस्वं साधनं भक्त्या चैतन्ये प्रकटं गते ॥११३॥**

सर्व्वतोलवणानुभाव सात्त्विकप्रचारकत्वेन श्रुतिविप्रकृष्टस्नेह परममधुरोत्कर्षपदवी प्रकटत्वेनचावतारमहिमानं प्रोद्घाटयति। अभूद्गेहे गेहे इत्यादि। जगति इहलोके गौरहरौ प्राकट्यं प्राप्ते सति गेहे सर्व्वत्र प्रतिगृहं तुमुलोत्युच्चैः श्रीकृष्णसंकीर्त्तनरवोऽभूत् । एवं प्रतिशरीरे विपुलानां पुष्टानां रोमाञ्चानां नेत्रजलानाञ्च व्यतिकरः

क्योंकि विषयासक्त व्यक्तिगण स्त्री पुत्र की कथा, पण्डितगण शास्त्र विचार, योगिगण प्राणायामादि के द्वारा प्राणवायु वशीकरण जन्य क्लेश, तापसगण तप जन्य क्लेश, एवं यतिगण ज्ञानाभ्यास विधि अर्थात् निर्भेद ब्रह्मानुसन्धान को छोड़ दिये हैं ॥११३॥

इह लोक में श्रीगौर हरि अवतीर्ण होने से प्रतिगृह ही श्रीहरि सङ्कीर्त्तन ध्वनि से पूर्ण, प्रतिदेह विपुल रोमाञ्च,—प्रेमाश्रुधारा से

अकस्मादेवैतद्भुवनमभितः प्लावितमभूत्
महाप्रेमाम्भोधेः किमपि रसवन्याभिरखिलं ।
अकस्माच्चादृष्टाश्रुतचरविकारैरलमभू
च्चमत् कारः कृष्णे कनकरुचिराङ्गेऽवतरति ।।११५।।
उद्गृह्णन्ति समस्तशास्त्रमभितो दुर्व्वारगर्व्वायिता
धन्यम्मन्यधियश्च कर्म्मतपसाद्युच्चावचेषु स्थिताः ।

समूहो वभौ शोभते स्म । स्नेहे स्नेहे परमा च मधुरा च या उत्कर्ष पदवी श्रुतेरपि दवीयसी दूरतरा यदवतारे सापि सर्व्वत्र प्रकटीभूता । स्नेहः प्रेमपरिपाकः ।।१४।।

कृष्णसङ्कीर्त्तनं गेहे देहे च पुलकादयः ।
स्नेहेऽप्युत्कर्षता गौरेऽवतीर्णे श्रुतिदुष्करा ।।११४।।

परमप्रेमरसाम्वुधिवन्या भुवनप्लावकत्वेन तद्विकारचमत्कार कत्वेन तदवतार महिमत्वं प्रकटयति अकस्मादेवैतद्भुवनमित्यादि । कृष्णे सर्व्वाकर्षकचिदानन्दमय स्वयं भगवति कनकेभ्योऽपि रुचिराणि मनोरमाण्यङ्गानि यस्य श्रीराधिकास्वरूपत्वात् तस्मिन्नवतरति महा-प्रेमाम्भोधे रसवन्याभिरेतद्भुवनमखिलमभितः सर्व्वतोऽकस्मादपि प्लावितं पूर्णमभूत् । एवमकस्माच्चादृष्टै रश्रुतपूर्व्वैश्च प्रेमविकारै-रलमत्यर्थं चमत्कारोऽभूत् सर्व्वभुवनस्थानामिति शेषः ।।११५।।

कृष्णेऽवतीर्णे गौराङ्गे प्लावितं भुवनं रसैः ।
प्रेमाम्वुधेर्विकारैश्च परमाश्चर्य्यमप्यभूत् ।।११५।।

अतिदुल्लभप्रेमवस्तुनः सर्व्वजनसाधारण प्रापकत्वेनावतार-

शोभित एवं वेद के अगोचर मधुर से भी मधुर प्रेमपथ प्रकाशित हुआ है ।।११४।।

सर्वाकर्षक चिदानन्दमय स्वयं भगवान् श्रीकृष्ण, श्रीराधाभाव अङ्गीकार कर गौर शरीर से अवतीर्ण होने पर अखिल भुवन अकस्मात् प्रेम समुद्र के रसोच्छ्वास से प्लावित हुआ है, एवं अदृष्ट अश्रुतचर प्रेम विकार के द्वारा जगत् चमत् कृत हुआ है ।।११५।।

शास्त्र ज्ञान गर्वित, धन्यम्मन्य, स्मृत्युक्त नित्यनैमित्तिक कार्य

द्वित्राण्येव जपन्ति केचन हरेर्नामानि वामाशयाः
पूर्व्वं संप्रति गौरचन्द्र उदिते प्रेमापि साधारणः ।।११६।।
देवे चैतन्यनामन्यवतरति सुरप्रार्थ्यपादाब्जसेवे
विष्वद्रीचीः प्रविस्तारयति सुमधुरप्रेमपीयूषवीचीः ।

महिमानमुल्लासयति उद्‌गृह्णन्तीत्यादि । दुर्व्वारश्चासौ गर्व्वश्चेति दुर्व्वारगर्व्वस्तं कुर्व्वन्ति स्म दुर्व्वारगर्व्वायिताः वारयितुमशक्यं गर्व्वं कृतवन्तोजनाः समस्तं शास्त्रं सर्व्वे उद्‌गृह्णन्ति संगृह्णन्ति किम्वा प्रोद्धृत्य व्यवस्यन्ति । अस्माभिः सर्व्वशास्त्राणि व्यवसितानि व्यवसायितान्यस्माभिः समः को वाधिकश्चेति दुर्व्वाराहंवृद्धयः । एवमात्मानं स्वां धन्यां मन्यन्ते या सा धन्यम्मन्या एवम्भूता धीर्वुद्धिर्येषां ते धन्यंमन्यधियश्च कर्म्मं स्मृत्याद्युक्तनित्यनैमित्तिकादि। तपः स्वर्गाद्युद्देशकक्लेशसहनसाधनविशेषः । आदिना साङ्ख्ययोगादिरेषु ऊच्चावचेषु स्थितास्तेभ्योऽचलिताः । केषु मध्ये केचन जनाः द्वित्राण्येव हरेर्नामानि जपन्ति तत्रापि वामाशयाः वामः कुटिलः आशयोऽभिप्रायो येषां तेषां कर्म्मादिदोष वहूलत्वात् एवं सर्व्व पूर्व्वमासीत् सम्प्रति गौरचन्द्रे उदिते प्रेमा साधारणोऽभूत् । आपामर-सर्व्वजनप्राप्तत्वात् । अहो कोवायमवतारमहिमा चन्द्ररूपकत्वेन तत्त्वद्विषयाग्रहतमोनाशकत्वं प्रेमामृतेन भावौषधिवर्द्धनञ्च ध्वनितं ।।

शास्त्रगर्व्वायिताः कर्म्म तपोनिष्ठाश्च केचन ।
पूर्व्वं सम्प्रति गौराविर्भावे प्रेमा समोऽभितः ।।११६।।

तदुज्ज्वलस्य साधारण्यं दर्शयन् दर्शयत्यवतारमहिमानं देवं चैतन्यनामनीत्यादि । देवे स्वप्रेम्ना क्रीड़नस्वभावे किं वा दीव्यति

निपुण एवं तपस्या अर्थात् स्वर्गादि के उद्देश्य से क्लेस सहन शील व्यक्ति गण के मध्य में कभी कोई दो तीन वार हरिनाम उच्चारण करते थे, किन्तु कृष्ण नाम ग्रहण से भी वे सव कुटिल अन्तः करण के थे, सम्प्रति श्रीगौरचन्द्र उदित होने से प्रेम साधारण हो गया हैं, अर्थात् सव लोक ही प्रेमानन्द से दिनरात हरेकृष्ण नाम जपते रहते हैं ।।११६।।

कोबालः कश्च वृद्धः क इह जड़मतिः का वधूः को वराकः
सर्व्वेषामैकरस्यं किमपि हरिपदे भक्तिभाजां वभूव ॥११७॥

संसारं जापयितुमिच्छति सर्व्वजनान् संसारजयने प्रयोक्तुमिच्छति इति देवः तस्मिन्। यद्वा दीव्यति प्रेमधनेन व्यवहरतीति देवः अथवात्मानं श्रीकृष्णं स्तौतीति देवः। यद्वा दीव्यति द्योतते परम-चमत्कारकारि रूपमाधुर्य्यादि विशिष्टमात्मानं प्रकाशयतीति देवः। यद्वा दीव्यति सर्व्वान् प्रेमरसेनानन्दयतीति देवः। अथवा दीव्यति स्वप्रेमास्वादनेन माद्यतीति देवः। यद्वा दीव्यति क्वचिद्विरहिणी-भावावस्थया स्वपिति मूर्च्छतीति देवः। किम्वा दीव्यति तीर्थान्य-टति लोके तत्तीर्थं पावन स्वभक्तिप्रचारणेच्छुरिति देवः। अथवा दिव्यति ह्लादिनीशक्तिसारांशभूत श्रीराधिकाभावरूपाङ्गीकरणस्व-माधुर्य्येभ्यःस्वादितुमभिलषतीति देवः। दिवः क्रीड़ाविजिगीषेच्छा व्यवहारस्तवेषु च। द्युतिमोदमदस्वप्नगति कान्तिषु वर्त्तते। तस्मिन् देवे चैतन्याख्ये। सुरैः प्रार्थ्या अभिलषणीया पादपद्मयोः सेवा यस्य तस्मिन्नवतरति सति। तदनन्तरं सुमाधुर्य्यविशिष्टो यं प्रेमा स एव पीयूषममृतं तस्य वीचीस्तरङ्गाः किम्भूताः विश्वमञ्चन्ति व्याप्नु-वन्ति ता विष्वद्रीच्यः विष्वक् पूर्व्वाञ्चतेः क्विप् विष्वग्देव सर्व्वा-देर्द्रिरिति डद्रिरागमः अञ्चूत्तरपदादिति ईप् प्रत्ययः तद्धित याचो शसादीति शसादित्वादकारलोपः। पूर्व्वदीर्घः ततः शसि कृते विष्वद्रीचीः सुमधुर प्रेमपीयूषवीचीः प्रकृष्टं यथास्यात्तथा विस्तारयति सति सर्व्वेषां वालकादीनां हरिपदे भक्तिभाजामैकरस्यं किमपि वभूव वालादयः सर्व्वे प्रेमरसरसिका वभूवुरित्यर्थः ॥११७॥

वालवृद्धवधूक्षुद्रजड़ान्धवधिरादयः।
वभूवुः प्रेमरसिकाः गौरे देवेहवतारिणी ॥११७॥

देव गण भी जिनके चरण पद्म की सेवा वाञ्छा करते हैं, उन श्रीचैतन्य देव अवतीर्ण होने से विश्वव्यापि अति सुमधुर प्रेम सुधा तरङ्ग का विस्तार हुसा, उस से वालक, वृद्ध, जड़मति, स्त्री, वर्वर सभी श्रीहरिभक्ति के पात्र होकर प्रेमरस के रसिक हुएहैं।११७

सर्व्वे शङ्कर नारदादय इहायाताः स्वयं श्रीरपि
प्राप्ता देवहलायुधोऽपि मिलितोजाताश्च ते वृष्णयः।
भूयः किं व्रजवासिनोऽपि प्रकटा गोपालगोप्यादयः
पूर्णे प्रेमरसेश्वरेऽवतरति श्रीगौरचन्द्रे भुवि ॥११८॥

तत्पार्षदावतार प्रयोजकत्वेन श्रीचैतन्यावतारमहिमान व्यञ्जयति। सर्व्वे शङ्कर नारदादय इहेति। श्रीगौरचन्द्रे भुवि पृथिव्यामवतरति सति सर्व्वे शङ्करादयः इहायाताः प्रकटीभूताः गौरचन्द्रे किम्भूते पूर्णे स्वयं भगवति प्रेम रसेश्वरे प्रेमरसरसिकशिरोमणौ शङ्करः सदाशिवः प्रकाशभेदेनाद्वैतस्वरूपमायातः शङ्कर इति शं लोकानां परममङ्गलं करोति। मङ्गलकारित्वं हि जनान् हरिभक्तिरहितान् दृष्ट्वा करुणस्तानुद्धर्त्तुकामः श्रीकृष्णमाराध्य श्रीकृष्ण चैतन्यावतारमिति महत् प्रसिद्धिः। तत् प्रसिद्धया ममापि च श्रीमद्अद्वैताष्टके। दृष्ट्वा भूचक्रलोकान् कलिमलमलिनान् श्रीहरेर्भक्तिहीनान् कृष्णं संसेव्य नित्यं परिमलतुलसीमञ्जरी पुष्पसंघैः। य श्रीचैतन्यकृष्णं भुवनगुरुमवातारयत् प्रेमदं श्रीलाद्वैताचार्य्यवर्य्यं कृपयतु स मामीश्वरो विश्वबन्धुरिति। नारदादयः श्रीवासादिस्वरूपाः। स्वयं श्रीरपि महालक्ष्मीरपि लक्ष्मीप्रियायां विष्णुप्रियायां गदाधरेऽपि प्राप्ता अवतार। यद्वा स्वयं श्रीराधिका नानाप्रकाशभेदेन श्रीवृन्दावने गोपीस्वरूपा। एकप्रकाशेन श्रीचैतन्येनाभिन्ना प्रकाशान्तरेण गदाधर पण्डितस्वरूपा। अन्येन प्रकाशेन दास गदाधर स्वरूपा। यथा स्वयं भगवान् प्रकाशभेदेनावतरति। तथा स्वयं श्रीह्लादिनी शक्तिस्वरूपा राधिका च। देवहलायुधोऽपि मिलितः। दिव्यतीति देवः दिवधातुः सर्व्वार्थसङ्गतिकः तेन स्वयं भगवतोऽभिन्नप्रकाशो हलायुधः बलभद्रोऽपि मिलितः नित्यानन्दस्वरूपेण विराजितः। हलायुधः इति पाषण्डदलनपूर्वक श्रीगौरभक्तिप्रचारकत्वसूचकः। वृष्णयो यादवा अपि जाताः प्रकटीभूताः। शचीजगन्नाथमिश्रौ कश्यपादिति वसुदेव--

---

प्रेमरस रसिक स्वयं भगवान् श्रीगौरचन्द्र अवतीर्ण होने से शङ्करादि देव, नारदादि भक्तवृन्द, स्वयं लक्ष्मी, बलदेव एवं यादव

भृत्याः स्निग्धा अतिसुमधुरप्रोज्ज्वलोदारभाज-
स्तत्पादाब्जद्वितयसविधे सर्व्व एवावतीर्णाः ।
प्रापुः पूर्व्वाधिकतर महाप्रेमपीयूषलक्ष्मीं
स्वप्रेमाणं वितरति जगत्यद्भुतं हेमगौरे ॥११९॥

देवकी नन्दयशोदादीनां प्रकाशभूतौ भूयः पुनः किं कथयामि व्रज-वासिनः श्रीनन्दादयः गोपाला दासाः सखायश्च गोप्यः सख्योदास्यश्च आदिपदेन योगमाया वनदेव्यश्च प्रकटा अवतेरुः। अतस्तत्तत् प्रकाश-लक्षणन्तु । अनेकत्र प्रकटता रूपस्यैवकस्य यैकदा । सर्व्वथा तत् स्वरूपोऽयं स प्रकाश इतीर्य्यते । प्रकाशस्तु न भेदेषु गण्यते स हि न पृथगिति । अस्यार्थः । एकस्य रूपस्य एकस्मिन् काले अनेकस्थाने च या प्रकटिताविर्भाव अथच सर्व्वथा तत्स्वरूपः न्यूनाधिक्यरहितत्वे हेतुमाह प्रकाशस्य न भेदेष्वित्यादि । अत एते चैतन्यपार्षदा नित्य-सिद्धाः प्रकटाऽप्रकटमात्र भिन्ना वस्तुतो नित्याः भगवदवतारपरिकर लीलानां नित्यत्वात् ॥११८॥

अवतीर्णे गौरचन्द्रेऽवतेरुः सर्व्वपार्षदाः ।
हलीश नारदाद्या ये गोपा गोप्यश्च वृष्णयः ॥११८॥

पार्षदानामवतारे कारणं पूर्व्वतोऽधिकसुखानुभवो इति प्रकटयन् गौरावतारमहिमानं सूचयति भृत्या स्निग्धा इत्यादि । हेम-वद्गौरे हरौ निजप्रेमाणमद्भुतं यथा स्यात्तदा वितरत्यर्पयति सति वितरणेऽद्भुतत्वं । पात्रापात्रविचारणाभावात् तद्वितरणायावतरति सति भृत्याः दासाः स्निग्धाः सखायः अतिसुमधुरमैश्वर्य्यरहित प्रकृष्ट-मुज्ज्वलं ततोऽप्युदारं मनोहरं भावविशेषं भजन्ते याः प्रेयस्य स्ता अपि तस्य श्रीचैतन्यस्य पदाम्बुजद्वय निकटे सर्व्व एवावतीर्णाः सन्तः पूर्व्वात् श्रीकृष्णलीलातः सकाशात् अधिकतरां महाप्रेमामृतसम्पत्ति प्रापुः । अतः पूर्व्वलीलातो श्रीगौरलीला सुरसतमा । यतः सर्व्वतो

सकल तथा गोपगोपी समस्त व्रजवासी गण अवतीर्ण हुएथे ॥११८॥

स्वर्ण तुल्य श्रीगौर हरि, अद्भुत प्रेम वितरण हेतु अवतीर्ण होने से अति सुमधुर उज्ज्वल मनोहर भाव भजन भृत्यवर्ग, सखावर्ग

हसन्तुच्चैरुच्चैरहह कुलवध्वोऽपि परितो
द्रवीभावं गच्छन्त्यपि कुविषय ग्रावघटिताः ।
तिरस्कुर्व्वन्त्यज्ञा अपि सकलशास्त्रज्ञसमिति
क्षितौ श्रीचैतन्येऽद्भुतमहिमसारेऽवतरति ॥१२०॥
प्रायश्चैतन्यमासीदपि सकलविद्यां नेह पूर्व्वं यदेषां
खर्व्वा सर्व्वार्थसारेऽप्यकृत नहि पदं कुण्ठिता बुद्धिवृत्तिः ।

श्रीभगवल्लीला सुरसा ततः श्रीकृष्णलीला सुरसतरा ततोऽपि श्रीगौर लीलाः सुरसतमा अतो श्रीगौरपदाम्बुजमेवोपास्यमिति ध्रुवं ॥११९॥

अवतीर्णे हेमगौरे प्रेमार्णं दातरि प्रभो ।
अवतीर्णा व्रजस्थाः स्वाः प्रापुः पूर्व्वाधिकं सुखं ॥११९॥

अमूर्य्यम्पश्य कुलवधूजन कुविषयशिलाकठिनहृदयजनान्तस्मादज्ञजनानामपि परमपुरुषार्थसार लाभादुत्तमत्वं दृष्टावताराद्भुत महिममारं दर्शयति । हसन्तुच्चैरित्यादि । पृथिव्यां श्रीचैतन्येऽवतरति सति किम्भूते अद्भुतः परमाश्चर्य्य महिम्नः सारो यत्र तस्मिन् कुलवध्वोऽपि उच्चैरुच्चैर्हसन्ति हसनं भगवद्रत्यनुभावः । तासां जातरतित्वात् । कुत्सितविषय एव पाषाणस्तेन घटिताः पाषाणवद्धृदया अपि द्रवीभावं गच्छन्ति सात्त्विकभावं प्राप्नुवन्ति । अज्ञा अपि श्रीचैतन्यकृपया ज्ञाततत्त्वाः सकलशास्त्रज्ञवृन्दं तिरस्कुर्व्वन्ति ॥१२०॥

गौरे प्रकटतां प्राप्ते कुलवध्वः शिलाहृदः ।
अज्ञाश्च प्रेमसम्पन्ना हासद्रवरसान्विताः ॥१२०॥

श्रीचैतन्यावतारात् पूर्व्वं कस्यापि अतिनिगूढ़ोज्ज्वलभक्तौ

उनके पाद पद्म के सन्निधान में अवतीर्ण होकर पूर्वापेक्षा अधिकतर प्रेमामृत सम्पत्ति प्राप्त किये थे ॥११९॥

अत्याश्चर्य महिमान्वित श्रीचैतन्य पृथिवी में अवतीर्ण होने से कुलवधू गण भी उच्चैःस्वर से हास्य किये, पाषाणवत् कठिन हृदय भी आर्द्रभाव प्राप्त हुआ, मूर्खगण भी तत्त्वज्ञ होकर शास्त्रवित् पण्डितों की निन्दा करते हैं ॥१२०॥

गम्भीरोदारभावोज्ज्वलरसमधुरप्रेमभक्तिप्रवेशः
केषां नासीदिदानीं जगति करुणया गौरचन्द्रेऽवतीर्णे ॥१२१॥
श्रीमद्भागवतस्य यत्र परमं तात्पर्य्यमुट्टङ्कितं
श्रीवैयासकिना दुरन्वयतया रासप्रसङ्गेऽपि यत् ।

प्रवेशो नासीदिदानीं सर्व्वेषामेवेति दर्शयन्नवतारमहिमानमाह प्रायश्चैतन्यमासीदित्यादि । पूर्व्वं श्रीचैतन्याविर्भावात् प्राक् सकल-शास्त्रविदामपि चैतन्यं चेतना इह संसारे नासीत् यद्यस्मादेषां सकल शास्त्रविदां वुद्धिवृत्तिः सर्व्वपुरुषार्थसारेऽपि श्रीकृष्णभजने पदं विषयं नाकृत न कृतवान् हि निश्चितं यतः कुण्ठिता सर्वत्र संदिग्धा खर्व्वा अल्पा क्षुद्रा स्वर्गादि फलाशक्तत्वात् इदानीन्तु जगति गौरचन्द्रे करुणयावतीर्णे सति गम्भीरः सुदुर्वोधः उदारः परमचमत्कारकारी च भावोनुभावादि यत्र तादृशी उज्ज्वलरसेन मधुरा या प्रेमभक्तिस्तस्यां केषां प्रवेशो नासीदपितु सर्व्वेषामेव अहो गौरावतार महिमेति।१२१

अचैतन्यस्य लोकस्य धीरासीदनवस्थिता ।
आविर्भूते हरौ गौरे न केषां भगवद्रतिः ॥१२१॥

निगूढ़ स्वलीलामाधुरीप्रचारकत्वेनावतारमहिमानमुल्लासयति श्रीमद्भागवतस्येत्यादि । श्रीव्यासस्यापत्यं वैयासकिः श्रीशुकदेवस्तेन रासप्रसङ्गे श्रीमद्भागवतस्य यत्तात्पर्य्यं श्रीराधाकृष्णनिगूढ़ लीलारससन्दर्भः उट्टङ्कितमात्रं नतु विस्तार्य्यवर्णितं । ननु केन हेतुना

पूर्व कालमें शास्त्र विद् पण्डितगण का प्राय चेतन्य नहीं था, एवं उन सव की वुद्धि वृत्ति अत्यल्पा तथा कुण्ठिता थी. कारण सर्वार्थसार श्रीकृष्ण भजन में उन सव की प्रवृत्ति नहीं हुई । किन्तु सम्प्रति करुणावशतः श्रीगौरचन्द्र अवतीर्ण होने से अति गम्भीर उदारभाव विशिष्टा उज्ज्वल रसधारा अतिमधुर प्रेमभक्ति में किस का प्रवेश नहीं हुआ है, ॥१२१॥

श्रीमद् भागवत का तात्पर्य्य, जो श्रीव्यास तनया श्रीशुक देव द्वारा रास प्रसङ्ग में उट्टङ्कित अर्थात् उद्दिष्ट मात्र ही हुआ है, वह एवं श्रीराधा की रतिकेलि अर्थात् निकुञ्ज सुरत लीला सागर

यद्राधारतिकेलि नागररसास्वादैक सद्भाजनं
तद्वस्तु प्रथनाय गौरवपुषा लोकेऽवतीर्णो हरिः ॥१२२॥

न विस्तारितमित्यत्राह दुरन्वयतयेति। दुरभावार्थः। अनुरनुशीलनार्थः। दुरनुनीयते नानुशीलनेनापि प्राप्यते दुरन्वयं तस्य भावो दुरन्वयता तया हेतुभूतया तदास्वादनतत्तत्त्ववेदनपात्राभावान्न विस्तारितमिति भावः। किन्तु तत्तत्वं जानात्येव तस्य वैयासकित्वात् प्रकाशान्तरेण रासादिलीला परिकरत्वाच्च। व्रजपरिकरत्वं यथा वृहद्भागवतामृते पूर्व्वखण्डे नारदं प्रति श्रीकृष्णवाक्य। एकः समेतत् व्रजलोकवत् प्रियस्तादृक् महाप्रेमभरप्रभावतः। वक्ष्यत्यदः किञ्चन वादरायणिर्मज्जीविते शिष्टवरे समन्वित इति। यच्च श्रीराधाया रतिकेलौ निकुञ्जसुरतलीलायां नागरः परमरसिकशिरोमणिः प्रियतमः श्रीकृष्णस्तस्य रसो रासादिलीलामाधुरी तस्यास्वादस्य एकमसाधारणमतएव सत् सर्व्वोत्कृष्टं भाजनं पात्रञ्च तद्वस्तु। तत्र नागरशब्देन रसस्यौपपत्यं पारकीयञ्च ध्वनितं। श्रीमद्भागवततात्पर्य्यं श्रीराधासहित श्रीकृष्णनिगूढ़लीलारसास्वादकप्रेम च एतयोर्द्वयोर्वस्तुनोः प्रथनाय विस्ताराय लोके प्राकृतगोचरे जगति हरिः गौरहरिरवतीर्णः। नच ग्रन्थादिरचनां विना लीलादिविस्तारणं न स्यात्। ग्रन्थादिः कोऽपि न कृत न कृतः श्रीकृष्णचैतन्येन कथं तद्वस्तु प्रथनमितिवाच्यं। भगवता साक्षात् ग्रन्थकरणाभावात् हृदा ब्रह्मणि ब्रह्मप्रकाशितवत् श्रीरूपादिषु स्वेषु हृदि शक्ति सञ्चार्य्य तत्तद्द्वारेण सर्व्वं प्रकाशितमिति। तैरुक्तञ्च। हृदि यस्य प्रेरणया प्रवर्त्तितोऽहं वराकरूपोऽपि। तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्येति। अतएव तैः प्रकटिता निगूढ़रससिद्धान्तलीलाग्रन्था वहवः सन्ति अतस्तत्तदुपदेशपरम्परया सर्व्वैरेव तद्वस्तु ज्ञाततयास्वादितञ्चेति परमोऽवतारमहिमा ॥१२२॥

जो कृष्ण, उनका रासलीलास्वादक जो प्रेम है, उसका विस्तार करने के निमित्त, स्वयं वह श्रीहरि श्रीगौराङ्ग विग्रह धारण कर इस लोक में अवतीर्ण हुए हैं ॥१२२॥

केचिद्दास्यमवापुरुद्धवमुखाः श्लाघ्यं परे लेभिरे
श्रीदामादिपदं व्रजाम्बुजदृशां भावञ्च भेजुः परे ।
अन्ये धन्यतमा धयन्ति सुधियो राधापदाम्भोरुहं
श्रीचैतन्यमहाप्रभोः करुणया लोकस्य काः सम्पदः ।।१२३।
सर्व्वज्ञैर्मुनिपुङ्गवैः प्रवितते तत्तन्मते युक्तिभिः
पूर्व्वं नैकतरत्र कोऽपि सुदृढ़ं विश्वस्त आसीज्जनः ।

श्रीमद्भागवततात्पर्य्य राधास्वरतिविक्तमं ।
विस्तारयन् गौरचन्द्रोऽवततार स्वयं हरिः ।।१२२।।

इदानीं सर्व्वेषामेव व्रजस्थभावप्राप्तिसम्पत्त्यावतारमहिमानं व्यञ्जयति । केचिद्दास्यमवापुरित्यादि । श्रीचैतन्यमहाप्रभोः करुणया लोकस्य काः सम्पदो न वभूवुरिति शेषः । सम्पदः प्रकाशयति केचिद्दास्यं रक्तकपत्रकादिभावं प्रापुः । परे श्लाघ्य श्रीदामादिपदं सख्यं लेभिरे श्रीदामादीत्यादि पदेन पत्रादिपदं वात्सल्यमुक्तं । परे गोपीनां भावं भेजुरन्ये श्रीराधापदाम्भोरुहं धयन्ति तत्पदाम्वुज-माधुरीमास्वादयन्ते । निजाभीष्ट तत् सख्यनुगामिनोभूत्वेत्यर्थः । इत्यावतारमहिमा व्यञ्जितः । उद्धवमुखा इति सर्व्वेऽन्यावतार-भक्ता अवतीर्णा इति ज्ञेयं ।।१२३।।

कलौ गौरहरौ प्राप्ते प्राकट्यं केऽपि केऽपि च ।
व्रजदास्यादिकं प्रापुः पपू राधापदाम्वुजं ।।१२३।।

इदानीं यथार्थश्रुतार्थानुभावकावतारमहिमानमनुभूयोल्लासयत्ति

श्रीचैतन्य महाप्रभु की करुणा से किसकी कौन सी सम्पद् नहीं हुई है, पूर्व कालीन श्रीकृष्णावतार के भक्त उद्धव प्रभृति श्री-गौराङ्गावतार में जन्म ग्रहण कर व्रजभृत्य रक्तक पत्रक प्रभृति ने दास्य भाव प्राप्त किए, किसी ने प्रशंसनीय श्रीदामादि सख्य पदलाभ किया है किसी ने व्रज गोपीभाव प्राप्त किया है, किन्तु जिन्होंने केवल श्रीराधा के पादपद्म माधुरी का आस्वादन किया है, वे सब ही धन्यतम हैं ।।१२३।।

पूर्वकाल में सर्वज्ञ महर्षिगण के द्वारा युक्ति युक्त मत समूह

संप्रत्यप्रतिमप्रभाव उदिते गौराङ्गचन्द्रे पुनः
श्रुत्यर्थो हरिभक्तिरेव परमः कैर्वा न निर्द्धार्य्यते ।।१२४।।
विश्वं महाप्रणयसाधुसुधारसैक-
पाथोनिधौ सकलमेव निमज्जयन्तं ।

सर्व्वज्ञैर्मुनिपुङ्गवैरित्यादि । सर्व्वज्ञैरपि मुनीनामपि श्रेष्ठतमैः । स्वीये स्वीये मते युक्तिभिर्हेतुतर्कनिपुणैः प्रकृष्टं विस्तारितो गौरावतारात् । पूर्व्वमेकतरे मते सुदृढं विश्वस्तः कोऽपि नासीत् विश्वासं न प्राप्तः विनिगमनाविरहात् । एकतरपक्षपातिनी युक्ति-र्विनिगमना कस्यापि कस्मिन् स्वीयेऽपि मते न विश्वासः । यथा तन्मतमहं न मन्ये तथा मन्मतमपि स न मन्यते किं स्वयमतं वा मतं नेति सन्दिग्धत्वात् स्वीयेऽपि न विश्वासः । संप्रत्यधुना चैतन्य चन्द्रे पुनरुदिते सति कैर्वाजनैः श्रुतीनां प्रतिपाद्यः परमोऽर्थः हरि-भक्तिरेव न निर्द्धार्य्यते अपि तु सर्व्वैरेव निश्चीयते । यतोऽप्रतिम-प्रभावो नास्ति प्रतिमा उपमा यस्य तादृक् प्रभावो महिमा यस्य तस्मिन् गौरचन्द्रे चन्द्ररूपकत्वेन स्वस्वमताग्रहताया नाशकत्वं प्रेमा-मृतशीकरसेचकत्वञ्च ध्वनितं ।।१२४।।

प्राचीनमत कर्त्तॄणां श्रद्धा तत्तन्मते नहि
गौरे तु प्रकटे वेदतात्पर्य्यार्था हरौ रतिः ।।१२४।।

पुनः प्रणयसुधारसनिधौ सर्व्वजगन्मज्जकानुभावं स्मरण-महिमानं व्यञ्जयति । विश्वं महाप्रणयेत्यादि । गौराङ्गचन्द्रस्य नखा एव चन्द्रकान्तमणयस्तेषां छटायाः कान्तिविशेषस्य कश्चिद-निर्व्वचनीयं विचित्रमाश्चर्य्यमनुभावं स्मरामि चिन्तयामि पुनः किम्भूतं महांश्चासौ प्रणयप्रेमपरिपाकश्चेति महाप्रणयः स एव साधु-

---

प्रचारित होने पर भी उस में लोक दृढ़ विश्वासी न थे, सम्प्रति अतुल्य प्रभाव शाली श्रीगौराङ्ग चन्द्र उदित होने से वेद प्रतिपाद्या केवल श्रीहरि भक्ति ही है, उसका अवधारण सबने किया है ।।१२४।।

मैं श्रीगौराङ्ग चन्द्र के नख रूप चन्द्रकान्त मणिच्छटा का अनिर्बचनीय आश्चर्य अनुभाव का स्मरण कर रहा हूँ, जो प्रणयरूप

गौराङ्गचन्द्रनखचन्द्रमणिच्छटायाः
कश्चिद्विचित्रमनुभावमहं स्मरामि ।।१२५।।
अतिपुण्यैरतिसुकृतैः कृतार्थीकृतः कोऽपि पूर्व्वैः ।
एवं कैरपि न कृतं यत् प्रेमाब्धौ निमज्जितं विश्वं ।।१२६।।
धर्म्मे निष्ठां दधदनुपमं विष्णुभक्तिं गरिष्ठां
संविभ्राणो बधविह हि हृत्तिष्ठतीवाश्मसारं ।

एतत्कृष्टः सुधारसस्तस्यैकः प्रधानः पाथोनिधिरम्बुधिस्तस्मिन् सकलमेव विश्वं निमज्जयन्तं । निजपादाम्बुज–महाप्रेमसुधारसमय-नखविधुमणि-गलित रसनिधिविश्वमज्जकत्वेन गौरचन्द्रस्याद्भुतमहिमा व्यञ्जितः ।।१२५।।

गौरचन्द्रपदाम्भोजनखचन्द्रमणिप्रभं ।
मज्जयन्तं जगत्प्रेम्नि प्रभावं तं स्मराम्यहं ।।१२५।।

पुनः प्रेमाब्धौ निमज्जकत्वेन महिमानं व्यञ्जयति अतिपुण्यैरित्यादि । पूर्व्वैः प्राचीनैर्महद्भिः कोऽपि जनः कृतार्थी कृतः श्रीवैकुण्ठादिकं प्रापितः किम्भुतैरतिपुण्यैः पुणन्तीति पुण्याः मुक्ताः । अतिक्रान्ता पुण्या मुक्ता यैस्ते अतिपुण्यास्तैः । अतिक्रान्तः सुकृतः धर्म्मोयैस्तैः श्रीकृष्णचैतन्यचन्द्रेण यत् स्वप्रेमामृताब्धौ मग्नीकृतं विश्वमेव कैरपि पूर्व्वैर्महद्भिर्न कृतमिति ।।१२६।।

कोऽपि निस्तारितः पूर्व्वैः प्रेमाम्बुधिनिमज्जनं ।
विश्वस्य न कृतं कैरप्यृते गौरहरिं कलौ ।।१२६।।

प्रेमयोगामपि त्यक्त्वातिनीचात्ययोग्यायापि प्रेमदातृत्वेन

सुधा सिन्धु में इस विश्व को निमग्न कर रहा है ।।१२५।।

पूर्व काल में महत् पुण्य एवं सुकृत के द्वारा कुछ व्यक्ति कृतार्थ हुए हैं, किन्तु श्रीकृष्ण चैतन्यचन्द्र प्रेमामृत समुद्र में जिस प्रकार विश्व को निमज्जित किए हैं, उस प्रकार किसी ने भी नहीं किया है ।।१२६।।

तप्त काञ्चन की भांति गौरवर्ण श्रीभगवान् का रङ्ग अर्थात् नाटक कितना दुरूह है, उसे कोई नहीं जान सकता है, कारण, धर्म

नीचो गोघ्नादपि जगदहो प्लावयत्यश्रुपूरैः
को वा जानात्यहह गहनं हेमगौराङ्गरङ्गं ॥१२७॥
क्वचित् कृष्णावेशान्नटति वहुभङ्गीमभिनयन्
क्वचिद्राधाविष्टो हरिहरिहरीत्यार्त्तरुदितः ।

निरङ्कुश करुणत्वं व्यञ्जयन् महिमानमुल्लासयति धर्म्मे निष्ठा-मित्यादि । तप्तकाञ्चनगौराङ्गस्य भगवतो रङ्गं नाटकं गहनं दुरूहं कोवा जानाति न कोऽपि । रङ्गदुरूहत्वमेवाह धर्म्मेऽनुपमां निष्ठां दधदपि गरिष्ठां विष्णुभक्तिं संविभ्राणोऽपि जनः पाषाणसारप्रायं हृदयं दधत् केवलं तिष्ठतीव न तु सात्त्विकादिभिर्भावैर्द्रवच्चित्तः । अथच गोघ्नादपि नीचो जनः श्रीगौरकृपयाश्रुप्रवाहैर्जगद्विश्वं प्लावयति स्नापयति । इत्युदात्तालङ्कारेण समर्थरत्यनुगत सात्त्विकानां सूद्दीप्तत्वं व्यञ्जितं । अतएव काशिवासिचतुर्थाश्रमिषु तदकृपया रतिगन्धोऽपि नाभूत् । जगन्नाथ मांधवाख्यादिषु तत्कृपया तादृगुत् कृष्टप्रेमा ॥१२७॥

धर्म्मे साधनभक्तौच निष्ठां प्राप्ते जने कृपा ।
कृपातु यस्य नीचेऽभूत्तस्य को वेत्ति नाटकं ।
तस्य गौराङ्गस्येति शेषः ॥१२७॥

पुनर्व्रजरसचतुष्टयाविर्भावव्यञ्जक वाल्य पौगण्ड कैशोरा-वस्थादर्शकत्वेन श्रीकृष्णचैतन्यस्य जगद्विस्मापकत्वमुक्त्वा महिमान-मुल्लासयति क्वचित् कृष्णावेशादित्यादि । वहवो गम्भीरा दुस्तर्क्या महिमानः प्रभावा यस्य स गौरो जगद्विस्मापयति । विस्मापकत्वमाह कृष्णावेशाद्धेतोः क्वचित् समये वालः सन् रिङ्गन् जानुभ्यां चलन्निति वात्सल्यरसः कौमारवयः । क्वचित् वालगोपालस्य गवां पालनस्य

विषयक अनुपम निष्ठा एवं श्रीविष्णु विषयक गरिष्ठा भक्ति प्राप्त कर के भी लोक निकर के हृदय पाषाणवत् कठिन हो गए थे, किन्तु सम्प्रति श्रीगौरहरि की कृपा से प्रेमाश्रु प्रवाह के द्वारा गोघाती अपेक्षा से भी अति नीचजन जगत् को प्लावित कर रहा है ॥१२७॥

अहो ! अति गभीर स्वभाव श्रीगौरहरि जगत् को विस्मित

क्वचिद्रिङ्गन् वालः क्वचिदपि च गोपालचरितो
जगद्गौरो विस्मापयति वहुगम्भीरमहिमा ।।१२८।।
वेलायां लवणाम्बुधेर्मधुरिमप्राग्भावसारस्फुर-
ल्लीलायां नववल्लवीरसनिधेरावेशयन्ती जगत् ।
खेलायामपि शैशवे निजरुचा विश्वैकसंमोहिनी-
मूर्त्तिः काचनकाञ्चनद्रवमयी चित्ताय मे रोचते ।।१२९।।

चरितं यस्य स इति दास्य सख्य पौगण्डवय वह्नी कैशोरभङ्गीचेति तामभिनयन् दर्शयन्नटतीति कैशोरवयो मधुररसव्यञ्जकं । क्वचित् समये राधयाविष्टः सन् श्रीकृष्णविरहेण हरिहरि हरीति फुत्कृत्यर्त्या विरह पीड़या रुदितं क्रन्दितं येन सः ।।१२८।।

वाल्यपौगण्डकैशोरपूर्वावस्थां प्रकाशयन् ।
क्वचिद्विरहिणीभावं गौरो विस्मापयज्जगत् ।। १२८।।

पूर्व्वनिगूढ़मधुरलीलारसेन जगदावेशकत्वेन स्वहृदयरोचकत्वेन च गौरावतारमहिमानमुद्घाटयति वेलायां लवणाम्वुधेरित्यादि लवणाम्वुधेस्तीरे काचना पूर्व्वा मूर्त्तिर्मम चित्ताय रोचते हृदयं प्रविशति । कीदृशी काञ्चनद्रव प्रचूरेण घटितेव । या मूर्त्तिः शैशवेऽपि क्रीड़ायां स्वकान्त्या विश्वस्यैका साधारणी सम्यङ्मोहिनी कैशोरे यौवने वा का कथा । पुनः कीदृशी नववल्लवीनां श्रीराधिकादीनां रसनिधेः श्रीकृष्णस्य मधुरिमणि माधुर्य्ये प्राग्भावः प्राचीना रतिस्तस्य सारस्तेन स्फुरन्ती या लीला तस्यां जगद्विश्वमावेशयन्ती रसिकशिरो मणेः श्रीकृष्णस्य गोपकिशोरीभिः सह लीलाया सर्व्व-

---

कर रहे हैं, श्रीकृष्णावेश हेतु कभी वाल्य लीला, कभी गोपाल लीला प्रकाश कर रहे हैं, कभी विविध भङ्गी के द्वारा नृत्य कर रहें हैं, कभी श्रीराधा भाव से आविष्ट होकर हरि हरि हरि फुत्कृति सहित विरह पीड़ा से रोदन कर रहें हैं ।।१२८।।

श्रीगौर हरि की जो मूर्त्ति शैशव क्रीड़ा से विश्व को मोहित कर रही है, एवं जो श्रीराधा एवं रस निधि श्रीकृष्ण के माधुर्य्य भाव के द्वारा स्फूर्त्तिमती लीला से जगत् को आविष्ट कर रही है,

प्रेमा नामाद्भुतार्थः श्रवणपथगतः कस्य नाम्नां महिम्नः
को वेत्ता कस्य वृन्दावनविपिन-महामाधुरीषु प्रवेशः।
को वा जानाति राधां परमरसचमत्कारमाधुर्य्यसीमा-
मेकश्चैतन्यचन्द्रः परमकरुणया सर्व्वमाविश्चकार ॥१३०॥

भक्तान् प्रवेशयन्तीत्यर्थः ॥१२९॥

स्वपूर्व्वोज्ज्वललीलायां वेशयन्ती जगत्तनूं ।
काञ्चनार्द्रमयी काचिल्लग्ना मे हृदये हरेः ॥१२९॥

अद्भुतप्रेमप्रचारकत्वेन श्रीवृन्दावनमाधुरी प्रवेशकत्वेन परम-माधुर्य्यशील श्रीराधिकास्वरूपज्ञापकत्वेन च महिमानमुपसंहरति प्रेमनामेति। स्वयं भगवतः श्रीकृष्णचैतन्यमहाप्रभोः प्राकट्यं विना प्रेमादीनां प्रकाशनादि न स्यात् स हि प्रकटीभूत्वा पुनरेकएव तत्तत् सर्व्वं स्वप्रेमाविश्चकार प्रकटीकृतवानित्यन्वयः प्रेमेति नाम यस्य प्रेमनामा सचासौ अद्भुतपरमचमत्कारकार्य्यार्थपरमपुरुषार्थश्चेति स कस्य जनस्य श्रवणयोर्मार्गं गतः स्यादपि न कस्यापि। अन्य पुरुषार्थेभ्योऽद्भुतत्वं श्रीकृष्णाकर्षकत्वेन अन्यपुरुषार्थानां श्रीकृष्णा-कर्षत्वाभावात्। नाम्नां महिमानं को वा वेत्ता स्यात्। महिम्न इति कर्म्मणि षष्ठी तन्महिमार्थानां नामनामिनोरभिन्नत्वमेव वृन्दावनस्य विपिना गहना दुष्प्रवेश्या या महत्यो माधुर्य्यस्तासु कस्य प्रवेशः स्यात्। परमरस चमत्कारस्य माधुर्य्यस्य महाभावरसेन्द्रस्यास्य सीमा पराकाष्ठा यत्र तां राधां कोवा जानाति उपास्यत्वज्ञान विषयं कुर्य्यात् कान् कान् कोऽपि। चन्द्ररूपकत्वेन तत्तत्प्रवेशकत्वाद्य-

---

उन काञ्चन रस मयी अपूर्व मूर्त्ति मेरे हृदय में आकर प्रविष्ट हो रही है ॥१२९॥

प्रेम नामक परम पुरुषार्थ, जिस को पहले किसी ने भी कानों से भी नहीं सुना था, श्रीहरि नामकी महिमा को भी लोक इस से पहले जानते नहीं थे, श्रीवृन्दावन की परम माधुरी जिस में किसी का भी कभी प्रवेश नहीं हुआ परमाश्चर्य्य मधुर माधुर्य्य रस की परा काष्ठा स्वरूपा श्रीराधा है, जिनको पहले कोई भी व्यक्ति नहीं जानते

।।*।। इति श्रीचैतन्यचन्द्रामृते परमाऽवतारमहिमाप्रकरणं नाम दशमो विभागः ।।*।।

।।*।। अथ रूपोल्लासनृत्यादि ।।*।।

पूर्णप्रेमरसामृताब्धिलहरी लोलाङ्गगौरच्छटा
कोट्याच्छादित विश्वमीश्वरविधिव्यासादिभिः संस्तुतं ।
दुर्लक्ष्यां श्रुतिकोटिभिः प्रकटयन्मूर्त्ति जगन्मोहिनी-
माश्चर्य्यं लवणोदरोधसि परं ब्रह्म स्वयं नृत्यति ।।१३१।।

भावतमोनाशकत्वं तत्तत् श्रवणादिपूर्व्वक प्रेमामृतवर्षित्वञ्च सूचितं ।।

प्रेमनाम महत्वादि श्रीवृन्दावनमाधुरी ।
राधिकाञ्च विजानीयात् को वा गौरहरिं विना ।।१३०।।

।।*।। इति श्रीचैतन्यचन्द्रामृते परमावतारमहिमाप्रकरणं नाम दशमो विभागः ।।*।।

श्रीचैतन्यस्य रूपोल्लास नृत्यादि रसयितुं प्रकरणमारभते षड्भिः पद्यैः । अथ रूपोल्लासनृत्यादि । तत्र परब्रह्मत्वेन प्रथमतो नृत्यमुल्लासयति पूर्ण प्रेमरसेत्यादि । लवणाम्वुधितटे परं ब्रह्म स्वयं नृत्यति किम्भूतं पूर्णो यः प्रेमरसामृताब्धिस्तस्य लहरी तरङ्गस्तया लोल कम्पयुक्तं यदङ्गं तस्य या गौरीच्छटा कोटिस्तयाच्छादितं विश्वं चतुर्द्दशभुवनानि येन परेण ब्रह्मणा तत् । पुनः किम्विशिष्टं शिव विधि व्यासादिभिः सम्यक् स्तुतं तेषां स्तवनविषयं श्रुतिकोटिभि दुर्लक्ष्यां जगन्मोहिनीं मूर्त्तिं प्रकटयत् । अत आश्चर्य्यं नर्त्तनमूर्त्ति

थे, एकमात्र श्रीचैतन्यचन्द्र प्रकटित होकर ही इन सवका आविष्कार किए ।।१३०।।

इति श्रीचैतन्यचन्द्रामृतमें परमावतार महिमा
प्रकरण दशम विभाग ।।१०।।*

** अथ रूपोल्लास नृत्यादि ।।**

जिन्होंने प्रेमपूर्ण अमृत सागर की तरङ्ग युक्त गौर देह की कान्ति समूह द्वारा जगत् को आच्छादित किया है, एवं विधि ब्रह्मा आदि देवगण जिन की स्तुति करते हैं, वह पर ब्रह्म श्रीगौर हरि

कोऽयं पट्टधटी विराजितकटीदेशः करे कङ्कणं
हारं वक्षसि कुण्डलं श्रवणयोर्विभ्रत् पदे नूपुरं ।
ऊद्ध्वींकृत्य निवद्धकुन्तलभरप्रोत्फुल्लमल्लीस्रगा-
पीड़ः क्रीड़ति गौरनागरवरो नृत्यन्निजैर्नामभिः ॥१३२॥

प्रकटन गौररूपेत्यादिना ब्रह्मण आश्चर्य्यता ॥१३१॥

स्वपीतच्छटाच्छादितक्ष्मादिसर्व्वं श्रुतीनामतर्क्याद्भुतप्रेमचर्व्वं ।
शिवब्रह्मदेवैः स्तुतं सर्व्ववृत्तं तटे वारिधेर्नृत्यति ब्रह्ममूर्त्तं ॥१३१॥

ब्रह्मत्वनिर्व्वचनानन्तरं श्रीचैतन्यस्य स्वप्रेमरूपोल्लासेन चमत्कारं विहारमुल्लासयति कोऽयमित्यादि । गौर एव नागरवरः स्वीयैर्नामभिर्नृत्यन् क्रीड़ति । कोऽयमपूर्व्वावतारः । नागरवरत्वं विशिनष्टि पट्टधरत्यादि । पट्टधट्या तटवरवेशोचित परिहित दुकूल रङ्गवसनेन विराजितः परमशोभितः श्रोणिदेशो यस्य सः । करे कङ्कणं पदे नूपुरं चेति जात्यैकत्वं करयोर्मणिवन्धयोः कङ्कणे वलयं वाह्वोरङ्गदे ज्ञातव्ये वक्षसि हारान् स्वर्णमुक्तामणिमयान् । श्रवणयोः कुण्डले मकराकृति कर्णभूषणं पादयोर्नूपुरौ विभ्रदिति सर्व्वत्र योज्यं । पुनः किम्भूतः ऊद्ध्वींकृत्य चातुर्य्यनैपुण्येन निवद्धकुन्तलभरः सूक्ष्मनालकुञ्चितकेशसमूहस्तत्र याः प्रकृष्टा उत्फुल्ला ईषद्विकसिता मल्लिकास्तासां सम्वन्धिनी स्रक् माला तयापीड़श्चूड़ा यस्य सः १३२

दुकूलाम्वरप्रोल्लसत्श्रोणिदेशः सुवर्णोज्ज्वलाङ्ग सुहारादिवेशः ।
हरिः क्रीड़ति स्वाह्वयैर्न्नृत्यरूढ़ः स्फुरन्मल्लिकामालिकावद्धचूड़ः १३२

श्रुति समूह के द्वारा दुर्लक्ष्या चमत्कारिणी जगन्मोहिनी मूर्त्ति को प्रकट कर स्वयं लवण समुद्र के तट देह में नृत्यकर रहें हैं ॥१३१॥

जो कटि देश में पट्टवस्त्र, कर में कङ्कण, वक्षः स्थल में हार, कर्ण द्वय में कुण्डल, चरण में नूपुर ऊर्द्धीकृत निवद्ध केश समूह में प्रफुल्ल मल्लिका मालाधारण किए हैं। वही एक अनिर्वचनीय नागरवर श्रीगौर हरि निजनाम कीर्त्तन के सहित नृत्य कर क्रीड़ा कर रहें हैं ॥

श्रीगौरचन्द्र पृथिवी में प्रेमातिरेक से मत्त होकर नृत्य आरम्भ

देवा दुन्दुभिवादनं विदधिरे गन्धर्व्वमुख्या जगुः
सिद्धाः सन्ततपुष्पवृष्टिभिरिमां पृथ्वीं समाच्छादयन् ।
दिव्यस्तोत्रपरा महर्षिनिवहाः प्रीत्योपतस्थुर्निज
प्रेमोन्मादिनि ताण्डवं रचयति श्रीगौरचन्द्रे भुवि ॥१३३॥
क्षणं हसति रोदिति क्षणमथ क्षणं मूर्च्छति
क्षणं लुठति धावति क्षणमथ क्षणं नृत्यति ।
क्षणं श्वसिति मुञ्चति क्षणमुदार हा हा रुतिं
महाप्रणयसीधुना विहरतीह गौरो हरिः ॥१३४॥

श्रीगौरचन्द्रस्य नृत्यं दृष्ट्वा देवगन्धर्व्वादयश्चमत्कृता हर्षोद्रेकेण दुन्दुभिवादनादिकं कुर्व्वन्तः सिषेविरे इत्याह देवा दुन्दुभिवादनमित्यादि । भुवि पृथिव्यां श्रीगौरचन्द्रे ताण्डवं नटनं रचयति सति देवादयो दुन्दुभिवादनादि कुर्व्वन्तीत्यादि । किम्भूते सप्रेम्नातिशय हर्षयुक्ते । विदधिरे चक्रुः कृतवन्तः इत्यर्थः । जगुर्गीतवन्तः महर्षि समूहा दिव्येषु स्तोत्रेषु पराः निपुणाः प्रीत्या प्रणयेनोपतस्थुस्तुष्टुवुरित्यर्थः ॥१३३॥

हरौ ताण्डवं कुर्व्वति प्रेममत्ते स्वरूपप्रकाशे जगन्मग्नचित्ते ।
सुरैर्वादितं किन्नरैर्गीतमत्र मुनीनां गणास्तुष्टुवुः सुष्ठु यत्र ।१३३।

महाभावपरिणामानुभावोल्लासं दर्शयति क्षणं हसन्तीत्यादि । महाप्रणयोऽत्र महाभावः स एव सीधुरमृतं तेनोपलक्षितो गौरोहरिर्विहरति भावसाङ्कर्य्येण नानानुभावं प्रकाशयति तत्तत्प्रकारमाह क्षणं हसतीत्यादि । श्वसितीति मूर्च्छानन्तरं जीवति । उदारां महतीं हाहा रुतिं शब्दं मुञ्चति उच्चारयतीत्यर्थः ॥१३४॥

करने पर देवगण दुन्दुभि वादन, प्रधान प्रधान गन्धर्व गण सङ्गीत, सिद्ध गण पुष्प वृष्टि से भूमि को आच्छादित करते हैं, एवं महर्षि गण प्रीति के सहित स्तव पाठ करते हैं, ॥१३३॥

श्रीगौर हरि महाभाव रूप अमृत रस से सिक्त होकर कभी हास्य करते हैं, कभी रोदन करते हैं, कभी मूर्च्छित होते हैं, कभी भूमि में लुण्ठित होते हैं, कभी द्रुतवेग से गमन करते हैं, कभी नृत्य

अश्रूणां किमपि प्रवाहनिवहैः क्षौणीं पुरः पङ्किलां
कुर्व्वन् पाणितले निधाय वदरापाण्डुं कपोलस्थलीं ।
आश्चर्य्यं लवणोदरोधसि वसन् शोणं दधामोऽंशुकं
गौरीभूय हरिः स्वयं वितनुते राधापदाब्जे रतिं ।।१३५।।

पादाघातरवैर्द्दिशो मुखरयन् नेत्राम्भसां विन्दुभिः
क्षोणिं पङ्किलयन्नहो विषदयन्नट्टाट्टहासैर्नभः ।

महाभावबोधानुभावप्रभावः क्षणं रोदितीह क्षणं हासभावः ।
हरिः क्रीड़ति श्रीशचीनन्दनोवै प्रनृत्यन्नदन् यो लुठन् मूर्च्छितोवै १३४

स्वकृपादृष्टिपातिनां लोकानां श्रीराधापादाम्भोजे रतिं विस्तारयितुं विरहिण्याः श्रीराधाया अनुभावमनुकुर्व्वतो महाप्रभोश्च रितमाह अश्रूणां किमपीत्यादि । स्वयं हरिर्भगवान् श्रीकृष्णचैतन्यो गौराङ्गो भूत्वा विरहिण्या राधाया भावमनुकुर्व्वन् श्रीराधायाः पादपद्मे रतिः वितनुते विस्तारयति । तदनुभावं दर्शयतिः । लवण समूद्रस्य तीरे उपविशन् शोणं रक्तमंशुकं वसनं दधानः श्रीराधिकायामपि श्रीकृष्णविषयक रागव्यञ्जक शोणवस्त्रधारणं वहिराविर्भूतो रागाइव । वामपाणितले कपोलस्थलीमर्पयित्वा किम्भूतां पक्वतोन्मुख वदरफलवदीषत् पाण्डुं श्वेतवर्णमिव वैवर्ण्यमुक्तं । नेत्रजलानां धारासमूहैः पुरोऽग्रस्थितां क्षौणिं भूमिं पङ्किलां पङ्कयुक्तां कुर्व्वन् १३५

तले वामपाणेः कपोलं निधाय रतिं राधिकायाः पदाब्जे विधाय ।
समुद्रस्य तीरस्थितो गौरचन्द्र स्त्रवन्नेत्रपद्मोऽभवत् प्रेमतन्द्रः ।।१३५।

पुनर्नानानुभावै रूपोल्लासेन नृत्यमुल्लासयन् तत्प्रकरणमप-

करते हैं. कभी चेतन हो जाते हैं, कभी हा, हा, महा शब्द करते हैं, इस प्रकार अनेक भावों से विहार करते हैं ।।१३४।।

स्वयं श्रीकृष्ण गौराङ्ग होकर समुद्र के तीर में उपवेशन पूर्वक करतल में बदर फल के समान पाण्डुवर्ण कपोल देश को अर्पण कर नयन जल से सम्मुखस्थ भूमि को पङ्किल कर रहें हैं, एवं मनोहर अरुण वसन परिधान कर श्रीराधा के पादपद्म में रति विस्तार कर रहें हैं ।।१३५।।

चन्द्रज्योतिरुदारसुन्दरकटिव्यालोलशोणाम्बरः
को देवो लवणोदकूलकुसुमोद्याने मुदा नृत्यति ॥१३६॥

॥*॥ इति श्रीचैतन्यचन्द्रामृते रूपोल्लासनृत्यादि प्रकरणे एकादशो विभागः ॥*॥

**** अथ शोचकं ****

सर्व्वैराम्नायचूड़ामणिभिरपि न संलक्ष्यते यत्स्वरूपं
श्रीशब्रह्माद्यगम्या सुमधुरपदवी कापि यस्यातिरम्या ।

संहरति पादाघातरवैरित्यादि । दिव्यतीति देवः किम्भूतश्चन्द्रस्य ज्योतिरिव गौरं ज्योतिः कान्तिर्यस्य सः । उदारं मनोहरं सुन्दर-कटिदेशे व्यालोलमालम्बमानं लोहितमम्बरं वसनं यस्य सः । पादाघातरवैर्नृत्यानुभावैर्द्दिशो मुखरयन् सशब्दान् कुर्व्वन् । पङ्किलयन् पङ्कयुक्तां कुर्व्वन् । अट्टाट्टहासैर्नभो विषदयन्नन्तरीक्षं शुक्लं कुर्व्वन् । चित्तविक्षेपजन्य स्मितादि प्रकारातिरिक्तो हासोऽट्टहासः । तथाहि हासाद्भिन्नोऽट्टहासः स्याच्चित्तविक्षेपसम्भव इति ॥१३६॥

**दिशः शब्दयन्नर्त्तने पादघातैरिलां पङ्किलां साधयन्नश्रुपातैः ।
नभः शुक्लयन् श्रीशचीजोऽट्टहासैः सुरक्ताम्बरो नृत्यति प्रेमरासैः १३६**

॥*॥ इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां टीकायां रूपोल्लासनृत्यादि प्रकरणे एकादशो विभागः ।*॥

क्रीड़ति विहरति नृत्यतीत्यादि वर्त्तमानप्रयोगै श्रीगौरलीलाया अपिनित्यत्वं सूचितं । प्रपञ्च गोचरागोचराभ्यां सदा चैतन्यलीलायाः

जो पदध्वनि से दिक् निकर को मुखरित, नयन वारि धारा से पृथ्वीतल को पङ्किल, एवं अट्ट अट्ट हास्य के द्वारा नभोमण्डल को शुक्लवर्ण से शोभित कर रहे हैं, वही चन्द्र कान्ति श्रीगौराङ्ग देव कटितट में आलम्बमान रक्त वसन से सुशोभित होकर समुद्र तीर-वर्त्ति पुष्पोंद्यान में नृत्य कर रहें हैं ॥१३६॥

इति श्रीचैतन्य चन्द्रामृत के रूपोल्लास प्रकरण में एकादश विभाग ॥

**** अथ शोचक ****

समस्त वेदों के शिरोभाग उपनिषत् सकल जिनका स्वरूप

येनाकस्माज्जगत् श्रीहरिरसमदिरामत्तमेतद्व्यधायि
श्रीमच्चैतन्यचन्द्रः स किमु मम गिरां गोचरश्चेतसो वा ॥१३७॥

प्राकट्याप्राकट्ये भेदमात्रे वस्तुतो नित्यैव । प्राकट्याप्राकट्ये आविर्भाव तिरोभावौ । प्रपञ्चागोचरत्वेन तिरोभावं मत्वा शोचति पञ्चश्लोकया । अथ शोचकमित्यादि । तस्य श्रुतिदुर्बोधत्व ब्रह्माद्यगोचर पदवीकत्व प्रेमरस जगन्मत्तता विधायकत्वैर्महिमानं व्यञ्जयन् शोचति सर्व्वैरित्यादि । स चैतन्यचन्द्रो मम गिरां वाक्यानां चेतसो वा गोचरो विषयो भविष्यति किमु नैवेति शोचति । ननु गौरचन्द्रस्वरूपस्य श्रुतिभिरप्रतिपन्नत्वान्नेश्वरत्वं तत्र कथं रज्यसि तद्विरहे वा कथं शोचसीत्यत आह । सर्व्वैराम्नायानां वेदानां शिरोरत्नैरपि यस्य स्वरूपं श्रीविग्रहः न संलक्ष्यते न सम्यग् दृश्यते तैर्दुर्ल्लक्ष्यत्वात् । ननु निगूढ़श्च तयोऽपि तत्स्वरूपं न जानन्तु लक्ष्मी शिव ब्रह्मादयोपि अवतारनिर्णायकाः आगमपञ्चरात्रादिकर्त्तारः । संप्रदाय प्रवर्त्तकाश्च तैः । कथं चैतन्यमार्गो न प्रचारित इत्यतो निर्वक्ति श्रीशेत्यादि । यस्य श्रीचैतन्यचन्द्रस्य काप्यनर्पितचरीं सुष्ठु मनोरमा मधुरा अत्यास्वादनीया वा पदवी उपदेशमार्गः श्रीशब्रह्मादिभिरप्यगम्या दुर्ज्ञेया अथच तत्कृपा कटाक्षपात्रै र्यैः कैरपि अतिरम्या सुखसेव्या । ननु भोश्चैतन्येश्वरनिष्ठा यदि चैतन्यस्वरूपं श्रुतिभिर्दुलक्ष्यं तत्पदवी श्रीश ब्रह्माद्यगम्या तर्हि भवता केन प्रमाणेन प्रमाण्यते तथाह येनेत्यादि । प्रमाणानामग्रगण्यं प्रत्यक्ष प्रमाणमेव मम बलमिति हस्तप्रसारचालनेन प्रत्यक्षं दर्शयत्येतदिति एतज्जगद्येन श्रीचैतन्यचन्द्रेण श्रीराधिकाच हरिश्च तयोर्यः प्रेमरसः स एव मदिरा तया मत्तं व्यधायि अकारि कृतमिति । प्रत्यक्षप्रमाणेन विश्वसिहि सन्दिग्धो मा भव । येतु प्रत्यक्ष प्रमाणसिद्धमपि न मन्यन्ते ते नास्तिकेभ्योऽपि नास्तिकाः । नास्तिकैरप्युक्तं नाप्रत्यक्षं प्रमाणमिति । प्रत्यक्षभिन्नं प्रमाणं न किन्तु प्रत्यक्षमेव प्रमाणमिति तदर्थः । इन्द्रिय-

---

नहीं जानते हैं, जिन का कोई सुमधुर उपदेश पथ लक्ष्मी शिव ब्रह्मादि से भी दुर्ज्ञेय है, अथच कृपा कटाक्ष पात्र भक्त जन में सुलभ

जाड्यं कर्म्मसु कुत्रचिज्जपतपो योगादिकं कुत्रचि-
द्गोविन्दार्च्चनविक्रियः क्वचिदपि ज्ञानाभिमानः क्वचित् ।
श्रीभक्तिः क्वचिदुज्ज्वलापि च हरेर्वाङ्‌मात्र एव स्थिता
हा चैतन्य कुतो गतोऽसि पदवी कुत्रापि ते नेक्ष्यते ॥१३८॥

सन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणं ॥१३७॥

सर्व्ववेदमूर्द्ध्वरत्न दुर्व्विभाव्यदेहिका
श्रीशपद्मजादिभिस्तु दुर्वितर्क्यवीथिका ।
राधिकेशभक्तिमत्त सर्व्वलोकजित्वरी
यास्यतीह दृक्पदन्तु मे नु गौरमाधुरी ॥१३७॥

श्रीचैतन्यभगवत्प्रचारित स्वभक्तिपरिपाटीं कुत्राप्यदृष्ट्वा शोचति । जाड्यं कर्म्मसु कुत्रचिदित्यादि । हा इति स्वप्रेमवरुण सम्वोधने । हा चैतन्य कुतोगतोऽसि । तव पदवी शुद्धनिगूढ़ परमोज्ज्वलरसभक्तिपरिपाटी मार्गः कुत्रापि संप्रदायेष्वन्येषु न दृश्यते। क्वापि संप्रदाने कर्म्मसु जाड्यं जड़ता । क्वापि जपोमन्त्रस्य सुलघूच्चारः पुरश्चरणादि । तपः क्लेशसहनादि । योगोऽष्टाङ्गः । यथा यमो ब्रह्मचर्य्यादि । नियमः स्नानादि । प्रत्याहार इन्द्रियाणां विषयेभ्यो निवृत्तिः । धारणा मनः स्थिरीकरणं । ध्यानमनवरत रूपादिचिन्तनं । समाधिः परमानन्दानुभवः । इति भेदार्थेन यम नियमासन प्राणायाम प्रत्याहार धारणाध्यान समाधयोऽष्टाङ्गानि । गोविन्दस्य पूजने विक्रियः विधिः प्रकारः । ज्ञानाभिमानः ज्ञानमिश्रभक्ति प्रकारः । उज्ज्वलापि श्रीमती भक्तिर्वाक्यमात्रेऽवस्थिता नत्वा चरितेति । हे महाप्रभो तवागमने यादृक् शुद्धरागानुगीय निगूढ़ोज्ज्वल

है. एवं जिन्होंने इस जगत् को हठात् श्रीराधाकृष्ण के प्रेमरस रूप मदिरा द्वारा मत्त कर दिया है, वही श्रीचैतन्य चन्द्र क्या मेरे वाक्य मन के गोचर होंगे ? ॥१३७॥

हा श्रीचैतन्य ! कहाँ गए ? आपके समान निर्मल परमोज्ज्वल रस भक्ति मार्ग का दर्शन और कहीं पर नहीं होता है, वरं किसी सम्प्रदाय में काम्य कर्म जड़ता, किसी में जप तप योगादि, किसी में

अभिव्यक्तो यत्र द्रुतकनक गौरो हरिरभू-
न्म हिम्ना तस्यैव प्रणयरसमग्नं जगदभूत् ।
अभूदुच्चैरुच्चैस्तुमुल-हरिसंङ्कीर्त्तनविधिः
स कालः किं भूयोऽप्यहह परिवर्त्तेत मधुरः ॥१३९॥

भक्तिमार्गपरिपाटी तादृक् कुतापि नास्ति हा कुतो गतोसीति शोचनं ॥१३८॥

ज्ञानि कर्म्मि यति त्यागि तापसादि तुच्छका
स्वोज्ज्वलादि वाक्यमात्र भक्तिमार्गपोषिका ।
रागवर्त्म शुद्धभक्तिसाधनान्यजित्वरी
यास्यतीह दृक्पथन्तु मे नु गौरमाधुरी ॥१३८॥

परमसुखजनक श्रीगौराविर्भावकालमाधुरीमुद्दिश्य शोचति । अभिव्यक्तोयत्रेत्यादि । स कालोभूयः पुनरपि किं परिवर्त्तेत पुनरागमिष्यतीत्यर्थः । अहह इति खेदे । किम्भूतो मधुरः श्रीचैतन्याविर्भावलीलात्वेन परमरसनीयः । तदेव दर्शयति यत्रकाले द्रवीभूत सुवर्णकान्तिरिव, गौरहरिरभिव्यक्तः प्रपञ्चगोचरीभूतः । तस्यैव गौरहरेर्महिम्ना प्रभावेन प्रणयरसेन मग्नं जगदभूत् अथवा तस्यैवेति कालस्य विशेषण गौराविर्भावनकालस्य एव महिम्नेत्यर्थः । यत्रात्युच्चैस्तुमूलः कांस्यकरतालानां मृदङ्गानाञ्च शब्दैर्वहुजनानां सुकण्ठ स्वरैश्च संकुलः सचासौ हरिकीर्त्तनस्य विधिर्विधानञ्चेति सोऽभूत् । तादृश लीलाविशिष्टः कालः परिवर्त्तेत किं नैवेति शोकः ॥१३९॥

व्यक्तोऽभवद्यत्र सुवर्णवर्णो गौरो हरिः प्रेमनिमग्नविश्वः ।
संकीर्त्तनानन्दरसो हि यत्र स एव कालः पुनरेष्यति स्वित् ।१३९

श्रीगोविन्दार्चन में विधि विकार, किसी स्थान मे ज्ञानाभिमान एवं कहींपर परमोज्ज्वला भक्ति शब्द मात्र से ही अवस्थित है ॥१३८॥

जिस समय तप्त काञ्चन कान्ति धारी श्रीगौरहरि अवतीर्ण हुए थे, उस समय उनकी महिमा से जगत् प्रणय रस में निमग्न हो गया था एवं जिस समय तुमुल श्रीहरि सङ्कीर्त्तन होताथा, हाय ! क्या वह सुखकर समय पुनर्वार आयेगा ॥१३९॥

सैवेयं भुवि धन्यगौड़नगरी वेलापि सैवाम्बुधेः
सोऽयं श्रीपुरुषोत्तमो मधुपतेस्तान्येव नामानि तु।
नो कुत्रापि निरीक्ष्यते हरिहरि प्रेमोत्सवस्तादृशो
हा चैतन्यकृपानिधान तव किं वीक्ष्ये पुनर्वैभवं ॥१४०॥

यदि निगदित मीनाद्यंशवद्गौरचन्द्रो
न तदपि स हि कश्चिच्छक्तिलीलाधिकाशः।

पुनरुद्दीपनविभावेन शोचति सैवेयं भुवीत्यादि। हा चैतन्य हा कृपानिधान निधीयतेऽस्मिन्निति निधानमाधारः हा कृपाया अधिकरण तव वैभवं प्रभावमैश्वर्य्यं पुनः किं वीक्ष्ये काक्वा नैव। ननु मम लीलास्थलानि मत्प्रचारित नामानि तत्र तत्र तानि गृहीत्वा विहरस्व कथं शोचसि तत्राह सैवेयमित्यादि। धन्या पुण्यवती या गौड़नगरी तव प्रादुर्भावादिलीलास्थली सैवेयं भुवि पृथिव्यां सैवाम्बुधेर्वेला उपवनादियुक्तं तीरं यत्र प्रान्तलीला। एवं तान्येव हरेकृष्ण हरेकृष्णेत्यादि नामानि लोकैर्मयाच गृहीतान्यपि। अन्येषां वा का कथा सोऽयं श्रीपुरुषोत्तमः श्रीलीलाचलेन्द्रः श्रीजगन्नाथदेवोऽपि प्रेक्ष्यते किन्तु भगवत्प्रकटकालीनो यादृशः प्रेमोत्सवस्तादृशः कुत्रापि नो ईक्षते अतएव शोचामीति ॥१४०॥

स एव गौड़ोऽम्बुनिधेस्तटः स वै हरेस्तथाख्या जगतीपतिः स हि।
भवत्कृत प्रेम न कुत्र दृश्यते वीक्ष्ये पुनः किं तव वैभवं हरे ॥१४०॥

ननु गौरचन्द्रोऽपि मीनादिवदंशावतारो भविष्यति तत्र कथं शोचसि पूर्णस्वयं भगवच्छ्रीकृष्णविषयेऽनुरक्तो भवेत्यतः किञ्चिदश्रुत-

---

भूमण्डल में पुण्यतमा वह गौड़ नगरी है, उस समुद्र कुल, वही श्रीपुरुषोत्तम, मधुपति श्रीकृष्ण के हरे कृष्ण हरेकृष्ण प्रभृति नाम समूह विराजित हैं। हरि हरि ! किन्तु तादृश प्रेमोत्सव कुत्रापि दृष्ट नहीं होता है, हा श्रीचैतन्य ! हा कृपामय ! क्या आपका वह वैभव पुनर्वार देख सकूँगा ॥१४०॥

यदि श्रुति पुराणोक्त मीनादि अंशावतार के सदृश श्रीगौर चन्द्र को अंशावतार कहो, तो, वह ठीक नहीं है, कारण मत्स्यादि

अतुलसकलशक्त्याश्चर्य्यलीलाप्रकाशै-
रनधिगतमहत्त्वं पूर्ण एवावतीर्णः ॥१४१॥

पूर्व्वोक्तसिद्धान्तं माह यदि निगदितेत्यादि। निगदिताः श्रुति-पुराणाद्युक्ता ये मीनद्याशावतारास्तद्वद्यदि गौरचन्द्रोऽपि स्यात् तन्न स मीनाद्यंशावतारः कश्चिद्रामादिः शक्तिलीलाविकाशः शक्त्या लीलायाश्च विकाशः प्रकाशो यस्मात् सः। अयं गौरचन्द्रः पूर्ण एवावतीर्णः कैर्हेतुभिः पूर्णस्तत्र हेतुमाह अतुलेत्यादि। अतुला असमोर्द्धाः सकलाः यावत्यो याः शक्तयस्ताभिराश्चर्य्याः। परम-चमत्कारा ये लीलानां प्रकाशा आविर्भावास्तैर्हेतुभि पूर्णएव। एव शब्देन पूर्णत्वं दृढ़ीकृतं। अतएवानधिगतमहत्त्वं अनधिगतं न ज्ञान-विषयीभूतं महत्त्वं महिमाप्रभावो यस्य गौरचन्द्रः सः। पूर्णताचास्य श्रीकृष्णाविर्भावविशेषत्वात् तस्य पूर्णतायां श्रुतिपुराणादीनां प्रमाण-त्वेन ख्यातत्वात् श्रुत्यादीनां शिरोरत्ने श्रीमद्भागवते। एतेचांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति। गूढ़ं पर ब्रह्म मनुष्यलिङ्गमिति यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनमित्यादयो वहवः प्रयोगाः सन्ति तद्विचारेणालं। गौरस्य श्रीकृष्णाविर्भावविशेषत्व श्रीकृष्णावता-रानन्तर्य्यावतारत्वात्। यदैव द्वापरे श्रीकृष्णोऽवतरति तदैव कलौ श्रीगौरोऽप्यवतरतीति स्वारस्ये लब्धे श्रीकृष्णाविर्भावविशेष एवायं गौर इत्यायाति तदव्यभिचारात्। अतएव द्वापरे भगवान् श्याम इत्याद्यनन्तरं नानातन्त्रविधानेन कलावपि तथा शृणु। कृष्णवर्णं त्विषाकृष्णमित्यादि इदं पूर्व्वं व्याख्यातमस्ति। अन्यानानि प्रमाणानि दर्शितानि सन्ति। अथर्व्ववेदे ब्रजतापन्यां दक्षिणद्वारि सप्तमावरणे द्वारपालो गौरवर्णो विष्णुरित्यनेन स्वशक्त्या चैक्यमेत्य प्रान्ते प्रात-रवतीर्य्य सहस्वैः स्वीयमासाद्य स्वयमनुशिक्षयतीति। अस्यार्थः। अनेन गौरवर्णेन विष्णुना स्वशक्त्या स्वरूपभूतया ह्लादिन्या राधया च सहैक्यं प्राप्य प्रान्ते प्रातः कलौ प्रथमसन्धायां स्वयं भगवान् श्री-

---

अवतारगण कदापि शक्ति एवं लीला प्रकाश में समर्थ नहीं हैं, किन्तु अविदित महिमा श्रीगौर हरि ने अतुल शक्ति आश्चर्य्य लीला

ब्रह्मेशादिमहाश्चर्य्यमहिमापि महाप्रभुः ।
मुग्धवालोदितं श्रुत्वा स्निग्धोऽवश्यं भविष्यति ॥१४२॥

कृष्णः स्वैः पार्षदैः सहावतीर्य्य स्वीयप्रेमाणमास्वाद्यानुपश्चात् शिक्षयति जनष्विवत्यर्थः । वर्त्तमानप्रयोगेण गौरलीलाया नित्यता व्यञ्जिता । आविर्भावतिरोभावभेदमात्रञ्चेति ॥१४१॥

मीनादयो यस्य कलाः स्वरूपाः कृष्णः स्वयं श्रीभगवान् स एव ।
श्रीगौरचन्द्रः किल पूर्ण एव यावत् स्वशक्तिस्वगुणप्रसेव्यः ॥१४१॥

नत्वपरिमिताप्राकृतगुणलीलः शिवब्रह्माद्यगम्यमहिमापि श्रीकृष्णचैतन्यमहाप्रभुः स्वयं भगवान् तदुदितं स्तुत्यादिकं शोचनान्तं कथं श्रोष्यति श्रुते सति वा कथं प्रशंसति । तत्र सदैन्यमुपसंहरति श्लोकद्वय्या ब्रह्मेशादीत्यादि । महांश्चासौ प्रभुरीश्वरश्चेति महाप्रभूः । यद्वा महान्तो वक्रेश्वरादयः प्रभुः नित्यानन्दाद्वैतौ च यस्माद्-यस्य वा स महाप्रभुः सामानाधिकरण्या भावेऽपि महतस्तस्यात्त्वं तात्पर्य्यार्थं गौरवात् अथवा महान्तौ सङ्कर्षणशङ्करांशकौ श्रीनित्यानन्दाद्वैतौ प्रभुर्भक्तिप्रवर्त्तकौ यस्मात् स महाप्रभुः परमेश्वरः स्वयं भगवान् श्रीकृष्णचैतन्यनामेत्यर्थः । अतएको महाप्रभुः द्वौ प्रभु अतो महद्भिः सह प्रभुद्वयं महाप्रभुं सेवेत इति प्रसिद्धं । तथाहि । श्रीस्वरूपरचित गौरतत्त्वनिरूपणे । एकोमहाप्रभुर्ज्ञेयो द्वौ प्रभू सम्मतौ सतामिति एतद्दृष्टया श्रीगौरगणोद्देशदीपिकायाञ्च । एकोमहाप्रभुर्ज्ञेयः श्रीचैतन्यमहाप्रभुः । प्रभु द्वौ श्रीयुतौ नित्यानन्दाद्वैतौ महाशयाविति । ब्रह्मेशयोः पितामहमहेशयोरादिर्महाविष्णुर्वैकुण्ठनाथस्तस्मादपि महानधिकाधिकमाश्चर्य्यः परमचमत्कारकारी महिमा असमोर्द्धैश्वर्य्यप्रभावो यस्य सः । एवम्भूतोऽपि उन्मत्तमूर्खस्य वालकस्य वा मम वचनं श्रुत्वा अवश्यं नितरां स्निग्धो भविष्यति । करुणया मयि वात्सल्यस्नेहं करिष्यति । स्वयं दैन्येनोक्तं वाणीतु तन्न सहते मुग्धः सद्विद्यादि वैशिष्ट्येन मनोहरो वालो मूर्खोऽपि

प्रकाश किए हैं, अतएव आप ही पूर्णावतार हैं ॥१४१

जो ब्रह्मा शिव प्रभृति देवगण के आदि कारण, अत्याश्चर्य

यस्मात् स मुग्धवालस्तस्योदितमिति । प्रवृत्तभक्तमात्रस्य स्खलितमपि वचनं श्रुत्वा सुन्दरवालस्य पितेव तुष्टो भवति किं पुनस्तादृशामित्यर्थः ॥१४२॥

अवोध्यमपि भक्तोक्तं श्रुत्वा गौरहरिः किल ।
विधागम्यो भवेत् प्रीतो वालाद्योक्तं पिता यथा ॥१४२॥

श्रीगौरहरिविषयार्था मम वाणी यथातथा शुद्धमशुद्धं वा जल्पतु वदतु यथा तथा जल्पने हेतुमाह वालभावान्मूर्खत्वात् । वालो-मूर्खेऽर्भकेऽपि चेत्यमरः । मूर्खत्वे हेतुमाह दृष्टं नेत्यादि । तत्र न विवेचितं । भोभोनया वुद्धया विज्ञैः सह न विचारितमपि । यद्यपि स्वयं दैन्येनोक्तं दृष्टं नेत्यादि । तथापि वाणी तदसहमाना यथार्थयति नशनं नशः संसारनाशः तस्यास्त्रं श्रीचैतन्यचरणोपासनं दृष्टं निश्चित मित्यर्थः । गुरुवो न दृष्टाः अनदृष्टा श्रीगौरभक्ता एव गुरुवो मया दृष्टा निर्णीताः यतः सुवुद्ध्या विरेचितं । कैः सह विवेचितमित्याह । नापि वुधैः नापितु यथार्थसिद्धान्तेनाह्लादयितुं शीलं येषां तैः किं वा नपनं नाप आह्लादः सोऽस्ति येषां तैः सहेति नप आह्लादने धातुः वा अर्थविशेषावगतिस्तान् नयत्यलं करोति वालः स चासौ भावो-ऽभिप्रायश्चेति स तस्मात् यथा तथा जल्पतु तथैव मे प्रसीदतु । यद्वा ननु कोऽपि भवन्मतं न मन्यते । अपितु निन्दति जल्पति चान्यदु-पासनादि तत्राह विवेचितमित्याहि । येन जनेन सुष्टु वुद्ध्या चैतन्य तत्त्वविज्ञैः सह न विचारितमपि स जल्पतु तेन किं मे मम तु यथा निर्णीतमस्ति तथैव गौरहरिः प्रसीदतु यत्तदोः सम्वन्धनियतत्वात् । शास्त्रं श्रुत्यागमादिसार श्रीमद्भागवतसन्दर्भस्तन्न दृष्टं यथार्थार्थो नानुभूतः । ननु वुधेन तेन कथं शास्त्रसन्दर्भो नानुभूतस्तत्राह गुरुवो-न दृष्टा इति । अस्मिन् कलौ स्वयं भगवान् श्रीकृष्णचैतन्यमहाप्रभु-

---

महिमान्वित, वही श्रीमन्महाप्रभु श्रीगौर हरि मादृश मूढ़ वालक के वाक्य को सुनकर अवश्य स्निग्ध होंगे ॥१४२॥

मेरा यह बालक तुल्य कथन मूर्खत्व प्रयुक्त है, कारण मैंने

यथातथा जल्पतु बालभावात्तथैव मे गौरहरिः प्रसीदतु ॥१४७॥

स्तत्परिकराश्च गुरवः। यतोऽष्टाविंशतिचतुर्युगद्वापरान्ते नवीन-जलदमूर्त्तिः पीताम्बर-व्रजराजकुमारः श्रीकृष्णो युगावतारेणैकी-भूत्वावतीर्य्य तादृशी लीलामाधुरीं विस्तार्य्य तिरोभूत्वा पुनः प्रकाशान्तरेण गौरीभूय युगावतारेण सह सपरिकरस्तद्द्वापरा व्यव-हित प्रथमकलौ प्रकटीभूत्वा द्वापरीय मधुरलीलामाधुर्य्यस्यास्वादन पूर्व्वकप्रचाराय स्वयं भगवान् श्रीकृष्णचैतन्य नामा तदुपासनसम्प्रदाय-प्रवर्त्तको भवत्यतएव गुरवः। यथा व्रजतापन्यां प्रान्ते प्रातरवतीर्य्य सह स्वैः स्वयमनुशिक्षतीति। पुराणान्तरे कलौ सङ्कीर्त्तनारम्भे भविष्यामि शचीसुतः। इत्यादीनि बहूनि लिखितानि सन्ति। सर्व्वविद्वन्मुकुटमणि सुराचार्य्यावतार सार्व्वभौमभट्टाचार्य्याणामनुभवो यथा। श्रीचैतन्याष्टके। वैराग्यविद्या निजभक्तियोगः शिक्षार्थमेकः पुरुषः पुराणः। श्रीकृष्णचैतन्यशरीरधारी कृपाम्बुधिर्यस्तमहं प्रपद्ये। कालान्नष्टं भक्तियोगं निजं यः प्रादुष्कर्त्तुं कृष्णचैतन्य नामा। आविर्भूतस्तस्य पादारविन्दे गाढ़ंगाढ़ं लीयतां चित्तभृङ्ग इति। तथाहि श्रीविदग्धमाधवे च॥

अनर्पितचरीं चिरात् करुणयावतीर्णः कलौ
समर्पयितुमुन्नतोज्ज्वलरसां स्वभक्तिश्रियं
हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः। इति॥

अतः श्रीकृष्णचैतन्यमहाप्रभुः स्वयं भगवानेव सम्प्रदायप्रवर्त्तक स्तत्पार्षदा एव साम्प्रदायिका गुरवो नान्ये। येन न दृष्टास्तेन किं शास्त्रं दृष्टं का कथा नैव। दर्शकस्य तादृश गुरोर्दर्शनाभावादज्ञान-तिमिरान्धस्य ज्ञानाञ्जनशलाकया चक्षुरुन्मीलनाभाव इति भावः। शास्त्रञ्च पूर्व्वं लिखितमस्ति तत्र नानातन्त्रविधानेन कलावपि तथा शृणु। कृष्णवर्णमित्यादि। तत्र स्वामिचरणाः। रुक्षतां व्यवर्त्तयति

शास्त्र दर्शन नहीं किया, गुरुओं से उपदेश प्राप्त भी नहीं किया एवं पण्डित गणों के सहित विचार भी नहीं किया है, इस से शुद्ध हो

त्विषा कान्त्या अकृष्णं इन्द्रनीलमणिवदुज्ज्वलं। यद्वा त्विषा कृष्णं कृष्णावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति सुमेधसो विवेकिन इत्याहुः। अत्राभिप्रेतार्थश्च। रुक्षता व्यावर्त्तनेन गौर-रूपलावण्ययुक्तं। त्विषा ह्लादिनीशक्तिसारभूत श्रीराधिकाकान्त्या अकृष्णं गौरवर्णमिति यावत्। इन्द्रनीलमणिवदुज्ज्वलमिति। यथा कुङ्कुमपिण्डसंयुक्त मरकतमणिर्गौरी भवती। तथा राधिकाकान्त्या श्रीकृष्णस्य गौरवर्णत्वेनोज्ज्वलता। स्वामिचरणैः यद्यवारविश्लेषो न कृतस्तर्हि यद्वेति पक्षो न लगतीति ज्ञेयं। यद्वेति पक्षस्तु श्रीकृष्णाविर्भावविशेषत्वाद्गौरस्येत्यभिप्रेतार्थः स्वाम्यस्पष्टव्याख्या-त्वाच्छन्नावतारत्वात् अतएव श्रीगौरावतारमुद्दिश्य कलेरस्य श्रेष्ठतामह।।

कलिं सभाजयन्त्यार्य्या गुणज्ञाः सारभागिनः।
यत्रसङ्कीर्त्तनेनैव सर्व्वस्वार्थोऽपि लभ्यते।
कृतादिषु प्रजा राजन् कलाविच्छन्ति सम्भवं।
कलौ किल भविष्यन्ति नारायणपरायणाः॥इति॥

सभाजयन्ति प्रशंसन्ति आर्य्या विज्ञाः गुणज्ञाः कलेरस्य गुणं जानन्ति ये ते ननु दोषाणां वहुत्वात्। कथं सभाजयन्ति तत्राह। सारभागिनः सारांश ग्राहिणः गुणमाह यत्र यत्र गौरावतारके कलौ तत्प्रवर्त्तितसङ्कीर्त्तनेनैव सर्व्वेभ्यः पुरुषार्थेभ्यः स्वाभीष्टोऽर्थः प्रेमा लभ्यते। सङ्कीर्त्तनं मृदङ्गकरतालध्वनिभिर्व्वहुजनैर्मिलित्वा सुस्वरै-रत्युच्चैर्गानं। प्रजा भक्ता नारायणपरायणा इति नारीणां गोपीणां वृन्दं नारं गोपीसमूहः तदयनं विहारस्थानं यस्य स नारायणः रासादि-विहारी श्रीकृष्णः स्वयं भगवान् तत्परायणास्तदुपासकाः अस्या-वतारस्य गौरत्वे गर्गवचनं। शुक्लो रक्तस्तथापीत इदानीं कृष्णतां गतः। इति॥

इदानीं द्वापरशेषे कृष्णवर्णतां प्राप्तः। द्वापरे भगवान् श्याम

अथवा नहीं तथापि श्रीगौर हरि मेरे उपर प्रसन्न होगे। यही आशा है॥१४३॥

।।॥ इति श्रीपादप्रबोधानन्दसरस्वतीगोस्वामी विरचितः
श्रीचैतन्यचन्द्रामृतो ग्रन्थो द्वादशविभागः सम्पूर्णः ।।॥

इति वचनात्। तथा पीत इति यथा सत्यादौ शुक्लादिस्तथा कलौ पीतवर्णः। यत्तदोर्नियतसम्बन्धात्। अतएवानन्दवृन्दावनचम्पूग्रन्थे। धर्म्माविकृते कृते शुक्लः सवर्णस्त्रेतायां द्वापरेऽद्वापरे श्यामो मूर्त्त इव कलौ पीत इति। कृते सत्ये किम्भूते धर्म्माविकृते चतुष्पाद्धर्म्मे। त्रेतायां अग्नेः सवर्णः रक्तवर्ण इत्यर्थः। द्वापरेऽद्वापरे सन्देहाभावे। कलौ किम्भूते कलहे मूर्त्त इव। कलौ चैतन्यप्रवर्त्तित-सङ्कीर्त्तन-स्तुत्यादिसाधने विहितकर्म्मत्यागमाह। देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणीच राजन्। सर्व्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्त्तमिति कर्त्तं कृत्यं। तत्कलिकालोपास्यभक्तानां विहितकर्म्मणि निवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह। स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्व्वं हृदि सन्निविष्ट इति । अस्यार्थः। त्यक्तोऽन्यस्मिन् स्वोपास्यगौरहरिस्तत्सम्बन्धिभिन्नदेवतान्तरादौ भावो रतिर्येन तस्य। स्वस्य हरेः पादमूलं भजतो विकर्म्मणि प्रवृत्तिर्न सम्भवति कथञ्चित् प्रमादादिना यदि पतितं स्यात्तदपि हरि-गौरहरिर्विधुनोति नाशयति। ननु यमस्तं न मन्येत तत्राह परेशः। ननु श्रुतिस्मृतिर्ममैवाज्ञेति भगवद्वचनात् स्वाज्ञाभङ्गः कथं सहेत तत्राह प्रियस्य। ननु नायं पापक्षयार्थं भजते तत्राह हृदिसन्निविष्ट इति। नहि वस्तुशक्तिरर्थितामपेक्षते इत्यर्थः इत्यादि शास्त्रं येन न दृष्टं तेन चैतन्यप्रवृत्तसम्प्रदायकगुरवो न दृष्टाश्चेत्तर्हि शास्त्रमपि न दृष्टं स्यादिति। प्रकरणानि द्वादश यथा। स्तुति नत्याशिषो गौरभक्तानाञ्च प्रशंसनं। चैतन्याभक्तनिन्दा च स्वनिन्दोपास्यनिष्ठता लोकशिक्षा तदुत्कर्षोऽनुऽवतारमहिमापि च। तद्रूपोल्लासनृत्यादि श्लोकः प्रकरणानि वै ।।१४३।।

निजबुद्धयापि चैतन्यप्रियविज्ञैरपि न विवेचितं येन यथा
तथा वदतु मूढ़त्वान्ममतु यथान्तः करणेऽस्ति तथैव प्रसीदतु १४३

।।*।। इति श्रीचैतन्यचन्द्रामृते श्रीपादप्रबोधानन्द गोस्वामि-विरचिते रसिकास्वादिन्यां टीकायां शोचनप्रकरणे द्वादशो विभाग: ।।

इति श्रीप्रबोधानन्द सरस्वती गोस्वामी विरचित
श्रीचैतन्यचन्द्रामृतस्य द्वादशविभाग: सम्पूर्ण: ।

गान्धर्वादास्य लुब्धेन सुजनानाञ्च तुष्टये ।
पूरितां विमलाभाषा हरिदासेन धीमता ।।

—**—

** श्रीश्रीगौरगदाधरौ जयत: **

—**—

टीकाकृत्संगृहीतानि श्लोकानि-

—**—

स्वीयमास्वादितुं प्रेमदातुं चावततार य: ।
नवद्वीपे परपदे स्तुमस्तं गौरमीश्वरं ।।१।।
अत्यधर्म्मो धर्म्मवर्जो हरिसम्बन्धिवर्ज्जित: ।
येन दत्तप्रेममत्तोऽभूत्तं गौरहरिं स्तुम: ।।२।।
विशेषसाधनैर्यत्तु न प्राप्तं कैरपि स्वयं ।
तत्प्रादुरासीद्यद्व्यक्त्या नौमि तं गौरमीश्वरं ।३।
योदर्शनादि मात्रेण पतितप्रेमदोभवेत् ।
नौमि तं कृष्णचैतन्यदेवं कारुण्यवारिधिं ।।४।।
यत्कारुण्यावतारं मोक्षप्रभृतिर्नरकादिवत् ।
भवेत्तं नौमि चैतन्यं करुणावारिधिं हरिं ।।५।।
यत्पादाम्भोजमाध्वीकपानमत्ता: सुरादिकान् ।
अवजानन्ति तं नौमि गौरचन्द्रं प्रभुं हरिं । ६।।
अतिगूढ़ोज्ज्वला भक्ति: कलौ येन प्रकाशिता ।
अवतारवरं नौमि तं गौरहरिमीश्वरं ।।७।।

उद्धृत्य वाहुयुगलं नृत्यन्तं करचालनैः।
हरिहरीति तैर्विश्वाशुभघ्नं गौरमानमम् ।१०।
तप्तकाञ्चनगौराङ्गमानन्दरसविग्रहं।
निगूढ़प्रेमदं श्रीमच्चैतन्यं प्रणमाम्यहं ।११।
प्रेमधिक्कृतवैकुण्ठमश्रुपूरगलद्दृशं।
तनुतोत्थसुधाम्भोधिं यतीन्द्रं प्रणमाम्यहं ।१२।
कनकाम्भोजगर्भाभं राधामाधवयोर्वपुः।
एकं वः पातु हर्य्यक्षग्रीवं शुचिविकारकं ।१३।
भावोद्दीपनमेघादिदृष्ट्वानुभावान् हरिः।
गौरं प्रचारितप्रेमा पातु वः कम्पदेहकः ।।१४।।
श्रीगौरविधुरवरुणविचित्राम्वरशोभितः।
प्रेमामृतं स्वान्त र्नभ उदियाद्वः स्वयं हरिः ।।१५।।
उत्कीर्त्तितमहामन्त्रो गौरोऽश्रुस्नपिताननः।
स्व प्रकाश जगन्नाथं दिदृक्षुः पातु वः सदा ।।१६।।
अन्तःकलुषहन्ता च स्वप्रेमाम्वुधिवर्द्धनः।
विश्वं शीतलयन्तं तं गौरचन्द्रश्चकास्तु वः ।।१७।।
ना प्रकाशि रसो योऽत्र मुनिभिः शौरिणापि च।
गौरभक्ताः सुखं तत्र खेलन्त्युज्ज्वलभक्तिके ।।१८।।
सङ्गः श्रीगौरभक्तानां यावन्न स्यात् कलौ युगे।
तावद्ब्रह्मविचारादि तावच्छास्त्रविदां कलिः ।।१९।।
वैराग्यादिगुणे यादृग् गौरभक्तेषु दृश्यते।
तादृशो गुणलेशोऽपि क्वाप्यन्यत्र न दृश्यते ।।२०।।
श्रीमद्गौरमुखं येन सकृद्दृग्गोचरीकृतं।
स हि तच्चरणं हातुः न शक्नोति कदाचन ।।२१।।
धर्म्मकृद्विष्णुसेवी च तीर्थाटी वेदपारगः।
न वेत्ति व्रजतत्त्वं हि गौरभक्ताश्रयं विना ।।२२।।
समस्त वस्तुसाराणां सारांशभूतवस्तुनि।
तुच्छतां दधति श्रीमद्गौराङ्गपादसेवकाः ।।२३।।

कायिका वाचिका हृद्या बुद्धिजाः शोभना गुणाः।
सन्ति ये गौरभक्तेषु ते गुणाः क्वापि न स्थिताः।२४।
सेवितासंख्यगुर्व्वादि जनानां यः क्वचिन्न हि।
गौरभक्तैः स लभ्येत निगूढ़प्रियता रसः ॥२५॥
चैतन्यभक्तभक्तानां यो गुणः स्वत ईरितः।
तस्य कोट्यंशलेशोऽपि न क्वापि भजतां किमु ॥२६॥
आनन्दरसपुरस्थाश्चैतन्यपदपार्षदाः।
नानानुभावमीशस्य प्रकाशस्ते नटोत्सवः ॥२७॥
कृष्णपदाम्बुजरससम्बन्धः कस्य न क्वचित्।
जानन्त्यनुभवन्त्येवं तं रसं गौरपार्षदाः।२८।
गौराङ्गोपासनादर्शि येन स प्रवरो महान्।
भूरिभाग्योदयः सम्यक् शास्त्रार्थविधिदर्शकः।२९।
साधनादिविहीनोऽपि गौराङ्गार्पितमानसः।
पुरुषार्थशिरोरत्नः प्रेमपूर्णः स एव हि ॥३०॥
चैतन्योपासनं यस्य कलौ नास्ति कदाचन।
अनन्यहरिभक्तोऽपि स धन्यो मन्यते न हि ॥३१॥
ज्ञानकर्म्मतपोयोग यमिनो भोगिनश्च ये।
तान् धिग् गौरपदाम्भोजमधुलेशविवर्ज्जितान्।३२॥
यथा श्रीकृष्णचैतन्यकरुणामन्तरेण वै।
सर्व्वसाधनसत्त्वेऽपि भावसम्भावना नच ॥३३॥
ततः स्वप्रेमजलधिरत्नं नाम वितन्वतः।
गौरेन्दोः पादरत्नं यो नाश्रितो मूढ़ एव सः ॥३४॥
गौरपादामाश्रितस्य प्रेमाम्भोधावमज्जनं।
किन्तु निन्दातरखरक्षरन्मुत्रे निमज्जति ॥३५॥
प्रसारितो येन महान् प्रकृष्टः प्रेम्नैव पीयूषरस. स सिन्धुः।
जनाय तस्मिन् प्रकटे तदङ्घ्रिं यो नाश्रितो मूढ़तरात् स मूढ़ः।३६।
स्वनाम-मधुमत्तस्य गौरस्य पादपद्मयोः।
महिमाननुभूतेषु हरिभक्तिः कदापि नः।३८।

अवीजादङ्कुरोऽन्धस्येक्षा पङ्गोर्गिरिलङ्घनं ।
न यथा न तथा गौराभक्तस्य प्रेमलम्भनं ।३९।
भक्तेषु नास्ति तस्मै योऽददात् प्रेमविलासतः ।
प्रेमोत्सवं तत्र गौरे यन्मतिर्न पशुः स हि ।४०।
अप्यगण्यावताराणां सतामप्यनुभूतता ।
स्वभावो यस्य तस्मिंश्च मूढ़ानां हरिधीर्न हि ।४१।
यत्कारुण्यकटाक्षप्रेमानन्दस्तुच्छतां नयेत् ।
ब्रह्मानन्दं तमीशं ये न जानन्त्यजया हताः ।४२।
कुलवाक्पटुता वेदपादाकृतिरयोमुखात् ।
धिक् तेषामिह येषां वै न गौरचरणे रतिः ।४३।
प्रशंसन्ति परव्योमपार्षदा यत् प्रियानहो ।
अपुण्यवान् कथं तस्य पादपद्मं समाश्रयेत् ।४४।।
प्रेमोत्सवं यो ददाति संभाष्य स्निग्धया दृशा ।
तस्मिन्ननादरो येषां ते दुष्टा भुवि केवलं ।४५।
गौराङ्गप्रेममाधुर्य्यरसधाराप्लुतं जगत् ।
मम तत्स्पर्शनं नास्ति वञ्चितस्य धिगस्तु मां ।४६।
कृतावतारे गौराङ्गे प्राप्तः प्रेमरसो जनैः ।
तद्गन्धलेशो मम न धिग्विद्या जीवनादिकं ।।४७।।
जगत्प्लाविदयासिन्धोः करुणालेशहीनतः ।
आत्मनश्च सुदुर्भाग्यमनुमीयेहमभुद्तं ।४८।
कलिदोषविदुष्टस्य हृषीकाकुलचेतसः ।
ममाद्य शरणं क्वापि न स्याद्गौरकृपां विना ।४९।
चैतन्यदर्शनेऽयोग्यस्तत्पादसेवने तथा ।
अतस्तत्पादचित्तैस्तैः सङ्गोऽस्तु विश्वभूषणैः ।५०।
अभक्तसङ्गमुग्धस्य कृतदुष्कृतकर्म्मणः ।
विना गौरपदाम्भोजं नास्त्युद्धर्त्ता कलौ युगे ।।५१।।
प्रेमभक्तिलतावीजमहो गौरपदाश्रयं ।
विनान्यसाधनं सर्व्वमूषरस्थलवीजवत् ।५२।

यच्चित्तोषरभूमौ हि न भक्तिलतिकाङ्कुरः ।
चैतन्यनाममात्रेण भक्तिकल्पलताजनि ।५३।
दुःखस्याब्धिपतिताद्य देहि पादाश्रयं मम ।
कामादि-नक्रमकरैरुद्विग्नस्य कृपानिधे ।।५४।।
देवैरलभ्या या भक्तिपदवी चेद्दया तव ।
पामरेणापि क्षम्या सा गौरदुर्ज्ञेयवैभवः ।।५५।।
कृपावैभववात्सल्यमद्भुतञ्च कृपानिधे ।
यत्तत् क्वापि च नास्तीति कुरु गौरहरे कृपां ।५६।
कृष्णप्रेमाविष्टविश्वं श्रुतिगूढ़ं गौरहरिं ।
भज रे मूढ़ मे चित्त हित्वान्यं जगदीश्वरं ।५७।
श्रीकृष्णप्रेमप्राप्त्यर्थं अन्येषामन्यसाधनं
मम तु श्रीगौरहरेर्भजनीयं पदाम्बुजं ।५८।
तुच्छीकृतचतुर्वर्गा हरेरेकान्तदासकाः ।
न प्रापुस्ते यद्रहस्य तल्लाभो गौरपादतः ।५९।
वलाल्लज्जा व्यवहृति प्राणदेहार्थधर्म्मकाः ।
एते मेऽपहृता येन तं गौरहरिमाश्रये ।६०।
कारुण्य प्रेमपीयूषसिन्धुमग्नीकृतं जगत् ।
हेमरम्भागर्भगौरहरिर्मेहृतवान् मनः ।६१।
परव्योमादितः श्रेष्ठे प्रेमभक्तिविलासके ।
गौरकृष्णावतारे श्रीनवद्वीपे मनश्चल ।६२।
वदन्तु विधिवाक्यानि युक्ति कुर्व्वन्तु तार्किका ।
अहन्तु गौरपादाब्जं विनान्यत् क्वापि आश्रये ।६३।
सिद्धयः स्युः करस्थाश्चेत् भवेयुः सेवकाः सुराः ।
चतुर्व्वाहुवपुश्चेन्मे तथापि न चलेन्मनः ।
श्रीगौरहरिपदाम्बुजादिति शेषः ।६४।
वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः ।
मास्तु गौरपदाम्भोजविमुखैः सह सङ्गमः ।६५।
लोके महत्त्वविख्यातिः परमा परमाद्भुता ।

सिद्धिश्चतुर्भुजत्वञ्च वृथा गौराश्रयं विना ।६६।।
कृष्णचैतन्य गौराङ्ग विश्वम्भर शचीसुत ।
अवधौतप्रिय प्रेमसिन्धो कुरुकृपां मयि ।६७।
श्रीमद्गौराङ्गविषयभावो यत्र न विद्यते ।
तत्र श्रीराधिकापादपद्मे जातु रतिर्न हि ।६८।
गौरं दामनकोद्दाम माल्यमाराम रामकं ।
प्रगृहीत हरेकृष्ण नाम धाम मनः स्मर ।६९।
श्रीनीलाचलशृङ्गे स्वमुखपद्मार्पितेक्षणं ।
महाभावतरङ्गाढ्यं गौराङ्गं स्मर मे मनः ।।७०।।
मुक्ताफलसदृङ्नेत्र वारिविन्दुविभूषितं ।
रोमाञ्च सुषमं शोणवस्त्रं गौरहरिं भजे ।।७१।।
स्मर गङ्गेन्दुमाध्वीकसुरपादपमातृतः ।
अद्भुत श्रीपवित्रादि यस्य तं गौरमाश्रये ।७२।
प्रेमामृतरसव्रात दानहृष्टजगद्धरिः ।
अङ्गनिन्दितविद्युत् श्रीमञ्जिष्ठांशुः प्रियोऽस्तु मे ।७३।
अगण्यविधुजिद्वक्त्रो द्युतिनिन्दिस्मरायुतः ।
कोटिकल्पतरोर्द्दाता गौरः किं धास्यते पदं ।।
मे हृदीति शेषः ।।७४।।
जगदन्तस्तमोहन्त्री प्रेमाम्बुधिविवर्द्धिनी ।
चकास्तु हृदयेऽस्माकं श्रीगौराङ्गविधुच्छटा ।७५।
अनुभावादिभावानां शावल्योदयशान्तिभाक् ।
भावमुद्रेक्षितोगौरो हरिः स्फुरतु मे हृदि ।७६।
पात्रस्वपरकालादि निरपेक्षी सुदुर्लभम् ।
दत्ते प्रेमरसं ये वै स मे गौरहरिर्गतिः ।७७।
नीचातिनीचपापिष्ठा दुष्टा नष्टाश्च दुर्ज्जनाः ।
येनोद्धृता स गौराङ्गो हरिरेवाश्रयो मम ।।७८।।
राधिकारूपमासाद्य तिरोहितनिजच्छविः ।
परिवर्त्तितलीलादि गतिर्गौरहरिर्मम ७९।

श्रुतिगूढ़महाभक्तौ दुर्लभ्यायां मुनीश्वरैः ।
प्रवेशाय विशन्तु श्रीगौराङ्गपदपङ्कजं ।८०।
शिरोऽञ्जलिगलनेत्रं बिभ्रच्छोणवराम्बरं ।
तप्तकाञ्चनगौराङ्गं प्रणमस्तु महः परं ।।८१।।
श्रीचैतन्यकृपारूपा दृष्टिस्त्वयि पतेन्नहि ।
ध्यानादिनापिकृष्णस्य नाशा प्रेमरसोज्ज्वले ।८२।
तवान्यचेष्टने गौरभक्ता अथ हसन्ति हि ।
श्रुत्यागमचरद्वस्तु पतिं गौराङ्गमाश्रये ।८३।
भक्तिरोति न जानामि ज्ञानकर्म्माद्यनावृतां ।
इति निर्व्वेदचित्तेन गौराङ्गभक्तिमादिश ।।८४।।
पुरुषार्थशिरोरत्नप्रेमलाभाय पुत्रकाः ।
भजत श्रीगौरहरिं यत्कृपा सर्व्वसाधिका ।।८५।।
योगतीर्थाटन स्त्रीस्वरभ्यासाटनधीस्पृहाः ।
हित्वा भजत गौराङ्गं यतीन्द्रं नित्यकौतुकं ।।८६।।
मनस्त्यजत योगादि कृष्णं भजत लुण्ठत ।
प्रेमसु त्वन्महाशा चेत्तदा गौरेऽनुरज्यतां ।।८७।।
यादृशी यादृशी भक्तिश्चैतन्यचरणाम्बुजे ।
तादृशी हृदये स्फूर्त्तिः श्रीराधापादपद्मयोः ।८८।
शिवब्रह्माद्यचर्च्चनीयं महाभावपराश्रयं ।
कलौ भजन्तु रसिकाश्चैतन्यचरणाम्बुजं ।८९।
दन्ते कृत्वा तृणं पादे पतित्वा विनयाकुलः ।
याचे हित्वाखिलं गौरपदे रज्यन्तु साधवः ।९०।
मुक्तिर्ज्ञानादि साध्या स्याद्धरिभक्तिप्रसादनात् ।
गौरचन्द्रप्रसादात्तु प्रेमा वैकुण्ठदुर्लभः ।९१।
चैतन्यपदभक्तेषु निगूढ़प्रेमपूर्णता ।
माधुर्य्यादि गुणैर्येषां जगदानन्ददातृता ।९२।
कलौ संसारतरणं संकीर्त्तनरसे रतिः ।
प्रेमाम्बुधौ विहारश्च नास्ति गौराश्रयं विना ।९३।

याद्क्तत्त्वं प्रेमभक्तिः सवैराग्या गौरहरेः।
भक्तेसु तादृक् कुत्रापि ज्ञानादि नहि दृश्यते।९४।
ब्रह्माद्युपास्यं चैतन्यं नाश्रयेद् यो जनः कलौ।
तस्य संसारसरणौ गमनागमनं भवेत् ॥९५॥
वशीभवन्ति देवाद्या यस्याशा गौरपादयो.।
क्षुद्रा नृपास्तु किं गण्यास्तद्भक्तास्त्वधिकारिकाः।९६।
श्रीगौरभजनं चिन्तारत्नं प्राप्य महाजनाः।
न यान्ति क्वापि राजादौ यान्ति चेत् करुणावशाः।९७।
ज्ञानयोगकर्म्मनिष्ठावहवः सन्तु भूतले।
चैतन्यचरणाम्भोजकृपाजन्यसुखं कुतः।९८।
काश्यादेर्गणना न स्यान्मोक्षः शम्बुककक्षकः।
क्व भीर्निरयपत्न्यादौ श्रीचैतन्यकृपा यदि।९९।

नवकाञ्चन कन्दलकान्ततनुः प्रियताम्बुधिर्वर्द्धिशचीप्रजनुः।
जितकेशरिदिव्यकिशोरमदः किल गौरविधुर्जयति प्रमदः।१००।

स्मरचन्द्रसुरद्रुमभातृशत प्रियसिन्धुसुधारुचिरादिकतः।
अतिसुन्दरतादिक कोटिगुणो जय माधव काञ्चनकान्तितनो।१०१
शिव पद्मज दैवत विस्मयने स्वपदाम्बुजषट्पदभक्तगणे।
वितताद्भुत हि महिमादिभरः कलधौततनुर्जयतीशवरः।१०२।
मदमत्तमृगेन्द्रशतायुतहुङ्कृतिरावतति सुखयंश्च वहून्।
सुखचिन्मयकोटि शिरोमुकुटः कनकाञ्चि तनुर्जयति प्रणटः।१०३
रुचिदीपकरूपशचीतनुजः प्रियहृत्तम आदिकनाशमयः।
निजभाव चकाशन दीप्तिचयो जयतीह महामहिमादिमयः॥१०४॥
विधु शीतल दूरदहोज्ज्वलितः प्रियताशयवर्त्तिमसोमहितः।
परमाद्भूतदीपशचीतनयः सततं ज्वलति प्रणयादिमयः।१०५।
मुखरीकृतचीत् कृतिदिग्विदिशः प्रियतारसमुन्मदकुन्दयशः।
ध्वनिहासमहोज्ज्वलविष्णुपदः परशोभित ईशवरोवरदः।१०६।
स शचीजलधिजात निशापतिर्दिनरात्रिरुचिर्नटराजगतिः।
निजभक्तचकोरकरस्य पदः परिभाति जगत्रयतापनुदः।१०७।

नयनाश्रु जलाप्लुतगण्डयुगः कलितश्वसन व्रजहारवणः ।
विरहार्त्ति सखीरतिमग्नतरः परिभातिच कोऽपि सुगौरवरः ।१०८
वृषभानुसुता वपुरेकतनुः कनकोज्ज्वलभ्राजितपुष्पधनुः ।
कृतगोपकुमार विलासभरः परिभाति विधुज्ज्वलगौरवरः ।१०६।

यस्मिन् गौरेऽवतीर्णे द्रागघरेकृष्णेति वर्णकाः ।
आविः स्युश्चित्तकौमल्यं स्यात् श्रीगौरः स मे गतिः ।११०।
नास्ति योगादिकं यस्य निषिद्ध चरणं सदा ।
लुण्ठति प्रेमरत्नं स गौरेऽवतरति प्रभो ।१११।
त्यक्तकर्म्माग्रहः कर्म्मशीलाहृद्द्रवतां गतं ।
नठत्युद्ध योगिमनो गौरे प्रकटतां गते ।।११२।।

विषय वुध योगीन्द्र मतयस्तापसा अपि ।
जहु स्वं साधनं भक्त्या चैतन्ये प्रकटं गते ।११३।
कृष्णसङ्कीर्त्तनं गेहे देहे च पुलकादयः ।
स्नेहेऽप्युत्कर्षता गौरेऽवतीर्णे श्रुतिदुष्करा ।११४।
कृष्णेऽवतीर्णे गौराङ्गे प्लावितं भुवनं रसैः ।
प्रेमाम्वुधेर्विकारैश्च परमाश्चर्य्यमप्यभूत् ।११५।
शास्त्रगर्व्वायिताः कर्म्म तपोनिष्ठाश्च केचन ।
पूर्व्वं सम्प्रति गौराविर्भावे प्रेमा समोऽभितः ।।११६।।
वालवृद्धवधूक्षुद्रजड़ान्धवधिरादयः ।
वभूवुः प्रेमरसिकाः गौरे देवेऽवतारिणि ।११७।
अवतीर्णे गौरचन्द्रेऽवतेरुः सर्व्वपार्षदाः ।
हलीश नारदाद्या ये गोपा गोप्यश्च वृष्णयः ।११८।
अवतीर्णे हेमगौरे प्रेमाणं दातरि प्रभोः ।
अवतीर्णा ब्रजस्थाः स्वाः प्रापुः पूर्व्वाधिकं सुखं ।११९।
गौरे प्रकटतां प्राप्ते कुलवध्वः शिलाहृदः ।
अज्ञाश्च प्रेमसम्पन्ना हासद्रवरसान्विताः ।१२०।
अचैतन्यस्य लोकस्य धीरासीदनवस्थिता ।
आविर्भूते हरौ गौरे न केषां भगवद्रतिः ।१२१।

श्रीमद्भागवततात्पर्य्यं राधास्वरतिविभ्रमं ।
विस्तारयन् गौरचन्द्रोऽवततार स्वयं हरिः ।१२२।
कलौ गौरहरौ प्राप्ते प्राकट्यं केऽपि केऽपि च ।
व्रजदास्यादिकं प्रापुः पपू राधापदाम्वुजं ।१२३।।
प्राचीनमत कर्त्तृणां श्रद्धा तत्तन्मते नहि ।
गौरेतु प्रकटे वेदतात्पर्य्यार्थी हरौ रतिः ।१२४।
गौरचन्द्रपदाम्भोजनखचन्द्रमणिप्रभं ।
मज्जयन्तं जगत्प्रेम्नि प्रभावं तं स्मराम्यहं ।।१२५।।
कोऽपि निस्तारितः पूर्व्वैः प्रेमाम्वुधिनिमज्जनं ।
विश्वस्य न कृतं कैरप्यृते गौरहरिं कलौ ।।१२६।।
धर्म्मे साधनभक्तौच निष्ठां प्राप्ते जने कृपा ।
कृपातु यस्य नीचेऽभूत्तस्य को वेत्ति नाटकं ।
तस्य गौराङ्गस्येति शेषः ।१२७।
वाल्यपौगण्डकैशोरपूर्व्वावस्थां प्रकाशयन् ।
क्वचिद्विरहिणीभावं गौरो विस्मापयज्जगत् ।१२८।
स्वपूर्व्वोज्ज्वललीलायां वेशयन्ती जगत्तनूं ।
काञ्चनार्द्रमयी काचिल्लग्ना मे हृदये हरेः ।१२९।
प्रेमनाम महत्त्वादि श्रीवृन्दावनमाधुरी ।
राधिकाञ्च विजानीयात् को वा गौरहरिं विना ।१३०।
स्वपीतच्छटाच्छादितक्ष्मादिसर्व्वं श्रुतीनामतर्क्याद्भुतप्रेमचर्व्वं ।
शिवब्रह्मदेवैः स्तुतं सर्व्ववृत्तं तटे वारिधेर्नृत्यति ब्रह्ममूर्त्तं ।१३१
दुकूलाम्वरप्रोल्लसत्श्रोणिदेशः सुवर्णोज्ज्वलाङ्गः सुहारादिवेशः ।
हरिः क्रीड़ति स्वाह्वयैर्नृत्यरूढ़ः स्फुरन्मल्लिकामालिकावद्धचूड़ः १३२
हरौ ताण्डवं कुर्व्वति प्रेममत्ते स्वरूपप्रकाशे जगन्मग्नचित्ते ।
सुरैर्वादितं किन्नरैर्गीतमत्र मुनीनां गणास्तुष्टुवुः सुष्ठु यत्र ।१३३।
महाभाववोधानुभावप्रभावः क्षणं रोदितीह क्षणं हासभावः ।
हरिः क्रीड़ति श्रीशचीनन्दनोवै प्रनृत्यन्नदन् यो लुठन् मूर्च्छितोवै १३४
तले वामपाणेः कपोलं निधाय रतिं राधिकायाः पदाब्जे विधाय ।

समुद्रस्य तीरस्थितो गौरचन्द्र स्त्वब्ज नेत्रपद्मोऽभवत् प्रेमतन्द्रः ।१३५॥
दिशः शब्दयन्नर्त्तने पादघातैरिलां पङ्किलां साधयन्नश्रु पातैः ।
नभः शुक्लयन् श्रीशचीजोऽट्टहासैः सुरक्ताम्बरो नृत्यति प्रेमरासैः १३६

सर्व्ववेदमूद्ध्र्वरत्न दुर्व्विभाव्यदेहिका
श्रीशपद्मजादिभिस्तु दुर्वितर्क्यवीथिका ।
राधिकेशभक्तिमत्त सर्व्वलोकजित्वरी
यास्यतीह दृक्पदन्तु मे नु गौरमाधुरी ॥१३७॥
ज्ञानि कर्म्मि यति त्यागि तापसादि तुच्छका
स्वोज्ज्वलादि वाक्यमात्र भक्तिमार्गपोषिका ।
रागवर्त्म शुद्धभक्तिसाधनान्यजित्वरी
यास्यतीह दृक्पथन्तु मे नु गौरमाधुरी ।१३८।

व्यक्तोऽभवद्यत्र सुवर्णवर्णो गौरो हरिः प्रेमनिमग्नविश्वः ।
संकीर्त्तनानन्दरसो हि यत्र स एव कालः पुनरेष्यति स्वित् ।१३९
स एव गौड़ौऽम्बुनिधेस्तटः स वै हरेस्तथाख्या जगतीपतिः स हि ।
भवत्कृत प्रेम न कुत्र दृश्यते वीक्ष्ये पुनः किं तव वैभवं हरे ।१४०।
मीनादयो यस्य कलाः स्वरूपाः कृष्णः स्वयं श्रीभगवान् स एव ।
श्रीगौरचन्द्रः किल पूर्ण एव यावत् स्वशक्तिस्वगुणप्रसेव्यः ॥१४१॥
अवोध्यमपि भक्तोक्तं श्रुत्वा गौरहरिः किल ।
विधागम्यो भवेत् प्रीतो वालार्द्धोक्तं पिता यथा ॥१४२॥
निजवुद्धयापि चैतन्यप्रियविज्ञै रपि न विवेचितं येन यथा
तथा वदतु मूढ़त्वान्ममतु यथान्तः करणेऽस्ति तथैव प्रसीदतु १४३

प्रकरणानि द्वादश यथा—

स्तुति नत्याशिषो गौरभक्तानाञ्च प्रशंसनं,
चैतन्याभक्त निन्दा च स्वनिन्दोपास्य निष्ठता ।
लोकशिक्षा तदुत्कर्षोऽवतार महिमापि च
तद्रूपोल्लासनृत्यादि श्लोकः प्रकरणानि वै ।

❋ श्रीश्रीगौरगदाधरौ जयतः ❋

श्रीचैतन्यपञ्चशतशताब्दी के

अवसरपर

अनुपम उपहार

श्रीचैतन्यचन्द्रामृतम्

जिसमें

प्रेमा नामाद्भुतार्थः श्रवणपथगतः कस्य नाम्नां महिम्नः
को वेत्ता कस्य वृन्दावनविपिन–महामाधुरीषु प्रवेशः ।
को वा जानाति राधां परमरसचमत्कारमाधुर्य्यसीमा-
मेकश्चैतन्यचन्द्रः परमकरुणया सर्वमाविश्चकार ॥१३०॥

प्रेम नामक परम पुरुषार्थ, जिस को पहले किसी ने भी कानों से भी नहीं सुना था, श्रीहरि नामकी महिमा को भी लोक इससे पहले जानते नहीं थे, श्रीवृन्दावन की परम माधुरी जिस में किसीका भी कभी प्रवेश नहीं हुआ, परमाश्चर्य्य मधुर माधुर्य्य रस की परा काष्ठा स्वरूपा श्रीराधा है, जिनको पहले कोई भी व्यक्ति नहीं जानते थे, एकमात्र श्रीचैतन्यचन्द्र प्रकट होकर ही इन सबका आविष्कार किए ॥१३०॥

❋ परमरसचमत्कार माधुर्य्यसीमा श्रीराधा का—

❋ प्रेम नामक अद्भुतार्थ का—

❋ वृन्दाविपिन महामाधुरी में प्रवेश चातुरी का—

—❋ एकमात्र आविष्कारक ❋—

श्रीचैतन्यदेवकी सुविशदमहिमा वर्णित है ।

१ वेदान्तदर्शनम् "भागवतभाष्येपेतम्" महर्षि श्रीकृष्ण द्वैपायन व्यासदेव प्रणीत, ब्रह्मसूत्रों के अकृत्रिम अर्थ स्वरूप श्रीमद्भागवतके पद्यों के द्वारा सूत्रार्थों का समन्वय इसमें मनोरम रूपमें विद्यमान है। २०.००

२ श्रीनृसिंह चतुर्दशी भक्ताह्लादकारी श्रीनृसिंहदेवकी महिमा, व्रतविधानात्मक अपूर्व ग्रन्थ। ०.५०

३ श्रीसाधनामृतचन्द्रिका गोवर्द्धन निवासी सिद्ध श्रीकृष्ण दास बाबा विरचित रागानुगीय वैष्णव पद्धति। ४.००

४ श्रीसाधनामृतचन्द्रिका (वङ्गला पयार) गोवर्द्धन निवासी सिद्ध श्रीकृष्णदास बाबा के द्वारा सुललित छन्दोवद्ध ग्रन्थ। ४.५०

५ श्रीगौरगोविन्दार्चन पद्धति गोवर्द्धन निवासी सिद्ध श्रीकृष्णदासबाबा विरचित सपरिकर श्रीनन्दनन्दन श्रीभानुनन्दिनी के स्वरूप निर्णयात्मक ग्रन्थ। ३.५०

६ श्रीराधाकृष्णार्चन दीपिका श्रीजीवगोस्वामिपाद कृत श्रीराधासम्वलित श्रीकृष्ण पूजन प्रतिपादन का सर्वादि ग्रन्थ। २.००

७ श्रीगोविन्दलीलामृत (मूल, टीका, अनुवाद सह–१–४सर्ग) श्रीकृष्णदास कविराज कृत रागानुगीय स्मरणाङ्ग निर्वाहक ग्रन्थ। ५.५०

८ ऐश्वर्यकादम्बिनी (मूल अनुवाद) श्रीवलदेव विद्याभूषण कृत भागवतीय श्रीकृष्णलीलाका क्रमबद्ध ऐश्वर्य मण्डित वर्णन, श्रीवृषभानु महाराज, एवं भानुनन्दिनीका मनोरम वर्णन इसमें है। १.५०

९ संकल्प कल्पद्रुम (सटीक, सानुवाद) श्रीविश्वनाथ चक्रवर्त्तिपाद कृत स्वारसिकी उपासनाका प्रमुख ग्रन्थ। २.००

१० चतुःश्लोकी भाष्यम् (सानुवाद) श्रीनिवासाचार्यप्रभु कृत चतःश्लोकी भागवत की स्वारसिकी व्याख्या। ३.००

११ श्रीकृष्णभजनामृत (सानुवाद) श्रीनरहरिसरकार ठक्कुर कृत अपूर्व धर्मीय संविधानात्मक ग्रन्थ।

१२ श्रीप्रेमसम्पुट (मूल, टीका, अनुवादसह) श्रीविश्वनाथचक्रवर्त्ती कृत भागवतीय रास रहस्यवर्णनात्मक हृदयग्राही ग्रन्थ ४.००

१३ भगवद्भक्तिसार समुच्चय (सानुवाद) श्रीलोकानन्दाचार्य प्रणीत भक्तिरहस्य परिवेषक अनुपम ग्रन्थ। ३.७५

१४ भगवद्भक्तिसार समुच्चय (सानुवाद बङ्गला) श्रीलोकानन्दाचार्य प्रणीत, भक्तिरहस्य प्रकाशक मनोहर ग्रन्थ। ३.००

१५ व्रजरीति चिन्तामणि (मूल, टीका, अनुवाद) श्रीविश्वनाथचक्रवर्त्ति ठक्कुर कृत व्रजसंस्कृति वर्णनात्मक अत्युत्कृष्ट ग्रन्थ। ४.००

१६ श्रीगोविन्दवृन्दावनम् (सानुवाद) बृहद् गौतमीय तन्त्रान्तर्गत श्रीराधारहस्य परिवेषक सर्वोत्कृष्ट ग्रन्थ। १.५०

१७ श्रीराधारस सुधानिधि (मूल बङ्गला) श्रीप्रबोधानन्द सरस्वतीपादकृत श्रीराधा महिमा प्रतिपादक अनुपमेय ग्रन्थ। १.७५

१८ श्रीराधारस सुधानिधि (मूल हिन्दी) ०.६०

१९ श्रीकृष्णभक्ति रत्नप्रकाश (सानुवाद) श्रीराघव पण्डित रचित श्रीकृष्णभक्ति प्रकाशक अनुपम ग्रन्थ। ५.००

२० हरिभक्तिसार संग्रह (सानुवाद) श्रीपुरुषोत्तमशर्म प्रणीत श्रीभागवतीय क्रमबद्ध भक्ति सिद्धान्त संग्रहात्मक ग्रन्थ। १२.००

२१ श्रुतिस्तुति व्याख्या (अन्वय, अनुवाद) श्रीपाद प्रबोधानन्द सरस्वती कृत वेदस्तुति की व्रजलीलात्मक व्याख्या। १४.००

२२ श्रीहरेकृष्ण महामन्त्र "अष्टोत्तरशतसंख्यक" ०.४०

२३ धर्मसग्रह (सानुवाद) श्रीवेदव्यास कृत धर्मसंग्रह श्रीमद्भागवतीय ७म स्कन्ध के अन्तिम ११, १२, १३, १४, १५ अध्यायों का वर्णन। ३,७५

२४ श्रीचैतन्य सूक्ति सुधाकर श्रीचैतन्यचरितामृत, तथा श्रीचैतन्यभागवतीय सूक्तियों का संग्रह। ४.००

२५ सनत् कुमार संहिता (सानुवाद) व्रजीय रागानुगा उपासना प्रतिपादक सुप्राचीन ग्रन्थ। २.५०

२६ श्रीनामामृत समुद्र श्रीनरहरि चक्रवर्त्ति प्रणीत श्रीमन् महाप्रभु के परिकरों का नामसंग्रह। ०.६०

२७ रासप्रबन्ध(सानुवाद)श्रीपादप्रबोधानन्द सरस्वती कृत ३.००

२८ दिनचन्द्रिका (सानुवाद)सार्वदेशिक दिनकृत्यपद्धति २.००

२९ भक्तिसर्वस्व (बङ्गाक्षरमें)प्रेमभक्तिचन्द्रिका, प्रार्थना प्रभृति सम्वलित। ५.००

३० स्वकीयात्वनिरास परकीयात्वप्रतिपादन श्रीबिश्वनाथ चक्रवर्त्ती कृत। १४.००

३१। श्रीसाधनदीपिका श्रीराधाकृष्णगोस्वामिपाद विरचिता, मन्त्रमयी स्वारसिकी उपासना का समन्वयात्मकग्रन्थ, इसमें ऐतिहासिक एवं गवेषकों के लिए पर्य्याप्त सामग्री सन्निविष्ट है १०.००

३२। मनःशिक्षा (वंगला) (अष्टोत्तरशत पदाबली) प्राचीन कवि श्रीलप्रेमानन्द दास विरचित। ३.५०

३३। श्रीराधारससुधानिधि (वंगला मूल, अनुवाद सह) ५.००

३४। श्रीगोविन्दलीलामृत ५सर्ग से ११सर्ग पर्यन्त (टीका सानुवाद) २५.००

३५। श्रीगोविन्दलीलामृत १२सर्ग से २३सर्ग पर्यन्त(टीका सानुवाद) ३०.००

३६। श्रीचैतन्यचन्द्रामृतम् ५.००

❋ अस्माभिः कमिशनं न दीयते ❋